TRIVANDRUM SANSKRIT

No. LI

THE

NÂMALINGÂNUSÂSANA

OF

AMARASIMHA

With the two commentaries, Amarakosodghâtana of

KSHÎRASVÂMIN

and Tîkâsarvasva of

VANDYAGHATÎYA-SARVÂNANDA

EDITED BY

T. GANAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum

Part III 2nd Kanda, 7—10 Vargas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1917

(*All Rights Reserved*).

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५१.

श्रीमदमरसिंहविरचितं
नामलिङ्गानुशासनं

क्षीरस्वामिप्रणीतया अमरकोशोद्घाटनाख्यया व्याख्यया
वन्द्यघटीयसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया व्याख्यया च
समेतं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
त. गणपतिशास्त्रिणा
संशोधितम् ।

तृतीयः सम्पुटः—द्वितीयकाण्डे ७—१० वर्गाः ।

तच्च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोल्लम्वाब्दाः १०९२, क्रैस्ताब्दाः १९१७.

क्षीरस्वामिस्मृता ग्रन्थकर्तारः

द्वितीयं काण्डम् ।

II. *refers to the second part and* III. *to the third part of this work.*

आचार्याः II. ३९.

इन्दुः II. ७९, ८४, ८५, ८७, ८९, १०१, १०४, १११, ११३, १२०, १३१, १३७, १३९, १४१, १४२, १४६, १७१, १७६, १९०, १९८, २०७.

उपाध्यायः II. ६२, ३०६. III. १४९, १९९, २८१.

कश्मीराः III. ११०.

कात्यः II. १०, १९, ३६, ४९, ६०, ६६, ६७, २४५, २७४, २७६, ३४१. III. १२, १५, २९, ४८, ६६, १७२, १९६, २१०.

कालिदासः II. २९१.

गौडः II. ९०, ९४, ९७, १६६, १७३, २१६, २५०, ३५७. III. ९६, २२४.

गौडाः II. ३९, ११२, १८१. III. १००.

गौतमः III. ८.

चन्द्रः II. ८४, ८९, ९२, ११४. III. १२, २६२.

चन्द्रनन्दनः II. ११७, १२१, १४७, १५६, १७२.

चाणक्यः (कौटिल्यः) II. १९, २३, ३३, ४१. III. ७०, १३२, २७०, २७३.

तान्त्रिकाः III. १७८.

दुर्गः II ११९. III. १४०.

द्रामिडाः II. २६९. III. १९१, २७२.

धन्वन्तरिः II. ७४, ९२, १०५, १३२, १७९, १९१, १९३, २००, २०२, ३८०, ३८९. III. १८६, १९६, २३८, २४०, २४१.

धातुविदः III. २३७.
नन्दः III. १२.
नारदः III. २४८.
निमिः II. ११०, २४२. III. २४४.
नैरुक्ताः II. ३०९, ३२२, ३४६. III. ७, १९१, २३५.
पालकाप्यः III. ८२.
पौराणिकाः III. २६३.
प्राच्याः II. १३१, १३५, २७६. III. ९, २०१.
भरतः II. २६६, ३६८. III. ६८, १२२.
भागुरिः II. २, १४४, २७७, ३५३. III. ३०, १९५, २१०, २११.
भुग्नः II. १९, ६९. २१९. III. १०५, १३१, १६२, १९९, १९९, २७५.
भुजः (?) II. ३५६.
मनुः II. ९, २६१, २७८. III. ६, १३, २४, ३१, ४३, १५२, १९४.
मालाकारः III. १९५.
मुनिः II. १७४, २९२, ३३०, ३१०, ३७१. III. ३१, १००, १०५, ११०, १३१, १९३, १७९, १९०, १९१, २६७, २७४, २८४.
याज्ञवल्क्यः III. ४४.
वात्स्यायनः II. १२८.
वामनः II. १७.
वाहटः III. १८६.
वैद्याः II. ९२, ११०, १५४, १६२, १७०, १८९, १९१, ३२३, ३२४, ३२९, ३२७. III. १८५, १८६, १८९.
शाश्वतः II. २, ११, २२, ४३, ४९, ५०, ५९, ६०, ६१, ७३, ८६, १०९, ११७, १४४, १५४, १६०, २१८, २२९, २४६, २६८, ३१९, ३२२, ३३४, ३४९. III. ४९, ९१, ७५, १२७, १२८, १२९, १३४, १००, २१०, २३६, २७७, २८१.

श्रीभोजः II. ८८, ३१७. III. १०४, ११३, २००, २१७, २५३, २७२.
श्रीहर्षः II. ३१६.
सज्जनः III. १९७.
सभ्याः II. ३२८, ३५८, ३७७. III. १४६, २११, २७२.
सुश्रुतः II. १९१.
सौश्रुताः II. ११७.
स्मार्ताः III. २९०.

क्षीरस्वामिस्मृता ग्रन्थाः ।

द्वितीयं काण्डम् ।

अर्थशास्त्रम् III. ७४.
आगमः II. २२८, २७३, ३८५. III. २११.
ज्योतिषम् III. ६३.
धनुर्वेदः III. १२२, १२३.
नाट्यशास्त्रम् II. १४६.
नाममाला II. १०२, १४१, ३४२.
निघण्टुः II. २, १००, २९२. III. २१६.
निरुक्तम् II. २२९. III. २४३.
पारमेश्वरम् III. ६३.
पुराणम् III. १९०.
बालरामायणम् II. २७३.
भरतशास्त्रम् III. १३८.

भारतम् II. ३८९. III. ११८.
भाष्यम् II. २९४. III. २२३.
माला II. १९, १९, ३५, ११०, १२८, १६३, २००, २२०, २२९. २७६. III. १०६, १७५, १८५, १९९, २०३, २०९, २११, २१७. २२६, २८२, २८३.
मेखला II. १९४.
वैद्यकम् III. ६३.
सूदशास्त्रम् III. १८७.
स्मृतिः II. २९३. III. २३९, २४८, २७७.
हरमेखलानिघण्टुः II. १५०.

टीकासर्वस्वस्मृता ग्रन्थकर्तारः।

द्वितीयं काण्डम्।

अजयः II. ४, २४, ३५, ४२, ४७, ६०, ८४, ८८, १०९, ११२, १५५, २४७, २७५. III. ९३, ९३, १०३, १०९, ११०, १६९, २११.
अरुणः II. २३, ३११, ३३६, ३४४. III. २१३, २७७.
अरुणदत्तः II. २५, २६.
अर्धनारीश्वरः II. २३९.
अश्वघोषः II. ३२२.
ईश्वरकृष्णः II. ३३६.
कलापाः II. १९९.
कलिङ्गः II. १०७.

कामन्दकः III. ११७.
कालिदासः II. १५, ११०, २४६, २६८, २९३, ३९१.
काश्मीरवल्लभदेवः II. १३०.
गङ्गदेवः II. ८७.
गोपदत्तः II. ३२८.
गोवर्धनः II. २७७, ३६८. III. २०, १७५.
घटकर्परः II. २९०.
चन्द्रगोमी II. ४७, ६४, ३३९. III. ४०.
चाणक्यः II. २३.
चाणक्यटीकाकृत् II. २१४. III. १२५, २३१.
चान्द्राः II. ४७, २१५, २७७, ३३७. III. १५९.
जयादित्यः II. २७८. III. १३.
जातरूपः II. १३४.
टीकाकृत् III. १५४, २८२.
तारपालः II. १५, १०८, २१२, २४३. III. २३७, २१९.
दण्डी III. १३९.
दामोदरः II. १९७.
दुर्गसिंहः II. ३०१.
देवेश्वरः III. २०४.
धनञ्जयः II. ३४१.
धर्मः II. १३०.
न्यासकारः III. १२६, २०६.
परिभाषावृत्तिकाराः III. १०९.
पुरुषोत्तमदेवः II. ११९, २१५, २२१, २७७. III. २०.
प्राणेश्वरः II. १५.
बलशर्मा II. ३५०.

बाणः II. २२५, ३०१. III. १९२, १९८, २३४.

भट्टिः II. ९०, ५४, १४३, २८९, ३०३, ३६६.

भवभूतिः II. ११५, २३९.

भागुरिः II. २२७, ३३४. III. ८४, २३०.

भारविः II ३२५, ३६७, III. १०.

भासकविः II. ३०५.

भिक्षुदेवः II. ३३, १०१, १०६.

मनुः II. ९, ६९, २९७, ३१३, ३६५ III. ७, २६, २९, २२७.

माघः II ५, २३, ३४, ५६, ६०, ६१, ६१, ६८, ६९, १००, २२६, २४१, ३४८, ३५४, ३६७, ३७१. III. ६०, ८६, ८८, ९५, १२६, १३९, २००.

माधवः II. ८१, ९१. III. २३९, २४५, २८२.

माधुराजः II. ३११.

मुरारिः II. ३२८.

मौद्गल्यायनः II. ८९.

रक्षितः II. ३११. III. ४०, १६५, २६६.

रभसः II. १६, १७, २१, ३९, ६६, ७९, ८०, ८६, ८९, ९१, १००, १०५, १०८, ११५, ११६, १२०, १२२, १२३, १२४, १३९, १४५, १५४, १५५, १६२, १७२, १७४, १९७, २०९, २१८, २२४, २२७, २३८, २३०, २४१, २७४, २८५, २९८, ३००, ३०३, ३०७, ३१६, ३२३, ३२५, ३२७, ३३३, ३३६, ३३७, ३४५, ३५७, ३६०, ३६४, ३६७, ३७२, ३७३, ३७४, ३८२, ३८४, ३८५, ३८८. III. ४, ७, १४, २३, ७१, ८६, ९३, १०९, १२६, १२९, १५०, १६१, १६६, १७०, १७२, १७७, १८१, १८६, २०८, २३९, २४३, २४६, २६१, २८३.

राजशेखरः ॥ ६३, ३१८.

रामदासः ॥ ३, ४, २७, ३५२.

रुद्रः ८, ३७, ८१, ८३, ११०, १२९, १५४, १६८, २१०, २१०, २९८, ३४७, ३७६, ३८०, ३८२, ३८५. III. ५, ७०, ८३, ८८, ९९, १६५, २२७, २४२.

वररुचिः ॥ ६९, २९४, ३५१, ३६१, ३९१. III १२५, २५७.

वराहः ॥ ३२, २९३, ३६४, ३६५.

वल्लभः ॥ २३, ३५०.

वसन्तराजः ॥ ५५, ३५२.

वात्स्यायनः ॥ २६४.

वामनः ॥ १७, ४०, ६९.

वार्त्तः III १९०.

वाहटः ॥ ९९.

विक्रमादित्यः ॥ २१७.

विदग्धाः III. १७८.

विनीतकीर्त्तिः III १०२.

विभाकरवर्मा ॥ २४१.

विशाखदत्तः III ९३.

विश्वरूपः ॥ ४१.

वृष्काः (?) III १६०.

वोपालितः ॥ ३६, ४३, २२६, २३०, २४९, २९१, ३२३, ३४८. III. ५२, ५३, ८७, १०६, १४१, १४२, १५३, १५९, १७६, १८१, २२२, २२५, २२७.

व्याडिः ५०, ६१, १२७, २३०, २५२, ३८५. III. १६३, २३७, २४२.

शबरस्वामी II. ३५२.
शाकटायनः II. ३०३. III. २११.
शालिहोत्रः II. २६६.
शाश्वतः II. ३३२, ३४७.
शुभाङ्गः II. २६१, ३७६.
शूद्रकः II. ६९.
श्रीकण्ठः II. २५९. III. २२१.
सनातनः III. २००, २४०.
सुश्रुतः II. ३३३.
सोमनन्दी II. २६५.
हङ्कचन्द्रः II. २६, ७२, २६१, ३३२, ३८०. III. ८८, १८२, २७३.
हलायुधः II. २२, ४१, ५५, २२८, २४०, ३०२. III. २३९.

टीकासर्वस्वस्मृता ग्रन्थाः ।

द्वितीयं काण्डम् ।

अनुन्यासः II. ३३६.
अनेकार्थः II २४.
अन्यतन्त्रम् III. १८४.
अभिज्ञानशाकुन्तलम् II. ३६६.
अभिधानमाला III. ५.
अमरमाला II. ८, १२, २८, ३०, ३१, ३४, ४२, ४३, ६४, ९८, ९९, १२२, १३३, २१०, २२१, २२३, २३३, २४२, ३१२, ३२७, ३३५, ३४१, ३४३, ३४४, ३४६, ३८२. III. ८, १०२, १३२, २२७, २३६, २४२, २५०, २६४, २८३.

अर्थशास्त्रम् II. २४. III ५९.
अश्वचरितम् II. ५५.
आर्याकोशः II. ६३.
आश्चर्यमञ्जरी III. ८३, १७७.
उणादिः II. ३३६, ३३७, ३९४, ३६८, १७९.
III. ५०, ८३, १२१, १३४, १४२.
उणादिवृत्तिः II. २०७, ३३०. III. १५३, १६४, २६४.
उत्पलिनी II. ६३, १०३, २२८. III. १३४.
उपाध्यायसर्वस्वम् II. १९७. III. २७७.
कण्ठभूषणालङ्कारः II. ३९६.
कण्ठिकाभ्युदयः II. ३९, २९१, ३८१. III १७७.
कातन्त्रटीका II. ३०३, ३०४.
कादम्बरी II. २४०, २४१.
कामशास्त्रम् II. २६१.
काव्यालङ्कारः II ४०.
किरातम् II. ७२, ३७१.
कीचकवधः II ५८, १९३, २८४.
कुमारचरितम् II. २१८.
कुमारसम्भवः II. ३५०, ३७०.
केसरमाला II. २३२, २९३.
कोशान्तरम् II. १०७, १४१, १६४, १७९.
कोष्ठाध्यक्षप्रधानटीका II. २२४.
गणितम् III. २२९.
गोवर्धनीयोणादिवृत्तिः II. ३०५. III २४१.
चान्द्रलिङ्गानुशासनम् II. ३२२.
जातकमाला III. ९०.
ज्योतिषम् II. ३२३.
तन्त्रान्तरम् II. ८३, ९०, १७१, १४८, १९४, २०१, २७७. III. २६२.

त्रिकाण्डः II ५६, २५५. III. १०१, १३९.
त्रिकाण्डशेषः II. १७, ६४, ११०, २९८, ३१८, ३५१. III. २०, ४४, १२१, १२४, १२६, १६४, २५१.
दण्डियमकम् II. ९६.
दुर्घटः II. २७७.
देवीमाहात्म्यम् III. १२०.
द्विरूपकोशः II. २१ . III. १६४, १६६.
धरणिः II. १०१, २१७, ३०२. III. ५३, ५६, ६४, १६२.
धातुपारायणम् II. १९८. III. १६९.
धातुप्रदीपः II. ३८, ४८, ९८, ६७, ११३, २१९, २१७, २३१, २७७, ३०५, ३८६. III. १२५, १६५, १६८, २२७, २३०.
धातुवृत्तिः III. १३४.
नाट्योक्तिः III. २९.
नाथीयधातुवृत्तिः II. ३६०.
नाममाला II. २१, २२, २६, ४८, ६९, २६८, २७९, ३३१, ३४४, ३९०. III. ५५, ८९, ११८, १५१, १६९, २०८, २३४, २३५, २५०, २७७, २८३.
नामानुशासनम् II. ६. III २०४.
नारकस्तुतिः II. २२७.
निगमाख्यमभिधानम् II. २७५. III. १९२, १६८.
न्यासः II. २६६. III. १४९, २६२.
पुरुषोत्तमटीका III. १२८.
प्राकृतशास्त्रम् II. ३६१.
बालरामायणम् III. ९४.
बृन्दावनयमकम् II. १००, २२४, २४६, २६७. III १३४
बृहत्कथा III. २४१.
बृहदुत्पलिनी II. ३५०.
भट्टिभाषासमावेशः II. ६९, २१४, २३१.

भरतीयम् II. २६६. III. १२८.
भागवृत्तिः II. ११, ३११.
भाषावृत्तिः III. ६५.
भाषासमावेशः II. ११५.
भाष्यम् II. २२४, २२६, २७८, ३५२
महान्यासः II. ३७९.
महाभारतम् II. १२४, ३०४, ३२१.
महिम्नःस्तोत्रम् II. २२४.
माघयमकम् II. ३२४. III. २३४.
योगयात्रा II. ४६.
योगशतकम् III २४७.
योगशतकव्याख्यानम् III. २४०.
रघुवंशम् II. २६, २८, १२८, २६२, ३१३. III. ४५. ७३.
रत्नकोशः II ६, २२, २५, ७६, १९८, २०४, २३०, २९३, ३०२, ३३८. III ६०, ९७, १५९, १७०, १७१, १७२, १९०, २२७, २४७, २५४, २७०, २८४.
रत्नमाला II. ३३, ७८, ११०, १२८, १४८, १७३, ३३७ III ३१, १८७, २४०, २५१.
रन्तिकोशः II. ६८, ७४.
रभसकोशः II. १८०.
रुद्रकोशः II. ८७.
रूपरत्नाकरः III. २४१.
लटकोशः II ११५.
लिङ्गकारिका II. १५२. III ४०.
लिङ्गानुशासनम् II १७.
वररुचिलिङ्गसूत्रम् II २०४
वराहयमकम् II ४६

वर्णदेशना — II. ४६, ६६, ६८, २१७, २१८, २२६, २९८, ३३६. III. ९६, १२६, १७१, १८०, १८३.

वर्णविधिः — II. १५२.

वात्स्यायनम् — III. ६१.

वायुपुराणम् — III. २३४.

वासवदत्ता — II. २११, २१५, २३७, ३३१.

विदग्धमुखमण्डनम् — II. २११, ३४१. III. १९, १९२.

विश्वप्रकाशः — II. ३३, ३५, ९१, १५४, १९५. III. ८६, २६९.

विष्णुपुराणम् — II. ७.

वृत्तिः — II. ३४, ५८. III. १०२, १५९, २७१.

वैद्यकम् — II. १०६, १०७, १४३, १४७, १५२, १६२, २०१, २४२, २४४, ३०९. III. १९३.

वैद्यकरत्नमाला — II. १०७.

शब्दार्णवः — II. १९, १२२, १३२, १८३, २२९, २३९, २८१, २८७, ३२१, ३२८, ३४१, ३८०. III. १९७, २३७, २७९.

शाकटायनसूत्रम् — II. ३०४.

शुभाङ्ककोशः — II. २४८.

शृङ्गारप्रकाशः — II. ७८, ३७०.

संसारावर्तः — II. ३२८. III. १९१

संहिता — II. ३२.

सुभाषितावलिः — II. १३०.

हरिवंशः — II. ७६. III. २१४.

हर्षचरितम् — II. २१७, २१५. III. २५४.

॥ श्रीः ॥

श्रीमदमरसिंहविरचितं

नामलिङ्गानुशासनं

क्षीरस्वामिप्रणीतया अमरकोशोद्घाटनाख्यया व्याख्यया

वन्द्यघटीयश्रीसर्वानन्दप्रणीतया टीकासर्वस्वाख्यया

व्याख्यया च समेतम् ।

द्वितीयं काण्डम् ।

अथ ब्रह्मवर्गः ।

सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ ।
वंशोऽन्ववायः सन्तानः

क्षीर० — सन्तन्यतेऽनया सन्ततिः । गूयते, जन्यते, कुल्यते, चानेन । अन्वीयतेऽन्वयः । वश्यते जन्यते[1] वंशः । अन्ववैत्यन्ववायः ॥

टीका० — सन्ततिनवकं वंशे । तनोतेः क्तिच् । सन्ततिः । गोत्रादयः प्राग्उक्ताः । एतिरन्ववपूर्वः । ततः 'एरच्' (३. ३ ५६) । अन्ववायः । कल्पवृक्षे सन्तान उक्तः ॥

---

१. 'वि' ख. पाठः.

वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥

क्षीर० — व्रियन्ते वर्ण्यन्ते वा वर्णाः ॥

टीका० — ब्राह्मणक्षत्रियवैश्यशूद्रा वर्णाः । 'वृ वरणे' । 'कृपृजृ—'(उ० २. १०) इत्यादिना नः ॥

विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृताः ।

क्षीर० — चत्वार एव वर्णाश्चातुर्वर्ण्यम् । स्वार्थे ष्यञ् ॥

राजबीजी राजवंश्यः

क्षीर० — राजबीजमस्यास्ति राजबीजी । राजवंशे साधुर्भवो वा राजवंश्यः ॥

टीका०—राजबीजिद्वयं राजवंशे । मत्वर्थ इनिः । राजबीजी । भवार्थे दिगादियति राजवंश्यः ॥

बीज्यस्तु कुलसम्भवः ॥ २ ॥

क्षीर० — बीजे साधुर्भवो वा । यथा सूर्यबीज्यो रामः । य(त्प्र?प्र)करणे 'अन्येभ्योऽपि दृश्यते' (५. २. १२०) ॥

टीका० — यस्यकस्यचित् कुले भूतो बीज्यः । 'यत्प्रकरणे अन्यत्रापि दृश्यते' इति यत् (?) ॥

महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।

क्षीर० — कुलस्यापत्यं कुलीनः । आरात् पापकेभ्यः कर्मभ्यो यात आर्यः । अरणीयो गम्यो वा । सभायां साधुः सभ्यः । संश्चासौ जनः सज्जं नयते वा सज्जनः । साध्नोति परकार्यं साधुः । आमुष्यायणोऽमुष्यपुत्रश्च ॥

टीका० — माहाकुलषट्कं **कुलीने** । महाकुलस्यापत्यं माहाकुलः । 'महाकुलादञ्खञौ' (४. १. १४१) । एवं वृद्धः । महत् कुलमस्येति बहुव्रीहौ अवृद्धोऽपि । अपत्यार्थे 'कुलात् खः' (२. १. १३९) । कुलीनः । आर्यो दीर्घादिः । अर्तेः 'ऋहलोर्ण्यत्' (४. १. १२४) । सभायां साधुरुपयुक्तः सभ्यः । 'सभाया यः' (४. ४. १०९) इति यः । साधेः 'कृवापाजि'—(उ० १. १) इत्यादिना उणि साधुः ॥

ब्रह्मचारी गृही वानप्रस्थो भिक्षुः

क्षीर० —

"ब्रह्म वेदो[1] ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम्[2]" ।

तच्चरत्यर्जयत्यवश्यं ब्रह्मचारी । 'व्रते' (३. २. ८०) णिनिः । वर्णी । गृही गृहस्थो गृहमेधी ज्येष्ठाश्रमी । प्रतिष्ठन्तेऽस्मिन् प्रस्थः । वनप्रस्थे भवो वानप्रस्थो वैखानसाख्यः । भिक्षते तच्छीलो भिक्षुर्यतिः । 'सनाशंसभिक्ष उः' (३. २. १६८) ॥

टीका० — ब्रह्मचारिचतुष्कं प्रत्येकं **स्वनामप्रसिद्धे** । वेदाध्ययनार्थं ब्रह्म व्रतं चरतीति ब्रह्मचारी । गृहं भार्या, तद्योगाद् गृही । द्वौ नान्तौ । वनप्रस्थे वनैकदेशे भवोऽवस्थाता वा वानप्रस्थः । शेषेऽण् । गृहीतकाषायदण्डो भिक्षुः । 'भिक्ष याच्ञायाम्' । 'सनाशंसभिक्ष उः' (३. २. १६८) ॥

चतुष्टये ॥ ३ ॥

आश्रमोऽस्त्री

क्षीर० — **अस्मिंश्चतुष्के आश्राम्यन्ति तपस्यन्त्यस्मिन्नित्याश्रमं प्रत्येकं वर्तते ॥**

टीका० — **ब्रह्मचार्यादिचतुष्टये** आश्रमः । 'श्रमु तपसि खेदे च' । 'हलश्च' (३. ३. १२१) इति घञ् । 'नोदात्तोपदेश—'(७. ३. ३४) इत्यादिना वृद्ध्यभावः ॥

---

१. 'दा' क. ग. घ. ङ. पाठः. २. 'म् । 'व्रते' णिनिः । ब्रह्मचारी व' क. पाठः.

द्विजात्यग्रजन्मभूदेवबाडवाः ।

विप्रश्च ब्राह्मणः

क्षीर० —

"मातुरग्रे विजननं द्वितीयं मौञ्जिबन्धनात्"

इति द्विजातिः । अग्रे आदौ अग्रान्मुखाद् वा जन्मास्याग्रजन्मा । यच्छ्रुतिः— 'ब्राह्मणोऽस्य मुखमासीत्' । वाडव इवातृप्तः । विशेषेण पूरयति विप्रो विपाति विपति वा । 'विप क्षेपे' । ब्रह्मणोऽपत्यं ब्राह्मणः ॥

टीका० — द्विजातिषट्कं **ब्राह्मणे** । देहोत्पत्तिसंस्कारोत्पत्तिलक्षणे द्वे जाती जन्मनी अस्येति द्विजातिः । जातिपरत्वाच्छब्दस्य 'जात्यन्ताच्छ बन्धुनि' (५. ४. ९) इति छो न भवति । ब्रह्मणो मुखे अग्रे जन्मास्येत्यग्रजन्मा । नान्तः । वडवा ब्राह्मणी । तथा च—

"बडवा कुम्भदास्यश्च स्त्रीविशेषो द्विजाङ्गना"

इति रभसः । तत्र भवा बाडवाः । शेषेऽण् । 'प्रा पूरणे' । 'आतश्चोपसर्गे' (३. १. १३६) । कः । विप्रः । ब्रह्मणोऽपत्यं ब्राह्मणः । 'तस्यापत्यम्' (४. १. ९२) इत्यण् ॥

असौ षट्कर्मा यागादिभिर्युतः ॥ ४ ॥

क्षीर० — षट् कर्माणि ब्राह्मणस्य । अध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्च ॥

टीका० —

"यजनं याजनं दानं विशिष्टाच्च प्रतिग्रहः ।
अध्यापनमध्ययनं विप्रकर्म प्रकीर्तितम् ॥"

इत्येतैः षड्भिर्युक्ते विप्रे षट्कर्मा ॥

विद्वान् विपश्चिद् दोषज्ञः सन् सुधीः कोविदो बुधः ।
धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः ॥ ५ ॥
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।

क्षीर० — वेत्ति विद्वान् । 'विदेः शतुर्वसुः' (७. १. ३६) । विपश्यंश्चेतयते विपश्चित् । दोषाज् जानाति ज्ञात्वा जह्यादिति दोषज्ञः ।

सन् विद्यमानः, उत्तम इत्यर्थः। अन्ये सत्कल्पाः। सुध्यायति सुधीः। 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति क्विप् सम्प्रसारणं च। ओकः स्थानं वेत्ति कोविदः, 'कुङ् शब्दे' अस्माद् वा। धियमीरयति धीरः। मनस ईष्टे मनीषास्त्यस्य वा मनीषी। जानातीति ज्ञः। 'इगुपध–' (३. १. १३५) इति कः। प्रज्ञ एव प्राज्ञः। 'प्रज्ञादिभ्यश्च' (५. ४. ३८) इत्यण्। प्रज्ञास्त्यस्य वा। 'प्रज्ञाश्रद्धा—' (५. २. १०१) इति णः। सम्यक् ख्यानं ज्ञानमस्य सङ्ख्यावान्। सङ्ख्या विचारणा वा। पण्डते विजानाति पण्डितः। 'पडि गतौ'। सर्वे गत्यर्था ज्ञानार्था इति पण्डा धीः सञ्जातास्य वा। कवते वर्णयति कविः। कवितापि। सुवति सूरिः। कृतमस्यास्ति कृती कृतकृत्यः। कर्षति विविक्ते कृष्टिः। लब्धं वर्णनं प्रसिद्धिर्येन लब्धवर्णः। विचष्टे विचक्षणः॥

दूरदर्शी दीर्घदर्शी

क्षीर०— अप्रत्यक्षमूहत इत्यर्थः॥

टीका०— विद्वदादिद्वार्विंशकं पण्डिते। 'विदेः शतुर्वसुः' (७. १. ३६) इति शत्रन्ताद् वस्वादेशविकल्पे विद्वान्। विप्रकृष्टं चिनोतीति विपश्चित्। पृषोदरादिः। शोभनं ध्यायतीति सुधीः। किन्नाम वेत्तीति कोविदः। पृषोदरादिः। बुधज्ञयोरिगुपधलक्षणः कः। बुधो ज्ञश्च। व्रीह्यादित्वादिनिः। मनीषी। प्रज्ञायोगात् प्राज्ञः। 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१) इति मत्वर्थे णः। सङ्ख्या विचारणा, तद्वान् सङ्ख्यावान्। पण्डा बुद्धिर्जातास्मिन्निति पण्डितः। तारकादित्वादितच्। 'षूङ् प्राणिप्रसवे'। 'षूङः क्रिः' (उ० ४. ६९)। सूरिः, दन्त्यादिः। अभिधानमालायामिन्नन्तोऽपि सूरी। कृतं ज्ञातमनेनेति कृती। 'इष्टादिभ्यश्च' (५. २. ८८) इतीनिः। कर्षति निष्कर्षतीति कृष्टिः। बाहुलकः क्तिन्। 'अन्येभ्योऽपि दृश्यते' इति वा क्तिन्। 'स्त्र्याकर्षे ना बुधे कृष्टिः' इति रुद्रः। लब्धो वर्णः स्तुतिर्येन स लब्धवर्णः। विचक्षण इति 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति कर्तरि युच्। 'असनयोश्च प्रतिषेधो वक्तव्यः'(वा० २. ४. ५४) इति चक्षिङः ख्याञादेशप्रतिषेधः। देशकालविप्रकृष्टानर्थान् यो बुद्ध्या पश्यति, तत्र दूरदर्शिद्वयमिति केचित्॥

---

१. 'शतिकं' अ, पाठः.

श्रोत्रियच्छान्दसौ समौ ॥ ६ ॥

क्षीर० — 'श्रोत्रियंश्छन्दोऽधीते' (५. २. ८४)। श्रोत्राभ्यां कृतकर्मेति । छन्दोऽधीते छान्दसः ।

"मीमांसको जैमिनीयो वेदान्ती ब्रह्मवादिनि ।
वैशेषिकः स्यादौलूक्यः सौगतः शून्यवादिनि ।
नैयायिकस्त्वाक्षपादः स्यात् स्याद्वादिक आर्हतः ।
चार्वाकलोकायतिकौ सत्कार्यौ साङ्ख्यकापिलौ" ॥

टीका० — छन्दोध्येतरि श्रोत्रियद्वयम् । छन्दोऽधीत इति श्रोत्रियः । 'श्रोत्रियंश्छन्दोऽधीते (५. २. ८४) इति श्रोत्रियन्निपात्यते छन्दोऽधीत इत्येतस्मिन्नर्थे । नकारः स्वरार्थः । छन्दश्शब्दस्य वा श्रोत्रभावो घन्प्रत्ययश्च । 'तदधीते तद् वेद' (४. २. ५९) इत्यणि छान्दसः ॥

उपाध्यायोऽध्यापकः

क्षीर० — उपेत्याधीयतेऽस्मादुपाध्यायः । 'इङश्च' (३. ३. २१) इति घञ् ॥

टीका० — वेदादिपाठयितर्युपाध्यायद्वयम् । उपेत्याधीयतेऽस्मादित्युपाध्यायः । 'इङश्च' (३. ३. २१) इति घञ् ॥

अथ स्यान्निषेकादिकृद् गुरुः ।

क्षीर० — गृणात्युपदिशति गुरुः । यन्मनुः —

"निषेकादीनि कर्माणि यः करोति यथाविधि ।
सम्भावयति चान्नेन स विप्रो गुरुरुच्यते" ॥

निषेको गर्भाधानविधिः । आदिशब्दात् पुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौडोपनयनादीनि ॥

टीका० — निषेको गर्भाधानं, तत्कारिणि पितरि गुरुः । गिरतेः 'कृग्रोरुच्च' (उ० १. २४) इति कुप्रत्ययः उकारश्चान्तादेशः । 'उरण् रपरः' (१. १. ५१) । आदिना सीमन्तोन्नयनादि ॥

मन्त्रव्याख्याकृदाचार्यः

क्षीर० — आचरणीयः सेव्य आचार्यः । आचारं ग्राहयतीति नैरुक्ताः । मन्त्रकृद् वेदाध्यापनात् । विशिष्टाख्याकृदुपनीय[1] द्विजत्वापादनात् । यदाह[2] —

"उपनीय तु यः शिष्यं वेदमध्यापयेद्[3] द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" ॥

टीका० — मन्त्रो वेदः, तस्योपनयनपूर्वकं प्रतिपादयिता आचार्यः ।

"उपनीय तु यः पूर्वं वेदमध्यापयेद् द्विजः ।
साङ्गं च सरहस्यं च तमाचार्यं विदुर्बुधाः ॥"

इति मनुः । अन्यत्रोपचारात् ॥

आदेष्टा त्वध्वरे व्रती ॥ ७ ॥

यष्टा च यजमानश्च[4]

क्षीर० — स्वाम्येनादिशत्यादेष्टा । आदिष्टीति पाठे आदिष्टमनेनेति इष्टादित्वादिनिः । क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानात् सप्तमी । व्रती सनियमः । यजते यजमानः । 'पूङ्यजोः शानन्' (३. २. १२८) ॥

टीका० — अध्वरे अध्वरविषये आदेष्टा अध्वरस्वामी, तत्र व्रतित्रिकम् । यजमानश्चेति चकारान्तः पाठः साधुः । तथा च रभसः —

"मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती ।
यष्टा च यजमानश्च याजको देवचारकः ॥
दीक्षितः सोमपीती"

इति । क्वचित् त्वन्तः पाठः । तदा च सोमयागयष्टरि यजमानदीक्षिताविति योजना ।

"सोमवत्यध्वरे यष्टा यजमानोऽपि[5] दीक्षितः"

---

१. 'नयनेन द्वि' ख. पाठः. २. 'हुः' ख. पाठः. ३. 'व्रः ।' ग. पाठः. ४. 'नोऽथ स्वा' ख. ग. पाठः. ५. 'थ' क. घ. पाठः.

इत्यमरमालापि । व्रतयोगाद् व्रती नान्तः । यजेः तृच् । यष्टा । 'पूङ्यजोः शानन्' (३. २. १२८) । यजमानः ॥

स सोमवति दीक्षितः ।

क्षीर० — स व्रती सोमवत्यध्वरे दीक्षिताख्यः दीक्षा सञ्जाता-स्येति । सोमवानग्निष्टोमादिः क्रतुः । यद् गौतमः — 'अग्निष्टोमोऽत्य-ग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सो-मसंस्थाः' ॥

टीका० — स यजमानः सोमवत्यध्वरे दीक्षिताख्यः । 'दीक्ष मौण्ड्ये-ज्योपनयनादौ' । क्तः ॥

इज्याशीलो यायजूकः

क्षीर० — यजनमिज्या । 'व्रजयजोर्भावे क्यप्' (३. ३. ९८) । अत्यर्थं यजते[३] तच्छीलो यायजूकः । 'यजजपदशां यङः' (३. २. १६६) इत्यूकः ॥

टीका० — पुनः पुनर्यागकरणशीलो यायजूकः । 'यजजपदशां यङः' (३. २. १६६) इति यङन्तादूकप्रत्ययः ॥

यज्वा तु विधिनेष्टवान् ॥ ८ ॥

क्षीर० — 'सुयजोर्ङ्वनिप्' (३. २. १०३) ॥

टीका० — विधिना यथाशास्त्रं निर्वर्तितयागो यज्वा ॥

स गीष्पतीष्ट्या स्थपतिः

क्षीर० — स यज्वा बृहस्पतिमेधेन हेतुना । स्थापयतीति स्थपतिः ॥

---

१. 'मः क' ख. पाठः. २. 'ति' क. ग. घ. ङ. पाठः.

टीका० — स यज्वा बृहस्पतिसवनाम्ना यागेनेष्टवान् स्थपतिः ॥

सोमपीथी तु सोमपः ।

क्षीर० — पानं पीथः । 'पातृतुदि —' (उ० २. ७) इति थक् । 'घुमास्था —' (६. ४. ६६) इतीत्त्वम् । सोमपीतीति प्राच्याः पेठुः । सर्वदाऽयं, दीक्षितस्तु तत्कालम् ॥

टीका० — सोमपीतिद्वयं सोमलतारसपायिनि । सोमः पीतोऽनेनेति 'इष्टादिभ्यश्च' (५. २. ८८) इतीनिः ॥

सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ॥ ९ ॥

क्षीर० — सर्वं विन्दत्यस्मात् सर्ववेदाः, असुन् ॥

टीका० — विश्वजिदादियागः सर्वस्वदक्षिणः, तद्याजी सर्ववेदाः, सर्वं सर्वस्वं वेदयति लम्भयति ऋत्विज इति । 'विदृल्ट् लाभे' । ण्यन्तादसुन् ॥

अनूचानः प्रवचने साङ्गेऽधीती

क्षीर० — अनूक्तवान् । 'उपेयिवाननाश्वाननूचानश्च' (३.२.१०९) इति कानचि साधुः । प्रोच्यते प्रवचनं वेदः । अधीतमनेनाधीती । इष्टादित्वादिनिः । 'क्तस्येन्विषयस्य —'(वा० २. ३. ३६) इति सप्तमी ॥

टीका० — प्रवचने वेदे सशिक्षाद्यङ्गषट्के कृताध्ययने अनूचानः । 'उपेयिवाननाश्वाननूचानश्च' (३. २. १०९) इति निपातितः । प्रवचन इति 'क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्' (वा० २. ३. ३६) इति सप्तमी ॥

गुरोस्तु यः ।

लब्धानुज्ञः समावृत्तः

क्षीर० — अधीत्य गुर्वाज्ञया गुरुगृहाद् यः समावर्तते स समावृत्तः स्नातकाख्यः ।

"गुरुगेहादनावृत्तः स्नातको हि न कथ्यते" ॥

टीका०—अधीतवेदो गृहमावस्तुं गुरोः सकाशाद् गृहीतानुज्ञः समावृत्तः। वृतेः क्तः ॥

सुत्वा त्वभिषवे कृते ॥ १० ॥

क्षीर०—सुनोति सुत्वा । 'सुयजोर्ङ्वनिप्' (३. २. १०३)। अभिषवः सोमकुट्टनसन्धानम् ॥

टीका०—अभिषवः स्नानमात्रं प्रस्तावाद् यागसम्बन्धिस्नानं यः कृतवान्, स सुत्वा । नान्तः । 'सुयजोर्ङ्वनिप्' (३. २. १०३) ॥

छात्रान्तेवासिनौ शिष्ये

क्षीर०—छत्रमिव शीलमस्य छात्रः । 'छत्रादिभ्यो णः'(४. ४. ६२)। छत्रेण गुरुसेवा लक्ष्यते । गुरोरन्ते वसत्यवश्यमन्तेवासी । 'शयवासवासिषु—'(६. ३. १८) इति सप्तम्या अलुक् । शासनीयः शिष्यः ॥

टीका०—छात्रद्वयं शिष्ये । गुरुच्छिद्रावरणशीलश्छात्रः । 'छत्रादिभ्यो णः' (४. ४. ६२) । अन्ते समीपे वस्तुं शीलमस्येत्यन्तेवासी । ताच्छीलिको णिनिः । 'शयवासवासिष्वकालाद्' (६. ३. १८) इति सप्तम्यलुग्विकल्पे अन्तेवासी च । प्रत्ययान्तरविषयश्चायं धातुः । तथा च भारविः—'वसन्निवान्ते विनयेन जिष्णुः'(स०३. श्लो० २४) इति। वसिसमानार्थधातुप्रयोगोऽप्यस्मिन् दृश्यते। तथा च— 'मृगास्तमुपासते गुरुमिवान्तसदः' इति । 'शासु अनुशिष्टौ' । 'एतिस्तुशास्वृदृजुषः क्यप्' (३. १. १०९)। 'शास इदङ्हलोः'(६. ४. ४४) इतीत्वम् । 'शासिवसिघसीनां च' (८. ३. ६०) इति षत्वम् । शिष्यः ॥

शैक्षाः प्राथमकल्पिकाः ।

क्षीर०—शिक्षायां भवाः शैक्षाः । प्रथमकल्प आद्यारम्भः प्रयोजनमेषां प्राथमकल्पिकाः ॥

---

१. 'मी' क. ख. ङ. च. छ. पाठः. २. 'ते' क. ख. पाठः.

टीका०—प्रथमवेदपाठके शैक्षद्वयम् । शिक्षासाहचर्याद् ग्रन्थोऽपि शिक्षा । 'तदधीते—'(४. २. ५९) इत्यण् । प्रथमकल्पं प्रथमशिक्षणीयमधीयत इति प्राथमकल्पिकाः । उक्थादित्वाट्ठक् ॥

एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ ११ ॥

क्षीर०—तुल्यवेदास्तुल्यव्रतास्तुल्याचाराश्चान्योन्यं समानं ब्रह्म चरन्ति सब्रह्मचारिणः ।

"ब्रह्म वेदो ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम्"

इति । एकस्मिन् वेदे व्रतमाचरन्ति वा । 'व्रते'(३. २. ८०) इति णिनिः । 'चरणे ब्रह्मचारिणि' (६. ३. ८६) इति समानस्य सभावः ॥

टीका०—एकस्माद् गुरोरेकं वेदमध्येतुमेकं ब्रह्म व्रतमाचरन्तोऽन्योन्यं सब्रह्मचारिण इत्युच्यन्ते । ब्रह्म वेदस्तदध्ययनार्थं व्रतमपि ब्रह्म । समानं ब्रह्मचरन्तीति सब्रह्मचारिणः । 'व्रते' (३. २. ८०) इति णिनिः । 'चरणे ब्रह्मचारिणि' (६. ३. ८६) इति सभावः ॥

सतीर्थ्यास्त्वेकगुरवः

क्षीर०—'समानतीर्थे वासी' (४. ४. १०७) इति यत् । 'तीर्थे ये' (६. ३. ८७) इति सत्वम् । तरन्त्यनेन विद्यां तीर्थं गुरुः ॥

टीका०—एकगुरुका वेदविषयेऽन्यविषये च सतीर्थ्याः । पावनहेतुत्वात् तीर्थमिव तीर्थं गुरुः । 'समानतीर्थे वासी' (४. ४. १०७) इति यः । 'तीर्थे ये' (६. ३. ८७) इति सभावः ॥

चितवानग्निमग्निचित् ।

क्षीर०—आहिताग्निः । 'अग्नौ चेः' (३. २. ९१)। किप् ॥

टीका०—चिताग्निर्द्विजोऽग्निचित् । 'अग्नौ चेः' (३. २. ९१) इति किप् ॥

पारम्पर्योपदेशः स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥

क्षीर० — इत्येवं किलेति मुखपारम्पर्यमितिह । ततः स्वार्थे पक्षे 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) ॥

टीका० — उपदेशपरम्परायामैतिह्यद्वयम् । अस्मिन् वृक्षे यक्षोऽस्तीत्युदाहरणम् । इतिहशब्दोऽव्ययसमुदायः । ततः स्वार्थे 'अनन्तावसथेतिहभेषजाञ्ञ्यः' (५. ४. २३) ॥

उपज्ञा ज्ञानमाद्यं स्याद्

क्षीर० — उपज्ञायत इत्युपज्ञा, इदंप्रथमतया ज्ञानम् । चन्द्रस्योपज्ञा चन्द्रोपज्ञं व्याकरणम् ॥

टीका० — विनोपदेशेन ज्ञानमुपज्ञा । यथा वाल्मीकेः श्लोकज्ञानम् ॥

ज्ञात्वारम्भ उपक्रमः ।

क्षीर० — उपज्ञाय आरम्भणमुपक्रमः । यत् कात्यः—'यस्मात् प्रवृत्त आरम्भः स उपक्रमः'[1]। नन्दस्योपक्रमः । नन्दोपक्रमाणि मानानि । 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' (२. ४. २१) इति नपुंसकत्वम् ॥

टीका० — एतदित्थं सिध्यतीत्युपायज्ञानपूर्वक आरम्भ उपक्रमः ॥

यज्ञः सवोऽध्वरो यागः सप्तनन्तुर्मखः क्रतुः ॥ १३ ॥

क्षीर० — इज्यते यज्ञः । 'यजयाच —'(३. ३. ९०) इति नङ् । सूयते सोमोऽस्मिन् सवः । अध्वानं रात्यध्वरः । न ध्वरति वा । 'ध्वृ हूर्छने' । सप्तभिश्छन्दोभिस्तन्यत इति सप्तनन्तुः । मखति धर्मं मखः । क्रियते क्रतुः ॥

---

१. 'इसंज्ञकं क्या' ङ. पाठः २. 'मा', ३. 'ने । सप्तनन्तुः । 'सप्तभि', ४. 'ति । म' ख. पाठः.

टीका० — यज्ञसत्रके यागे । 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (३. ३. ९०) । यज्ञः । सुनोतेः 'ऋदोरप्' (३. ३. ५७) । सवः । स्वस्सम्बन्धिनमध्वानं रातीत्यध्वरः । मखिर्गत्यर्थः । दण्डकम् । अच् । मखः । 'सोमयागेष्वेव क्रतुशब्दोऽन्यत्रोपचारादि'ति जयादित्यः ॥

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः ॥ १४ ॥

क्षीर० — स्वाध्यायो ब्रह्मयज्ञः, होमो देवयज्ञः, नृयज्ञोऽतिथिपूजनं, तर्पणं श्राद्धाख्यं पितृयज्ञः, बलिर्भूतयज्ञः । यन्मनुः —

"स्वाध्यायो[1] ब्रह्मयज्ञः स्यात् पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्" ॥

टीका० — एतैः पाठादिभिः पञ्चभिर्ब्रह्मयज्ञादिनामकैः पञ्च महायज्ञाः स्युः । सपर्या पूजा ।

"स्वाध्यायो ब्रह्मयज्ञः स्यात् पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इति स्मृतिः ॥

समज्या परिषद् गोष्ठी सभासमितिसंसदः ।
आस्थानी क्लीब आस्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥

क्षीर० — समर्जन्ति मिलन्त्यस्यां समज्या । 'संज्ञायां समज —' (३. ३. ९९) इति क्यप् । परिसीदन्त्यस्यां परिषत्[2] । पर्षच्च । गावो नानोक्तयस्तिष्ठन्त्यस्यां गोष्ठी । सह भान्त्यस्यां सभा । संयन्त्यस्यां समितिः । संसीदन्त्यस्यां संसत् । आतिष्ठन्त्यस्यामास्थानी । सीदन्त्यस्मिन् सदः । असुन् ॥

---

१. 'य' ग. पाठः. २. 'यः स्यात् । अध्यापनं ब्रह्मयज्ञः पि' ख. पाठः. ३. 'अध्ययन ब्रह्मयज्ञः पि' ख. ४. ख ग. ट. पाठः. ४. 'ञ', ५. 'त् । गा', ६. 'आपति' ख. पाठः.

टीका० — समज्यानवकं **सभासामान्ये** । कीर्त्तौ समज्योक्ता । परितः सीदन्त्यस्यामिति परिषत् । सम्पदादिः । 'सदिरप्रतेः' (८. ३. ६६) इति षत्वम् ।

"आस्थानं संसदास्थानी परिषत्पर्षदौ समे"

इति रभसः । गावः कथास्तिष्ठन्त्यस्यामिति गोष्ठी । गोष्ठवत् सर्वम् । सद्भिर्भातीति सभा । भया दीप्त्या सह वर्तत इति वा । संयन्ति मिलन्त्यस्यामिति समितिः । बाहुलकः क्तिन् । अकर्तरि च कारके वा । सम्पदादिक्विपि संसद् दान्ता । आगत्य तिष्ठन्त्यस्यामित्यास्थानी । आस्थानं च । अधिकरणे ल्युट् । सीदन्त्यस्यामिति सदः । असुन् । स्त्रियां सदाः सदसौ सदसः ॥

प्राग्वंशः प्राग्घविर्गेहात्

क्षीर० — वंशः कुलं स्थूणा वा । प्राग् वंशोऽत्र **प्राग्वंशः** पत्नी[1]शालाख्यः । **प्राग्घविर्गेहाद्**[2] अग्निशालाया आद्यो भागः ॥

टीका० — यत्र गृहे हव्यादिकं स्थाप्यते ततः पूर्वं सदस्यादीनां गृहं प्राग्वंशः ॥

सदस्या विधिदर्शिनः ।

क्षीर० — सदसि साधव ऊनाधिकजागरूका ऋत्विग्भेदाः **सदस्याः** ॥

टीका० — विधेर्न्यूनातिरिक्तानिरीक्षणतत्परे सदस्यद्वयम् । सदसि साधुरुपकारकः सदस्यः । 'तत्र साधुः' (४. ४. ९८) इति यत् ॥

सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते ॥ १६ ॥

क्षीर० — सभायां सीदन्ति **सभासदः** । **सभां स्तृण्वन्ति सभास्ताराः** । समाजं समवयन्ति **सामाजिकाः** । 'समवायान् समवैति' (४. ४.

---

१. 'त्ति' घ. पाठः. २. 'त् पत्नीशालाख्यात् । अ' ख. घ. ङ. पाठः.

४३) इति ठक् । पारिषद्याः पारिषदाः सभाशूराश्च ॥

टीका० — सभासदादिचतुष्कं **सभाया आरम्भके** । सम्पदादिक्विपि सभासत् । सभां स्तृणन्ति छादयन्तीति सभास्तारः । 'कर्मण्यण्' (३. २. १)। सदस्यवत् सभ्यः । 'समवायान् समवैति (४. ४. ४३) इति समजशब्दाट्ठकि सामाजिकः ॥

अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ।

क्षीर० — ऋत्विज इत्येव । अध्वरं याति न ध्वरति वा अध्वर्युर्नाम ऋत्विक् । स यजुर्वित् कठः स्यात् । उद्गायक उद्गाता छन्दोगः स्यात् । होता बह्वृचः स्यात् ॥

टीका० — अध्वर्युत्रयं यथाक्रमं **यजुर्वेदादिवेदिषु** । अध्वरमिच्छतीत्यध्वर्युः । 'क्याच्छन्दसि' (३. २. १७०) इत्युः । 'कव्यध्वरपृतनस्यर्चि लोपः' (७. ४. ३९) इति 'अलोन्त्यस्य' (१. १. ५२) इति नियमेन रेफात् परस्याकारस्य लोपः । तृचि उद्गाता । होतेति 'तृन्विधावृत्विक्षु चानुपसर्गस्येति वक्तव्यम्' (वा० ३. २. १३९) इति तृन् ॥

आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥ १७ ॥

क्षीर० — अग्नीनिन्धेऽग्नीत् । तस्य शरणमाग्नीध्रः । 'अग्नीधः शरणे रण् भषत्वं च'(वा० ४. ३. १२०) इति रण् । आद्यशब्दात् पोतृप्रशास्तृब्राह्मणाच्छंस्यच्छावाकप्रावस्तुद्ब्रह्ममैत्रावरुणप्रतिप्रस्थातृप्रतिहर्तृनेष्टृनेतृसुब्रह्मण्याः । इत्थं ससदस्याः सप्तदश ऋत्विजः । 'एतिस्तुशास्वृ—' (३. १. १०९)इति वृञो ग्रहणाद् वृङो व्रियन्त इति वार्याः । 'ऋहलोर्ण्यत्' (३. १. १२४) । 'वृताः कुर्वन्ति ये यज्ञमृत्विजस्त' इति कात्यः । ऋतौ यजति । 'ऋत्विग्दधृग्—' (३. २. ५९) इति साधुः ॥

टीका० — आग्नीध्राद्याः षोडश यज्ञस्वामिना धनैर्वरणीया याजकादिद्वयवाच्याः । ते च ब्रह्मा, उद्गाता, होता, अध्वर्युः, ब्राह्मणाच्छंसी, प्रस्तोता, मैत्रावरुणः, प्रतिप्रस्थाता, पोता, प्रतिहर्ता, अच्छा-

वाकः, नेष्टा, आग्नीध्रः, सुब्रह्मण्यः, प्रावस्तुद्, उन्नेता चेति षोडश प्रकाराः । अग्निमिन्धयतीति रक् । आग्नीध्रः । वृणातेः ण्यति वार्याः । ऋत्विगादिसूत्रेण ऋत्विग् जान्तो निपातितः । ण्वुलि याजकाः ॥

वेदिः परिष्कृता भूमिः

क्षीर० — विदन्त्येनां वेदिः । परिष्कृता चातुरश्रेण[1] भूषिता । यागार्थं परिष्कृतां त्वाह[2] ॥

टीका० — यागार्थं संस्कृता भूमिर्वेदिः । ङीषि वेदी च ॥

समे स्थण्डिलचत्वरे ।

क्षीर० — तिष्ठन्त्यास्मिन् स्थण्डिलम् । चत्यते चत्वरम् । यागार्थं संस्कृता भूः ॥

टीका० — यागार्थं संस्कृतभूमौ स्थण्डिलद्वयम् । प्राङ्गणे चत्वरमुक्तम् ॥

चषालो यूपकटकः

क्षीर० — तक्ष्णा कारितो यूपाग्रे कटकाकृतिः । चष्यत उत्कीर्यत इति चषालः ॥

टीक० — खादिरादिकं पशुबन्धनकाष्ठं यूपः । तन्मूर्ध्नि काष्ठमयो डमरुकाकृतिश्चषालः । 'चष भक्षणे' । मूर्धन्यषः । 'सानसिवर्णसितण्डुलाङ्कुशचषालेल्वलपल्वल—' (उ० ४. १०९) इत्यादिना आलः । अर्धर्चगणपठितत्वात् ङीबेऽपि ॥

कुम्बा सुगहना वृतिः ॥ १८ ॥

क्षीर०— 'कुबि आच्छादने' । 'चिन्तिपूजि —' (३. ३. १०८) इत्यङ् । व्रियतेऽनया वृतिः । यज्ञवाटे वेणिका ॥

---

१. 'चतुरश्रेण', २. 'चा' ग. पाठः. ३. 'र्णसिपर्ण' ब. पाठः. ४. 'व' क. ग. ङ. पाठः.

टीका० — यागभूमौ वृतिर्वेष्टनिका या सा कुम्बा । 'कुबिच्छादने' चुरादिणिच् । 'चिन्तिपूजिकथिकुबिचर्चश्च' (३. ३. १०५) इत्यङ् ॥

यूपाग्रे तर्म

क्षीर० — तरत्यनेन यूपं तर्म ॥

टीका० — यूपाग्रे तर्म । तरतेः मनिन् । वेदविदां तर्मेति पाठात् तँमेति पाठो लिपिदोषजः । 'उतृदिर् हिंसानादरयोः' । मनिन् ॥

निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।

क्षीर० — निर्मथनीयं दारु, यतोऽग्निर्जन्यते[1] । इयर्त्यग्निर्यतः सोऽरणिः ॥

टीका० — यत् काष्ठं काष्ठान्तरेणाग्न्युत्पादनार्थं घृष्यते सा अरणिः । अर्तेः अशनिवद् अनिः ॥

दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

क्षीर० — दक्षिणेऽग्निर्दक्षिणाग्निः । गृहपतिना संयुक्तो गार्हपत्यः । 'गृहपतिना संयुक्ते ञ्यः' (४. ४. ९०) । आहोतव्य आहवनीयः ॥

टीका० — दक्षिणाग्नित्रयं पृथक् पृथक् स्वनामप्रसिद्धेऽग्नित्रये । दक्षिणोऽग्निर्दक्षिणाग्निः । 'गृहपतिना संयुक्ते ञ्यः' (४. ४. ९०) इति ञ्यः । गार्हपत्यः । अनीयरि आहवनीयः ॥

अग्नित्रयमिदं त्रेता

क्षीर० — त्रीणि इतां प्राप्ता त्रेता । पृषोदरादित्वादेत्वम् ॥

टीका० — इदं श्रौताग्नित्रयमेकोक्त्या त्रेतोच्यते । त्राणं त्राः सह सन्धुक्षणम् । त्राम् इता प्राप्ता त्रेता स्त्रियाम् ॥

१. 'तदेममीति' ख. ग. पाठः. २. 'दानयोः' ख. पाठः. ३. 'तां निर्मथ्य जन्य' ख. घ. पाठः. ४. 'कृ' ख. पाठः. ५. 'ता त्रे' ख. पाठः

प्रणीतः संस्कृतोऽनलः ।

क्षीर० — प्रणयनं मन्त्रादिना संस्कारैः प्रादुष्करणम् ॥

टीका० — मन्त्रेण संस्कृतोऽग्निः प्रणीतः ॥

समूह्यपरिचाय्योपचाय्या अग्नौ प्रयोगिणः ॥ २० ॥

क्षीर० — 'अग्नौ परिचाय्योपचाय्यसमूह्याः' (३. १. १३१) इति निपात्यन्ते । समूह्यते ढौक्यत इत्यग्निः समूह्यः । परिचीयते परिचाय्यः । उपचीयते उपचाय्यः । इत्यग्निनामधेयानि प्रयोगविषयाणि ॥

टीका० — समूह्यादयस्त्रयो[२] यागवह्नौ । प्रयोगिणः, प्रयोक्तव्या इत्यर्थः । नान्यत्र, यज्ञादिविषये निपातनाद् 'अग्नौ परिचाय्योपचाय्यसमूह्याः' (३. १. १३१) इत्यनेन । 'ऊह वितर्के' । ण्यत् । समूह्यो दीर्घमध्यः । एवं परिपूर्वाच्चिनोतेर्ण्यदायादेशौ । परिचाय्यः । उपपूर्वादुपचाय्यः ॥

यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते ।
तस्मिन्नानाय्यः

क्षीर० — 'आनाय्योऽनित्ये' (३. १. १२७) इति साधुः । आनीयते आनाय्यः । प्रणीयते दक्षिणाग्नित्वेन संस्क्रियते[३] ॥

टीका० — उत्तरस्थाद् गार्हपत्याद् योऽग्निः प्रणीयते आरोप्यते स आनाय्यः । 'आनाय्योऽनित्ये' (३. १. १२७) इत्यनेनाङ्पूर्वान्नयतेः पूर्ववद् ण्यदायादेशौ । एतद(रुच्या?नित्यम्) ॥

अथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥

क्षीर० — 'वृषाकप्यग्निकुसित —' (४. १. ३७) इति ङीष्प्रसङ्गेणैत्वम् । सुष्ठ्वाहूयते स्वाहा, स्वाहास्त्यस्या वा ॥

टीका० — अग्नायीत्रयमग्निभार्यायाम् । अग्निशब्दाद् 'वृषाकप्यग्नि-

---

१. 'स्तन्त्यत' ग. घ. ङ. पाठः. २. 'यो व' ख. पाठः. ३. 'ते प्रणाय्यः ॥' ग. पाठः.

कुसितकुसिदानामुदात्तः' (४. १. ३७) इति ङीप् ऐकारश्चान्तादेशः। अम्मायी। सुष्ठु आह्वयन्ते देवा अनयेति स्वाहा। पृषोदरादिः॥

ऋक् सामिधेनी धाय्या च या स्यादग्निसमिन्धनी।

क्षीर० — **समिधामाधानी सामिधेनी। 'समिधामाधाने (षे)ण्यण्' (वा० ४. ३. १२०)। धीयतेऽनया धाय्या। 'पाय्यसान्नाय्य—'(३. १. १२९) इति साधुः॥**

टीका० — अग्निसमिन्धनेऽग्निज्वलने या ऋक् पठ्यते तत्र सामिधेनीद्वयम्। 'समिधामाधाने षेण्यण् वक्तव्यः' (वा० ४. ३. १२०) इति तस्येदमर्थे षेण्यण्। षित्त्वाद् ङीष्। 'हलस्तद्धितस्य' (६. ४. १५०) इति यलोपः। सामिधेनी। 'पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु' (३. १. १२९) इत्यनेन धाञो ण्यदायादेशाभ्यां धाय्या निपातिता॥

गायत्रीप्रमुखं छन्दः

क्षीर० — **गायन्तं त्रायते गायत्री। गायत्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतिशक्वर्यतीशक्वर्यष्टयत्यष्टिधृत्यतिधृतिकृतिप्रकृत्याकृतिविकृतिसङ्कृत्यभिकृत्युत्कृत्याख्यं षडक्षरादारभ्य षड्विंशत्यक्षरं यावत्। छन्दति छन्दोऽक्षरनियमात्मकं, गुरुलघुनियमात्मकं तु वृत्तं तनुमध्यादि॥**

टीका० — गायत्रीप्रमुखं **गायत्र्याद्यं** छन्दश्शब्दवाच्यम्। आदिनोष्णिगनुष्टुब्बृहतीपङ्क्त्यादीनां ग्रहणम्।

"कात् का हरेर्नृता कस्य मूर्धवर्गग्रहः कथम्।
ऋक्षन्निक्ष+चाष्टौ(?) स्युर्वर्णाः पादेष्वनुष्टुभि॥"

इति विदग्धे द्विरुकारवाननुष्टुब् भान्ता च। तत्र षडक्षरा गायत्री, ततो यथाक्रममेकैकाक्षरवृद्ध्या क्रमादुष्णिगादीनां पादाः। गायन्तं त्रायत इति गायत्री। गौरादिः। 'चदि आह्लादने'। 'चदेरादेश्च छः' (उ० ४. २२०) इत्यसुन् आदेश्च छः। छन्दः॥

---

१. 'क' ग. पाठः.

हव्यपाके चरुः पुमान् ॥ २२ ॥

क्षीर० — हव्यस्य पाको हव्यपाकः पक्वं होतव्यम् । चरुः चर्यते भक्ष्यत इति । स्थाल्यपि चरुः हव्यस्य पाकोऽत्रेति ॥

टीका० — देवार्थमन्नं हव्यम् । तस्य पाके स्थाल्यादौ चरुः । चरेर्मरुवद् उः ॥

आमिक्षा सा श्रुतोष्णे या क्षीरे स्याद् दधियोगतः ।

क्षीर० — पक्वे तप्ते च क्षीरे दधियोजनादामिक्षा[1] । 'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षे'ति श्रुतिः । आमीयते क्षिप्यते दध्यत्रेति ॥

टीका० — आवर्तिते तप्ते क्षीरे दधियोगाद् या जटिकाकारा जायते **सा** आमीक्षा[2] । आङ्पूर्वाद् 'मिह सेचने' इत्यतः 'मनेर्दीर्घश्च' (उ० ३. ६४) इति बाहुलकः सः, उपधाया दीर्घत्वं च । एवं दीर्घमध्येति पुरुषोत्तमः । 'मिष स्पर्धायामि'त्यत आङ्पूर्वात् 'स्तुत्रश्चिकृत्यृषिभ्यः कित्' (उ० ३. ६६) इति बाहुलकः सः । एवं ह्रस्वमध्येति गोवर्धनः ॥

धवित्रं व्यजनं तद् यद् रचितं मृगचर्मणा ॥ २३ ॥

क्षीर० — धूयतेऽग्निर्येनेति धवित्रम् । 'अर्तिलूधूसू—'(३. २. १८४) इतीत्रः ॥

टीका०—यागाय वह्निज्वलनार्थं **मृगचर्ममयं व्यजनं** धुवित्रम् । 'धू विधूनने' । 'अर्तिलूधूसूखनसहचर इत्रः' (३. २. १८४) इति करणे इत्रः । कुटादित्वाद् ङित्त्वेन गुणाभावादुवङि धुवित्रम् । केचित्तु आतिदेशिकङित्त्वस्यानित्यत्वाद् गुण एव, नोवङ् इति मन्यन्ते ॥

पृषदाज्यं सदध्याज्ये

---

१. 'ना', २. 'क्षा । वै', ३. 'मि' अ. पाठः.

क्षीर० — पृषद्भिर्दधिबिन्दुभिः सहितमाज्यम् ॥

टीका० — दधिसहित आज्ये पृषदाज्यम्। कर्मधारयसमासः ॥

परमान्नं तु पायसम्।

क्षीर० — पयसि संस्कृतं पायसम् ॥

टीका० — **पायसे** परमान्नद्वयम्। पयसि संस्कृतं पायसम्। 'संस्कृतं मक्षाः' (४. २. १६) इत्यण् ॥

हव्यकव्ये दैवपित्र्ये अन्ने

क्षीर० — अग्निमुखेभ्यो देवेभ्योऽन्नं हव्यम्। पितृभ्यः कव्यम्। उभयमुभयत्रेति श्रुतिज्ञाः ॥

टीका० — यथाक्रमं दैवेऽन्ने हव्यं पैत्रे कव्यम्। 'हु दानादानयोः'। 'अचो यत्' (३. १. ९७)। 'वान्तो यि प्रत्यये' (६. १. ७९) इति वान्तादेशः। 'कु शब्दे'। पूर्ववत् कव्यम् ॥

पात्रं स्रुवादिकम् ॥ २४ ॥

क्षीर० — पिबत्यस्मात् पात्रम्। आदिशब्दात् स्रुगादि ॥

टीका० — स्रुवादिकं यज्ञपात्रम्। पातेस्रन्, पात्रम्। आदिना चमसादि ॥

ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः।

क्षीर० — ध्रुवति ध्रुवा। उपभ्रियत उपभृत्। हूयतेऽनया जुहूः। एते स्रुचो विशेषाः स्त्रीलिङ्गाः। स्रवत्यैस्मात् स्रुवः स्रुग्विशेषः पुल्लिङ्गः ॥

टीका० — स्रुचः स्त्रियाः स्त्रीलिङ्गाया ध्रुवादयश्चत्वारो भेदाः। क्वचित् स्रुचः स्त्रिय इति पाठः। अस्यार्थः, स्रुचो भेदाध्रुवादयः, ते च स्त्रियः स्त्रीलिङ्गाः।

---

१. 'चो भेदाः स्त्री', २. 'त्य' क. ग. ङ. पाठः.

स्रुवस्तु विशेषविधिनैव पुमानुक्तः । ध्रुव उक्तः, ततष्टाप् । उपपूर्वाद् भृञः क्विप्, उपभृत् । 'हुवः श्नुवच्च' (उ० २. ६३) इति क्विप्, दीर्घत्वं श्नुवच्च । 'श्लौ' (६. १. १०) इति द्विर्वचनम्, 'कुहोः —' (७. ४. ६२) इति चुत्वादि, जुहूः । 'स्रु गतौ' । 'स्रुवः †कन्' (उ० २. ६४) इति कन् । उवङ्, स्रुवः । 'चिक् च' (उ० २. ६५) इति[१] स्रुवश्चिक्प्रत्ययः इकारककारावनुबन्धौ । 'चोः कुः' (८. २. ३०) कुत्वम् । स्रुक् । स्रिविधातोः क्विप् । 'ज्वरत्वर—' (६. ४. २०) इत्यूठि सूरित्यपि भ्रूशब्दसमाना बोद्धव्या ॥

उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥

क्षीर० — उपामन्त्र्य क्रियते हन्यते स्मोपाकृतः ॥

टीका० — मन्त्रेण पवित्रीकृत्य शस्त्रहतमात्रे पशावुपाकृतः । 'कृञ् हिंसायाम्' । स्वादिः । क्तः । 'यद्युपाकृतः पशुः पलायेदि'ति जीवत्यपि ताडितमात्रेऽपि ॥

परम्पराकं शमनं प्रोक्षणं तत्र यो वधः ।

क्षीर० — [२]परं परमकति परम्पराकम् । शसनमिति तु युक्तः पाठः । 'शसु हिंसायाम्' । प्रोक्षणं लक्षणंया वधः, प्रोक्ष्य हि यज्ञे पशुर्हन्यते ॥

टीका० — परम्पराकत्रयं यागार्थपशुहनने । शमेर्ल्युट् । शमनम् । 'उक्ष सेचने' । ल्युट् । प्रोक्षणम् ॥

वाच्यलिङ्गाः प्रमीतोपसम्पन्नप्रोक्षिता हते ॥ २६ ॥

क्षीर० — यज्ञ इति शेषः । 'मीङ् हिंसायाम्' । उपसम्पद्यत उपसम्पन्नः । प्रोक्ष्यतेऽम्भसेति प्रोक्षितः । प्रमीतादयोऽर्थवल्लिङ्गास्त्रयः शब्दा हते वर्तन्ते ॥

---

१. 'ति चिक्' ञ. पाठः. २. 'रस्पर' क. ग. घ. पाठः.

---

† 'कः' इति मुद्रितोणादिपाठः ।

टीका० — यागार्थं मारिते पश्वादौ प्रमीतत्रयम्। 'मीङ् हिंसायाम्'। क्तः। प्रमीतः। पदेः क्तः। उपसम्पन्नः॥

सान्नाय्यं हविः

क्षीर० — सन्नीयते। 'पाय्यसान्नाय्य—' (३. १. १२९) इति साधुः। हूयते हविः॥

टीका० — हविरित्यनेन दधिपयोरूपं हविर्ग्राह्यम्। तत्र सान्नाय्यम्। 'पाय्यसान्नाय्य —' (३. १. १२९) इत्यादिना संपूर्वान्नयतेर्ण्यदायादेशौ दीर्घत्वं च निपात्यते, ततः स्वार्थे(वा)ण्। हविरिति इसिप्रत्ययान्तं क्लीबे च॥

अग्नौ तु हुतं त्रिषु वषट्कृतम्।

क्षीर० — वषण्मन्त्रलिङ्गेन हुतं वषट्कृतम्। अर्थवल्लिङ्गम्॥

टीका० — अग्नौ हुते द्रव्ये वषट्कृतम्॥

दीक्षान्तोऽवभृथो यज्ञे

क्षीर० — अवभ्रियते पूर्यतेऽनेनावभृथः॥

टीका० — दीक्षान्तद्वयं प्रधानयागसमापको न्यूनाधिकदोषनिरासाय (यत्?यः) क्रियते तत्र। 'दीक्षान्तावभृथौ समौ' इति रभसः। प्रधानयागो दीक्षा, तस्यान्तो दीक्षान्तः। 'अवे भृञः' (उ० २. ३) इति क्थन्। अवभृथः॥

तत्कर्मार्हे तु यज्ञियम्॥ २७॥

त्रिषु

क्षीर० — यज्ञकर्मार्हति यज्ञियम्। 'यज्ञर्त्विग्भ्यां घखञौ' (५. १. ७१)। 'तत्कर्मार्हती'त्युपसङ्ख्यानात्॥

टीका० — यज्ञकर्मार्हे वस्तुनि यज्ञियम्। 'यज्ञर्त्विग्भ्यां घखञौ' (५. १. ७१) इति घः। तच्छब्देन यज्ञः परामृश्यते। स्त्रियां यज्ञिया भूमिः॥

अथ क्रतुकर्मेष्टं

क्षीर०—इज्यते स्मेष्टं यागादि । यदाह—

"एकाग्निकर्म हवनं त्रेतायां यच्च हूयते ।
अन्तर्वेद्यां च यद् दानमिष्टं तदभिधीयते" ॥

टीका०—क्रतुकर्म यत् तदिष्टम् । यजेः क्तः । वच्यादिसम्प्रसारणम् ॥

पूर्तं खातादिकर्मणि ।

क्षीर०—पिपर्ति पूर्तम् । 'न ध्याख्यापॄमूर्छिमदाम्' (८. २. ५७) इति निष्ठानत्वाभावः । खातं वाप्यादि । यदाह—

"वापीकूपतटाकानि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तं मर्त्याः प्रचक्षते ॥"

टीका०—खातं पुष्करिणी । आदिना देवकुलादि । एतत् पूर्ताख्यम् । तदुक्तं—

"पुष्करिण्यः सभा वापी देवस्यायतनानि च ।
आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेत् ॥"

इति । 'पॄ पालनपूरणयोः' । क्तः । 'उदोष्ठ्यपूर्वस्य' (७. १. १०२) इत्युत्वम् । 'हलि च' (८. २. ७७) इति दीर्घः । 'न ध्याख्यापॄमूर्छिमदाम्' (८. २. ५७) इति निष्ठानत्वप्रतिषेधः ॥

अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ २८ ॥

क्षीर०—न म्रियते न नश्यत्यमृतम् । यज्ञशिष्टमदनम् । विशिष्टमदनं विघसः । भुक्तशिष्टम् । 'उपसर्गेऽदः' (३. ३. ५९) इत्यप । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । यन्मनुः—

"विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः ।
विघसो भुक्तशिष्टं स्याद् यज्ञशिष्टमथामृतम्" ॥

टीका० — यथाक्रमं यज्ञशेषे दधिघृतादावमृतं, देवतातिथ्यादीनां भुक्तशेषे विघसः । दन्त्यसः । अमृतमुक्तम् । विपूर्वाददेः 'उपसर्गेऽदः' (३. ३. ५९) इत्यप् । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः ॥

त्यागो विहापितं दानमुत्सर्जनविसर्जने ।
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ २९ ॥

प्रदेशनं निर्वपणमपवर्जनमंहतिः ।

क्षीर०— स्वत उपसर्गवशाच्चैते दानार्थाः । स्पर्शनं तूपचाराद् दानं, पुच्छादौ[1] गवादिकं स्पृष्ट्वा हि दीयते । 'ओहाक् त्यागे' । 'श्रण दाने' । अंहतेऽहतिः । उपसर्गाद्यपि ॥

टीका० — त्यागत्रयोदशकं दाने । त्यजतेर्घञ् । त्यागः । विपूर्वाज्जहातेः स्वार्थे हेतुमण्णिच् । 'अर्तिह्री—' (७. ३. ३६) इत्यादिना पुगागमः । 'नपुंसके भावे क्तः' (३. ३. ११४) । 'निष्ठायां सेटि' (६. ४. ५२) इति णिलोपः । विहापितम् । दानादयस्तु 'डुदाञ् दाने' । 'सृज विसर्गे' । 'श्रण दाने' । तालव्यादिः । चुरादिः । 'तॄ प्लवनतरणयोः' । 'स्पृश संस्पर्शे' । 'पद गतौ' । णिच् । 'दिश अतिसर्जने' । 'डुवप् बीजतन्तुसन्ताने' । 'वृजी वर्जने' । एभ्यो ल्युट् । हन्ति दुर्निमित्तमंहतिः । 'हन्तेरंह च' (उ० ४. ६३) इत्यतिरंहादेशश्च ॥

मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदैहिकम् ॥ ३० ॥

क्षीर० — तदहे प्रेतदिने मृतमुद्दिश्य दानं पिण्डोदकादि । ऊर्ध्वं देहाद् भवमौर्ध्वदैहिकम् । 'ऊर्ध्वं दमाद् देहाच्च' (वा० ४. ३. ६०) इति ठञ् । अनुशतिकादित्वादुभयपदवृद्धिमाहुः ॥

टीका० — मृतार्थं यदहर्दानं मृताहःप्रभृति पिण्डादिदानं, तदौर्ध्वदैहिकम् । ऊर्ध्वदेहे भवमित्यर्थे 'ऊर्ध्वदेहाच्चेति वक्तव्यम्' (वा० ४. ३. ६०) इति ठञ्[2] । वकारवत्वादिकं नाट्योक्तावुक्तम् (!) ॥

---

१. 'दौ द्विपग' क. ग. घ. ङ. पाठः. २. 'ञ् । ना' ङ. छ. पाठः.

पितृदानं निवापः स्यात्

क्षीर० — पितृभ्यो दानम् । न्युप्यते निवापः ॥

टीका० — पितॄनुद्दिश्य जलाञ्जलि[1]दानं निवापः । 'ङुवप् बीजतन्तुसन्ताने' । घञ् । पितृग्रहणं मृतोपलक्षणार्थम् ॥

श्राद्धं तत्कर्म शास्त्रतः ।

क्षीर० — श्रद्धास्त्यस्य श्राद्धं पितृकर्म । 'प्रज्ञाश्रद्धा —' (५. २. १०१) इति णः ॥

टीका० — शास्त्रतः **कालपात्रादिनियमेन** पितृकर्म **ब्राह्मणभोजनादि** श्राद्धम् । श्रद्धा प्रयोजनमस्येति 'चूडादिभ्योऽण् वक्तव्यः' (वा० ५. १. ११०) इत्यण् ॥

अन्वाहार्यं मासिके

क्षीर० — अनु आहियते अन्वाहार्यम् अमावास्याश्राद्धम् ॥

टीका० — अन्वाहार्यद्वयं **मासिकश्राद्धे** । एतच्चान्द्रमानेन[2] प्रतिमासं क्रियमाणत्वात् पार्वणश्राद्धमुच्यते । अत्र च पिण्डान्वाहार्यकरणशब्दोऽपि वर्तते तथा च मनुः—

"पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्" ॥
(अध्या० ३. श्लो० १२२)

अन्वाङ्पूर्वात् हृञः 'ऋहलोर्ण्यत्' (३. १. १२४) । 'कालाट्ठञ्' (४. ३. ११) मासिकः ॥

अंशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् ॥ ३१ ॥

क्षीर० — कुं तपति सूर्योऽत्रेति कुतपो मध्याह्नापवृत्तेः[3] श्राद्धकालः । यत् स्मृतिः—

---

१. 'ल्यादिदा', २. 'त् पर्वमा' ज. पाठः, ३. 'त्तिः श्रा' क. ग. घ. ङ. पाठः.

"दिवसस्याष्टमे भागे मन्दीभवति भास्करे।
स कालः कुतपो यत्र पितृभ्यो दत्तमक्षयम्" ॥

टीका० — पञ्चदशांशीकृते दिने[1] मध्यवर्तिनि घटिकात्मके काले कुतपः। स्मृतौ —

"रौद्रः श्वेतश्च मैत्रश्च तथा शारभटः स्मृतः।
सावित्रो विजयश्चैव गान्धर्वः कुतप[2]स्तथा ॥
रौहिणेयो विरिञ्चश्च सौमो[3]ऽथ निर्ऋतिस्तथा।
माहेन्द्रो वरुणश्चैव भटः पञ्चदश स्मृताः" ॥

कुं महीं कात्स्न्र्येन तपतीति कुतपः ॥

पर्येषणा परीष्टिश्च

क्षीर० — **श्राद्धे द्विजशुश्रूषा। 'इषेरनिच्छार्थस्य युज् वक्तव्यः' (वा० ३. ३. १०७)। 'परेर्वा' (वा० ३. ३. १०७) ॥**

अन्वेषणा तु[4] गवेषणा।

क्षीर० — **'गवेष मार्गणे' ॥**

टीका० — पर्येषणाचतुष्क**मनुसरणे**। 'इषु गतौ'। 'परेर्वा' (वा० ३. ३. १९७) इति युच्। पर्येषणा। पक्षे क्तिन् परीष्टिः। 'इषेरनिच्छार्थस्य युज् वक्तव्यः' (वा० ३. ३. १०७) इत्यस्मादेव युच्। अन्वेषणा। 'गवेष मार्गणे'। णिच्। 'ण्यासश्रन्थो युच्' (३. ३. १०७)। गवेषणा ॥

सनिस्त्वध्येषणा

क्षीर० — **गुर्वादेः कचिदर्थप्रार्थनया नियोजनं सनिः। 'षणु दाने' ॥**

टीका० — **गुर्वादेराराध्यस्य सत्कारपूर्वं कचिदर्थे नियोजने सनि-**

---

१. 'न' ग. घ. च. पाठः. २. 'पः स्मृतः।', ३. 'य' ङ. पाठः. ४. 'च' ख. पाठः.

द्वयम्। 'षणु दाने'। 'धात्वादेः षः सः' (६. १. ६४)। *'सनिकषि —' (उ० ४. १४१) इत्यादिना इः। अन्वेषणावदध्येषणा॥

याच्ञाभिषस्तिर्याचनार्थना॥ ३२॥

क्षीर० — याचनं याच्ञा। 'यजयाच —' (३. ३. ९०) इति नङ्। 'ण्यासश्रन्थ—' (३. ३. १०७) इति बाहुलकाद् युच्। अभिषसनमभिषस्तिः। 'षस स्वप्ने'॥

टीका० — प्रार्थनामात्रे याच्ञाचतुष्कम्। 'यजयाच—' (३. ३. ९०) इत्यादिना नङ्। याच्ञा। 'शंसु स्तुतौ याचने च'। बाहुलकः क्तिन्। अभिशस्तिः। 'टुयाचृ याच्ञायाम्'। ल्युट्। याचना। 'अर्थ उपयाच्ञायाम्'। चुरादिः। 'ण्यासश्रन्थो युच्' (३. ३. १०७)। अर्थना॥

षट् तु त्रिषु

क्षीर० — आगन्त्वन्ताः षट् त्रिलिङ्गाः स्युरिति॥

टीका० — आगन्तुपर्यन्ताः परे त्रिषु॥

अर्घ्यमर्घार्थे

क्षीर० — वारिणीत्येव। 'पादार्घाभ्यां च' (५. ४. २५) इति यत्॥

टीका० — अर्घः पूजाविधिः। तदर्थे पुष्पदूर्वादावर्घ्यम्। 'पादार्घाभ्यां च' (५. ४. २५) इति यत्॥

पाद्यं पादाय वारिणि।

टीका० — अभ्यागतादेः पादप्रक्षालनाय दीयमानजले पाद्यम्। अर्घ्यवद् यत्॥

क्रमादातिथ्यातिथेये अवातिथ्यर्षेऽत्र साधुनि॥ ३३॥

---

* 'खनिकषि—' इति मुद्रितोणादिपाठः.

क्षीर०—अतिथये इदमातिथ्यम्। $'अतिथेर्ण्यः' (५. ४. २६)। अतिथौ साध्वातिथेयम्। 'पथ्यतिथि—' (४. ४. १०४) इति ढञ्। कात्यस्त्वाह—

"आवेशिकं विपश्चिद्भिरातिथ्यमभिधीयते" ॥

टीका०—अतिथ्यर्थे भक्तादौ अतिथौ साधुनि कर्मादौ यथाक्रममेकैकमातिथ्यद्वयम्। $'अतिथेर्ण्यः' (५. ४. २६) इति ण्यः। आतिथ्यम्। 'पथ्यतिथिवसातिस्वपतेर्ढञ्' (४. ४. १०४)। आतिथेयम्। स्त्रियामातिथेयी ॥

स्युरावेशिक आगन्तुरतिथिर्ना गृहागते।

क्षीर०—अवेशे अप्रतिवेशे भव आवेशिकः।

"नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा"

इति स्मृतेः। नास्ति तिथिरस्यातिथिः[१]। 'अत सातत्यगमने'। अतति सततं गच्छति वा। यत् स्मृतिः—

"अध्वनीनोऽतिथिः प्राघूर्णिकः प्राहुणिकः[२] स्मृतः।
आगते स्वगृहं तस्मिन्नभ्युत्थानं तु गौरवम्" ॥

टीका०—गृहादागते मानुषविशेषे आवेशिकत्रयम्। आवेशाद् गृहादागत इति 'तत आगत' (४. ३. ७४) इति ढञ्। सेतुवदागन्तुः।

"अनित्यं हि स्थितो यस्मात् तस्मादतिथिरुच्यते"

इति मनुः। 'अत सातत्यगमने'। 'ऋतन्यञ्जि—'(उ० ४. २) इत्यादिना इथिन्। अतिथिः। 'अतिथिर्द्वयोरि'ति त्रिकाण्डशेषः। स्त्रियामतिथी ॥

पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः ॥ ३४ ॥

क्षीर०—'नमोवरिवश्चित्रङः क्यच्' (३. १. १९) इति नमसः

---

१. 'थिः। अतति', २. 'कोऽपि च।' ख. पाठः.

$ 'अतिथेर्ञ्यः' इति मुद्रिताष्टाध्यायीपाठः।

पूजायां क्यच्। 'अ प्रत्ययात्' (३. ३. १०२)। अपचयनमपचितिः। 'अपचितश्च' (७. २. ३०) इत्यत्र[1] 'क्तिनि नित्यं चिभावोऽनिट्त्वं (च) वक्तव्यम्' इति। सपरे साधुः सपर्या, सह पर्यायेण क्रमेण वर्तते वा॥

टीका० — पूजाषट्कं **पूजायाम्**। पूजयतेः 'चिन्तिपूजि —' (३. ३. १०५) इत्यादिना अङ्। पूजा। नमःशब्दाद् 'नमोवरिवश्चित्रङः क्यच्' (३. १. १९), 'नमसः पूजायाम्' (वा० ३. १. १९) इति वचनात्। 'अ प्रत्ययात्' (३. ३. १०२) इत्यकारप्रत्ययः। नमस्या। 'चायृ पूजानिशामनयोः'। 'क्तिनि नित्यं चिभावो वक्तव्यः' (वा० ७. २. ३०)। अपचितिः। सपरशब्दस्य कण्ड्वादिपाठाद् यक्। सपर्या दन्त्यादिः। 'अर्च पूजायाम्'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। अर्चा। 'अर्ह पूजायाम्'। युच्। अर्हणा॥

वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्।

क्षीर० — **'वरिवसः परिचर्यायां' (वा० ३. १. १९)। क्यच्। शुश्रूषा गुरुसेवा लक्षणया[3] वृत्त्या। परिचरणं परिचर्या। 'परिचर्यापरिसर्यामृगयाटाट्यादीनामुपसङ्ख्यानम्' (वा० ३. ३. १०१)। 'परिचर्या तु पर्येष्टिरि'ति भागुरिः। परिव्रज्या तपस्या रुद्राङ्कुशो विशाखिका॥**

टीका० — वरिवस्याचतुष्कमुपासने। वरिवश्शब्दादव्ययाद् नमस्यावत् क्यजादिः। 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसङ्ख्यानम्' (३. ३. १०१) इत्यतः शप्रत्ययान्ता(त्?) परिचर्या निपात्यते। शृणोतेः सनन्तादप्रत्यये शुश्रूषा। आस्तेर्ल्युट्। उपासनम्॥

व्रज्याटाट्या पर्यटनं

---

१. 'चा', २. 'त्र चायेः क्ति', ३. 'या। प' ख. पाठः. ४. 'स' ख. ङ. छ. ट. पाठः. ५. 'तिता। शृ' ञ. पाठः.

क्षीर०—व्रजनं व्रज्या। 'व्रजयजोर्भावे क्यप्'। (३. ३. ९८)। कुटिलगमनमटाट्या। सूचिसूत्रिमूत्र्यव्यर्त्यशूर्णोतीनामुपसङ्ख्यानाद् यङन्तादप्रत्ययः। यन्मनुः—

"तौर्यत्रिकंमटाट्या च कामजो दशको गुणः"।

स्त्रीत्वं च नीवारवेन्येतिवत्(?)। एवं 'गदमदचर—' (३. १. १००) इति चर्या॥

टीका०—भिक्षाद्यर्थं सदाटने व्रज्यात्रयम्। 'व्रजयजोर्भावे क्यप्' (३. ३. ९८)। व्रज्या। परिचर्यावदटाट्या निपातिता। 'अटाट्या पर्यटनं भ्रमः' इति रत्नमाला॥

चर्या त्वीर्यापथस्थितिः॥ ३५॥

क्षीर०—ईर्यापथे ध्यानमौनादिके सुबोधमार्गाख्ये भिक्षुवृत्ते स्थितिरनुष्ठानम्। 'चर्या त्वीर्या विदुर्बुधाः' इति मुनिः॥

टीका०—यतीनां गतिस्थितिनिषद्याशयनीयानीर्यासंज्ञानि। तस्मिन्नीर्यावर्त्मनि रितिश्चर्या। 'गदमदचरयमश्चानुपसर्गे' (३. १. १००) इति भावे यत्॥

उपस्पर्शस्त्वाचमनम्

क्षीर०—उपस्पृश्यन्तेऽद्भिः खान्यत्रोपस्पर्शः। आचम्यतेऽम्भोऽत्राचमनम्॥

टीका०—उपस्पर्शद्वयमाचमने। 'चमु अदने'। ल्युट्। आचमनम्॥

अथ मौनमभाषणम्।

---

१. 'कं वृथाटाट्या का' ग. घ. ङ. पाठः. २. 'क' क. ग. घ. ङ. पाठः. ३. 'र्थे' ख. पाठः. ४. 'सम्यग् बो' ग. घ. ङ. पाठः.

क्षीर० —मुनेर्भावः कर्म वा मौनम् । 'इगन्ताच्च लघुपूर्वात्' (५. १. १३१) । अण् ॥*

टीका० —मौनद्वयं मौने । मुनेः कर्म मौनम् । 'इगन्ताच्च लघुपूर्वात्' (५. १. १३१) इत्यण् ॥

आनुपूर्वी स्त्रियां[1] वावृत्परिपाटी अनुक्रमः ॥ ३६ ॥
पर्यायश्च

क्षीर० —पूर्वानुक्रमेण[2]नानुपूर्व्यं, तस्य भाव आनुपूर्वी[3] । ष्यञः षित्त्वाद् वा स्त्रीत्वम् । आवर्तनमावृत् । सम्पदादिकिबन्तः । परिपाटनं परिपाटिः । इञ् । आवृत्परिपाट्योर्द्वन्द्वात् स्त्रीत्वम् । पर्ययणं पर्यायः । 'परावनुपात्यय इणः' (३. ३. ३८) इति घञ् ॥

टीका० —आनुपूर्वीपञ्चकमनुक्रमे । अनुपूर्वस्य भाव आनुपूर्वी । ष्यञ् । षित्त्वाद् ङीष् । 'हलस्तद्धितस्य' (६. ४. १५०) इति यलोपः । पक्षेऽभाषण-साहचर्यादानुपूर्व्यं योपधम् । नीवृदिवावृद् दीर्घादिः । 'अट पट गतौ' । घञ् । ङीषि परिपाटी । 'परावनुपात्यय इणः' (३. ३. ३८) इति घञ् । पर्यायः ॥

अतिपातस्तु विपर्यय[4] उपात्यय[5]यः ।

क्षीर०—विपर्ययः क्रमोल्लङ्घनम् । अतिक्रमश्च ॥

टीका० —अतिपातत्रयं व्यतिक्रमे । भावे घञ् । अतिपातः । एतेरेरचि पर्ययोपात्ययौ ॥

---

१. 'यामावृ' ख. घ. पाठः. २. 'मणमनु' ग. घ. ङ. पाठः. ३. 'दि । प' ख. पाठः. ४. 'स्यात् प', ५. 'यः । क' ख. पाठः.

---

* इतः परं—

"प्राचेतसस्त्वादिकविः स्यान्मैत्रावरुणिश्च सः ।
वाल्मीकिश्चाथ गाधेयो विश्वामित्रश्च कौशिकः ।
व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः ॥ "

इति व्याख्यास्पृष्टमर्धत्रयमधिकं दृश्यते ।

नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ॥ ३७ ॥

क्षीर०—व्रज्यतेऽन्नादि अत्रेति व्रतम्। उपवासादि कृच्छ्रचान्द्रायणादि पुण्यैकपर्यायम्। 'संज्ञायां कन्' (५. ३. ७५) ॥

टीका०—शास्त्रविहिते नियमे व्रतम्। तच्च व्रतमुपवासादिलक्षणं पुण्यकमुच्यते। आदिशब्दाद(क्षैः क्षा)रादि ॥

औपवस्त्रं तूपवासः

क्षीर०—उपवस्ता प्राप्तोऽस्यौपवस्त्रम्। 'उपवस्त्रादिभ्यः' इत्यण्। उपवस्तस्येदमौपवस्तमित्येके। 'वसु स्तम्भे'। क्तः। उपवस्तुरिदमन्नाद्यमिति (वा)। यत् स्मृतिः—

"माषान् मधु मसूरांश्च वर्जयेदौपवस्त्रके" ॥

टीका०—उपवस्तद्वयमुपवासे। 'वसु स्तम्भे'। क्तः। उपवस्तम् ॥

विवेकः पृथगात्मता।

क्षीर०—प्रकृतिपुरुषपृथग्ज्ञानं विवेकः। भावानां पृथक्स्वरूपत्वमित्येके। 'विचिर् पृथग्भावे' ॥

टीका०—प्रकृतिपुरुषयोर्विभागेन ज्ञानं विवेकः ॥

स्याद् ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिः

क्षीर०—ब्रह्मणस्तपःस्वाध्यायादेर्वर्चस्तेजो ब्रह्मवर्चसम्। 'ब्रह्महस्तिभ्यां वर्चसः' (५. ४. ७८) इत्यच् ॥

टीका०—वृत्तस्य वेदाध्ययनस्य या सम्पत्तिर्गुणोत्कर्षस्तद् ब्रह्मवर्चसम्। 'ब्रह्महस्तिभ्यां वर्चसः' (५. ४. ७८) इत्यच् समासान्तः ॥

अथाञ्जलिः ॥ ३८ ॥

---

१. 'य' क. पाठः. २. 'ण्यप' ख. पाठः. ३. 'का' ञ. पाठः. ४. 'र्षप्रभावस्त' ख. ञ. पाठः.

पाठे ब्रह्माञ्जलिः

क्षीर० — ब्रह्मणे वेदायाञ्जलिः ।

"संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः" ॥

टीका० — सामवेदपाठे योऽञ्जलिः स्वरविभागार्थं क्रियते, स ब्रह्माञ्जलिः ॥

पाठे विप्रुषो ब्रह्मबिन्दवः ।

क्षीर० — वेदपाठे आस्यनिर्गता जलकणा ब्रह्मबिन्दवः ॥

टीका० — वेदपाठे निस्सृताः श्लेष्मबिन्दवो ब्रह्मबिन्दव इत्युच्यन्ते ॥

ध्यानयोगासने ब्रह्मासनं

क्षीर० — ध्यानयोगयोरास्यतेऽनेनासनम् । ध्यानमेकाग्र्यतया चिन्तनम् । यथाह —

"तत्र प्रत्ययैकतानता ध्यानं, योगश्चित्तवृत्तिनिरोधः" ॥

टीका० — ध्यानयोगयोरासने ऊर्ध्वपादस्वस्तिकपद्मासनादौ ब्रह्मासनम् । निराकारज्ञानभावनं ध्यानं, साकारज्ञानभावनं योगः ॥

कल्पे विधिक्रमौ ॥ ३९ ॥

क्षीर० — कल्प्यते, विधीयते, क्रम्यते चानेन विनियोगशास्त्रेणेति ॥

टीका० — वादके विधाने कल्पत्रयम् । त्रयमपि प्रागेव साधितम् ॥

मुख्यः स्यात् प्रथमः कल्पः

क्षीर० — आद्यो विधिरित्यर्थः ॥

---

१. 'ग्रचि' ग. पाठः.

टीका० — शास्त्रविहितः प्रथमः कल्पो मुख्यः, यो व्रीह्यादियागः। मुखमिव मुख्यः। 'शाखादिभ्यो (यत्?यः) (५. ३. १०३)॥

अनुकल्पस्तु ततोऽधमः।

क्षीर० — मुख्याभावे प्रतिनिधिसंज्ञः॥

टीका० — तदभावे किञ्चिदधमे नीवारादौ यागेऽनुकल्पः॥

संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः॥ ४०॥

क्षीर० — उपाक्रियतेऽनेनेत्युपाकरणं, वेदपाठारम्भे विशिष्टो विधिः। 'रोहिण्यां छन्दांस्युपाकुर्याद्' इति हि श्रुतिः॥

टीका० — संस्कारो वटुकरणं, तत्पूर्वकं श्रुतेर्वेदस्य ग्रहणमुपाकरणम्॥

समे तु पादग्रहणमभिवादनमित्युभे।

क्षीर० —

"वामेन वामः स्पृष्टव्यो दक्षिणेन तु दक्षिणः"

इति पादोपसङ्ग्रहणम्[1]। अभिवादयते आशिषं कारयतेऽनेनाभिवादनम्[2]। अत एवाभिवाद्य उपसङ्ग्राह्यः॥

टीका० — पादग्रहणद्वयमभिवादने॥

भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी॥ ४१॥
तपस्वी तापसः पारिकाङ्क्षी

क्षीर० — भिक्षते भिक्षुः। 'सनाशंसभिक्ष उः' (३. २. १६८) परिवर्ज्यते सर्वं सन्न्यस्य व्रजति परिव्राट्। 'परौ व्रजेः षः पदान्ते' (उ० २. ६२) इति क्विप् षत्वं च। कर्मन्देन पाराशर्येण च प्रोक्तं भिक्षुसूत्रमधीते। 'कर्मन्दकृशाश्वादिनिः'। (४. ३. १११) 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४. ३. ११०)। णिनिः। मा कृषत कर्माणि

---

१. 'र्या' ख. पाठः. २. 'म्। अभिवादनम् अभि', ३. 'न। अत' ख. पाठः. ४. 'साकृतिक' ख. पाठः.

मुक्तिर्वेः[1] श्रेयसीति मस्करी । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) इति साधुः । तपोऽस्यास्ति । 'तपस्सहस्राभ्यां विनीनी' (५. २. १०२) । 'अण् च' (५. २. १०३) । 'अन्येषामपि—'(६. ३. १३७) इति दीर्घात् पारिकाङ्क्षी ॥

टीका० — भिक्षुपञ्चकं चतुर्थाश्रमिणि भिक्षौ । 'सनाशंसभिक्ष उः' (३. २. १६८) इत्युः । 'परौ व्रजेः षश्च पदान्ते' (उ० २. ६२) इति क्विप् दीर्घश्च धातोः षश्चान्तादेशः पदान्ते । परिव्राड् जान्तः । कर्मन्दर्षिप्रोक्तसूत्रमधीत इति कर्मन्दी । 'कर्मन्दकृशाश्वादिनिः' (४. ३. १११) इतीनिः । ततः 'तदधीते—'(४. २. ५९) इत्यण् । तस्य 'प्रोक्ताल्लुक्' (४. २. ६४) । पाराशर्यप्रोक्तसूत्रमधीते पाराशरी, तालव्यवान् । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४. ३. ११०) इति णिनिः । पूर्ववदण्लुकौ । 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (६. १. १५४) इति निपातनान्मस्करी । तपस्वित्रयं **तपोधने** । 'तपस्सहस्राभ्यां विनीनी' (५. २. १०२) इति विनिः । तपस्वी । मत्वर्थे 'अण् च' (५. २. १०३) इत्यण् । तापसः । परं ब्रह्मज्ञानं काङ्क्षत इति पारिकाङ्क्षी । आवश्यको णिनिः । पूषोदरादित्वात् पूर्वपदाकारस्येत्वं पकाराकारस्य च दीर्घत्वम् ॥

वाचंयमो मुनिः ।

क्षीर० — वाचं यच्छति मौनेनास्ते **वाचंयमः** । 'वाचि यमो व्रते' (३. २. ४०) इति खच् । मन्यते **मुनिः** । **भिक्षुपर्यायावेतावित्येके** ॥

टीका० — वाचंयमद्वयं मौनव्रतिनि । 'वाचि यमो व्रते' (३. २. ४०) इति खच् । 'मनेरुच्च' (उ० ४. १२४) इति किः । मुनिः ॥

तपःक्लेशसहो दान्तः

क्षीर० — तपःक्लेशादनुद्विग्नः[2] । 'वा दान्तशान्त—' (७. २. २७) इति साधुः ॥

---

१. 'र्वी', २. 'वियोगः । वा' ख. पाठः,

टीका० — सत्यपि **तपःक्लेशेऽनुद्विग्नो** दान्तः। 'वा दान्तशान्त —' (७. २. २७) इत्यादिना इड्विकल्पः॥

वर्णिनो ब्रह्मचारिणः॥ ४२॥

क्षीर० —**वर्णोऽस्यास्ति वर्णी**। 'वर्णाद् ब्रह्मचारिणि'(५. २. १३४) इतीनिः। ब्रह्म चरति तच्छीलो ब्रह्मचारी॥

टीका०—वर्णिद्वयं **ब्रह्मचारिणि**। 'वर्णाद् ब्रह्मचारिणि' (५. २. १३४) इतीनिः। वर्णी॥

ऋषयः सत्यवचसः

क्षीर० — दर्शनादृषिरविसंवादिवाक्॥

टीका० — ऋषिद्वयमृषौ। ज्ञानस्य पारगमनादृषिः। 'ऋषी गतौ'। 'इगुपधात् किः' (उ० ४. १२१) इति किः। स्त्रियामृषी च॥

स्नातकस्त्वाप्लुतो व्रती।

क्षीर० — 'स्नात वेदसमाप्तौ' (ग० ५. ४. २९) इति यावादित्वात् कन्। यो व्रतवान् तीर्थेष्वाप्लवते स्नातीत्याप्लुतः सः, स्नातकः। यत् स्मृतिः —

"गुरवे तु वरं दत्त्वा स्नायाद् वा तदनुज्ञया।
वेदं व्रतानि वा पारं नीत्वाप्युभयमेव वा"॥
(याज्ञ० अध्या० १. श्लो० ५१)

टीका० — समाप्तवेदाध्ययनानन्तरं यः स्नानशील आश्रमान्तरं गच्छति तत्र स्नातकद्वयं। 'पुण्यस्नातवेदसमाप्तौ' (ग० ५. ४. २९) इति यावादिगणपाठात् कन्॥

ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते॥ ४३॥

क्षीर० — यतं यमनमस्यास्ति यती। यच्छत्युपरमति यतिः॥

---

१. 'तीर्त्वाप्यु' क. ख. पाठः. २. 'मि', ३. 'मः', ४. 'मी।' ग. ङ. पाठः,

टीका० — निर्जितेन्द्रियगणे वसिष्ठादौ यतिद्वयम् । यतम् इन्द्रियसंयमोऽस्यास्तीति यती, इन्नन्तः। 'यती प्रयत्ने'। 'इन्' (उ० ४. ११९) इति इन्। यतिः ॥

यः स्थण्डिले व्रतवशाच्छेते स्थण्डिलशाय्यसौ ।
स्थाण्डिलश्च

क्षीर०—आद्यस्य 'व्रते' (३. २. ८०) इति णिनिः। परस्य 'स्थण्डिलाच्छयितरि व्रते' (४. २. १५) इत्यण् ॥

टीका० — व्रतकाम्यया स्थण्डिले शयितरि स्थण्डिलशायिद्वयम्। 'व्रते' (३. २. ८०) इति णिनिः। स्थण्डिलशायी। 'स्थण्डिलाच्छयितरि व्रते' (४. २. १५) इत्यणि स्थाण्डिलः ॥

अथ विरजस्तमसः स्युर्द्व्यातिगाः ॥ ४४ ॥

क्षीर० — विगते रजस्तमसी येभ्यः, सात्त्विका इत्यर्थः। द्वयमतिगच्छन्ति अतिक्रामन्ति द्व्यातिगाः ॥

टीका० —रजस्तमःशून्याः केवलसत्त्वस्था द्व्यातिगा उच्यन्ते। 'अन्येभ्योऽपि —' (वा०३. २. १०१) इति डः ॥

पवित्रः प्रयतः पूतः

क्षीर० — पूयतेऽनेन पवित्रः। प्रयतते प्रयच्छत्युपरमति वा प्रयतः। शुचिः पुण्यः पावनश्च ॥

टीका० — शुचिपुरुषादौ पवित्रत्रयम् । 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४. १७४) इति इत्रः। पवित्रः । 'पूङश्च' (७. २. ३१) इतीड्विकल्पेन पवित्र इत्यपि ॥

पाषण्डाः सर्वलिङ्गिनः ।

क्षीर० — पाषाणं[1] नन्दन्ति पाषण्डाः। वेदबाह्यव्रताः । सर्वलि-

---

१. 'नणति पा' ग, ङ. पाठः.

लिनः क्षपणकाद्याः, सर्वाणि लिङ्गानि सन्त्येषाम्। भग्नव्रता इत्येके। आहुश्च —

"नानाव्रतधरा नानावेषाः पाषण्डिनो मताः" ॥

टीका० — वेदव्यवहारबाह्ये कापालिकक्षपणकादौ पाषण्डद्वयम्। पाषण्डो भूम्नन्यषः। सर्वेषामाश्रमाणां लिङ्गं भजन्त इति सर्वलिङ्गिनः ॥

पालाशो दण्ड आषाढो व्रते

क्षीर० — आषाढासु जात आषाढः। 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०)। यदाहुः — 'आषाढो व्रतिनां दण्डः' ॥

टीका० — व्रतिनां पलाशकृतो दण्ड आषाढः। 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०) इत्यण् ॥

राम्भस्तु वैणवः ॥ ४५ ॥

क्षीर० — व्रते दण्ड इत्येव। रम्भा वेणुपर्यायः ॥

टीका० — वैणवे दण्डे राम्भः। रम्भशब्देन वंशो बोध्यते। ततोऽण् ॥

अस्त्री कमण्डलुः कुण्डी

क्षीर० — कं जलमण्डे मध्ये लाति कमण्डलुः। कुण्डाद् 'जानपदकुण्ड—' (४. १. ४२) इत्यमत्रे ङीप् ॥

टीका० — मृण्मयादिजलाधारे कमण्डलुद्वयम्। कुण्डेरच्। कुण्डी। गौरादिः ॥

व्रतिनामासनं बृसी।

क्षीर० — बुवन्तोऽस्यां सीदन्ति बृसी ॥

टीका० — व्रतिनां सलाङ्गूल आसने बृसी। 'गण्डूषा मञ्जूषा

---

१. 'यदा व्य' ब., 'दयाव्य' ख. ग. ट. पाठः.

वृषी'ति मूर्धन्ये लिङ्गकारिका । 'वसा तसी बृसी मांसी'ति दन्त्यान्ते चन्द्रगोमी ॥

अजिनं चर्म कृत्तिः स्त्री

क्षीर० — अज्यते क्षिप्यतेऽजिनम् । चरति चर्म । कृत्यते कृत्तिः ॥

टीका० — अजिनत्रयं चर्मणि । 'अज गतिक्षेपणयोः' । 'अजेरज च' (उ० २. ५०) इतीनच् । वीभावबाधनार्थमजादेशः । चरतेर्मनिन् । चर्म, नान्तम् । 'कृती छेदने' । क्तिन् । कृत्तिः ॥

भैक्षं भिक्षाकदम्बकम् ॥ ४६ ॥

क्षीर० — 'भिक्षादिभ्योऽण्' (४. २. ३८) ॥

टीका० — भिक्षासमूहे भैक्षम् । 'भिक्षादिभ्योऽण्' (४. २. ३८) ॥

स्वाध्यायः स्याज्जपः

क्षीर० — स्वस्य वेदस्याध्ययनं स्वाध्यायः । 'इङश्च' (३. ३. २१) इति घञ् । जपनं जपः । 'व्यधजपोरनुपसर्गे' (३. ३. ६१) इत्यप् ॥

टीका० — आवृत्त्या वेदाध्ययने स्वाध्यायद्वयम् । सुआङ्पूर्वाद् ध्यायतेर्घञ् । स्वाध्यायः । 'व्यधजपोरनुपसर्गे' (३. ३. ६१) इत्यप् । जपः । बाहुलकाद् घञि जाप इत्यपि रक्षितः ॥

सुत्याभिषवः सवनं च सा ।

क्षीर० — सोमं सुन्वन्त्यद्भिः परिवासयन्त्यस्यां सुत्या । 'संज्ञायां समज —' इति क्यप् । अभिषवणमभिषवः । 'उपसर्गात् सुनोति —' (८. ३. ६५) इति षत्वम् ॥

टीका० — सुत्यात्रयं स्नाने सोमलतानिर्दलने च । 'संज्ञायां स-

मज—' (३. ३. ९९) इत्यादिना क्यप्। सुत्या। ऋदोरपि उपसर्गादिना षत्वे अभिषवो मूर्धन्यषः॥

सर्वैनसामपध्वंसि जप्यं त्रिष्वघमर्षणम्॥ ४७॥

क्षीर०—अघं मृष्यते शोध्यतेऽनेनाघमर्षणम् अब्देवत्यो वा मन्त्रस्तज्जपो वा। त्रिरात्रोपवासादिस्तूपचारात्॥

टीका०—सर्वपापापनोदि यज्जपनीयं, तदघमर्षणम्। अघमर्षणो मन्त्रः, अघमर्षणी ऋक्॥

दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक्।

क्षीर०—अमावास्या दर्शः, दृश्यते चन्द्रोऽत्रेति। यागस्तूपचारात्। पूर्णिमायां पौर्णमासः, पूर्णो माश्चन्द्रस्तत्र भवः॥

टीका०—अमावास्यायागो दर्शाख्यः। पौर्णमासीयागः पौर्णमासाख्यः। पृथगिति भिन्नौ न पर्यायौ॥

शरीरसाधनापेक्षं नित्यं यत् कर्म तद् यमः॥ ४८॥

क्षीर०—शरीरमात्रेणैव यत् क्रियते, तद् यम्यतेऽनेन चित्तं यमः। 'यमः समुपनिविषु च' (३. ३. ६३) इत्यप्। आह च—

"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" (पात०सू० २. ३०)॥

टीका०—शरीरमात्रसाध्यं यद्, न बाह्यसाध्यं नित्यं यावज्जीवम् अहिंसासत्यादि तद् यमः॥

नियमस्तु स यत् कर्मानित्यमागन्तुसाधनम्।

क्षीर०—आगन्तु बाह्यं मृज्जलादि साधनं यत्र, तदेव कृत्रिमं

कर्म नियमः । यदाह —

"शौचसन्तोषतपस्स्वाध्यायेश्वरप्रणिधानानि[2] नियमाः[1]" (पात० सू० २. ३२) ॥

"शैव और्ध्वस्रोतसिकः सिद्धान्ती शौचमार्गिकः ।
पञ्चार्थिकः पाशुपतो लाँकुलोऽथ[3] महाव्रती ॥
कपाली सोमसिद्धान्ती तान्त्रिकः स्याद् विशेषदृक् ।
यामलो द्वयमार्गी[4] स्यात् त्रिकभेदी षडर्धिकः[5] ॥
पूर्वाम्नायी महामार्गी[6] भैरवी दक्षिणागमः ।
शाक्तो वामस्रोतसिकः कौल आन्वँयिको[7] मतः ॥
एकान्वयः सात्त्वतश्च वैष्णवः पाञ्चरात्रिकः ।
रक्ताम्बरो भदन्तश्च शाक्यः श्रमणवन्दकौ[8] ॥
भिक्षुः श्वेतः श्वेतपटः क्षपणर्षिर्दिगम्बरः ।
नग्नाटः श्रावकाभ्रीकौ[9] निर्ग्रन्थो जीवजीवकौ ॥
क्षौरं तु भेंद्राकरणं मुण्डनं वपनं त्रिषु ।
कक्ष्यापुटीच कौपीनं[10] शाटी वस्त्रीति लक्ष्यतः" ॥

टीका० — आगन्तुकदेवोत्थापनादिनिमित्तमुपवासादिर्नियमः ॥

उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे ॥ ४९ ॥

क्षीर० — उपवीयते आव्रियते स्मोपवीतम् । दक्षिणपाणौ प्रोद्धृते यदुपवीयते तद् यज्ञार्थं सूत्रमुपवीतम् ॥

टीका० — दक्षिणकरे प्रोद्धृते वामस्कन्धनिक्षिप्तं यज्ञसूत्रमुपवीताख्यम् ॥

प्राचीनावीतमन्यस्मिन्

क्षीर० — यज्ञसूत्रमित्येव । वामे करे प्रोद्धृते प्राचीनावीतम् । प्रा-

---

१. 'यंप्र', २. 'नि । उपवासादिकं यमः । दानादिकं नियमः । यमाः शैव' ख. पाठः, ३. 'लो', ४. 'र्थि' घ. पाठः, ५. 'र्गी', ६. 'द्व' ग. घ. पाठः, ७. 'श्री', ८. 'भिक्षुकौ' ग. घ, पाठः, ९. 'भाद्रक', १०. 'ली' ख. पाठः,

गेव प्राचीनम् । 'विभाषाञ्चेरदिक्स्त्रियाम्' (५. ४. ८) इति खः। आवीयते स्मावीतम् ॥

टीका० — श्राद्धकालेऽन्यस्मिन् वामे करे उद्धृते दक्षिणस्कन्धे निक्षिप्ते प्राचीनावीतम् ॥

निवीतं कण्ठलम्बितम्।

क्षीर० — यज्ञसूत्रमित्येव । अनुद्धृतयोरुभयोरपि कण्ठे यल्लम्बते, तद् नियतं वीयतेऽस्मिन् निवीतम् । यन्मनुः—

"प्राचीनमुद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीनमावीती निवीती कण्ठसज्जने" ॥
(अध्या० २. श्लो० ६३)

टीका० — यज्ञसूत्रं कण्ठादृजुलम्बितं तदेव निवीतम् ॥

अङ्गुल्यग्रे तीर्थं दैवं

क्षीर० — देवेभ्यस्तीर्यते दीयतेऽनेन तीर्थम् ॥

टीका० — अङ्गुलीनामग्रे दैवं तीर्थम् । देवस्येदं दैवम् । तेनैव तर्पणविधानात् ॥

स्वल्पाङ्गुल्योर्मूले कायम् ॥ ५० ॥

क्षीर० — स्वल्पा कनिष्ठाङ्गुलिः । द्वित्वम् अङ्गुलिमध्येन प्रजापतिभ्यो जलदानान्नानात् । कः प्रजापतिर्देवतास्य कायम् । 'कस्येत्' (४. २. २५) इत्यण् इत्वं च ॥

टीका० — कनिष्ठानामिकयोर्मध्ये प्राजापत्यं तीर्थम् । को ब्रह्मा देवतास्येति कायम् । 'सास्य देवता' (४. २. २४) इत्यण् । 'कस्येत्' (४. २. २५) इति इकारः । तस्य च वृद्ध्यायादेशौ ॥

---

१. 'उ' ग. घ. ङ. पाठः.

मध्येऽङ्गुष्ठाङ्गुल्योः पित्र्यं

क्षीर०— अङ्गुलिस्तर्जन्यत्र । पितरो देवतास्य पित्र्यं तीर्थम् । 'वाय्वृतुपित्रुषसो यत्' (४. २. ३१) ॥

टीका०— अङ्गुष्ठप्रदेशिन्योर्मूले पैत्रं, पितृदेवत्यम् ॥

मूले त्वङ्गुष्ठस्य ब्राह्मम् ।

क्षीर०— ब्रह्मा देवतास्य ब्राह्मं तीर्थम् । 'ब्राह्मोऽजातौ' (६. ४. १७१) इति साधुः । यद् याज्ञवल्क्यः—

"कनिष्ठातर्जन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥"
(अध्या० १. श्लो० १९)

करमध्ये सौम्यं त्वाहुः ॥

टीका०— अङ्गुष्ठमूले ब्राह्मम् । ब्रह्मदेवत्यम् । विद्युन्माला नामेयं सर्वगुरुरनुष्टुप् ॥

स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ॥ ५१ ॥

क्षीर०— ब्रह्मणो ज्ञानस्य भवनं ब्रह्मभूयम् । ब्रह्मणैकार्थ्यं, मोक्ष इत्यर्थः । 'भुवो भावे' (३. १. १०७) इति क्यप् । सह युनक्ति सयुक्, तस्य भावः सायुज्यम् ॥

टीका०— ब्रह्मभूयत्रिकं ब्रह्मभवने । 'भुवो भावे' (३. १. १०७) । क्यप् । ब्रह्मभूयम् । 'तस्य भावस्त्वतलौ' (५. १. ११९) । ब्रह्मत्वम् । 'सम्बन्धिगुणवान्[2] सयुक्' इति त्रिकाण्डशेषः । अतो ब्रह्मसम्बन्धि ब्रह्मसायुज्यम् । ष्यञ् ॥

देवभूयादिकं तद्वत्

क्षीर०— तद्वदिति देवत्वं देवसायुज्यं च । आदिशब्दान्मूर्खभूयादिः ॥

---

१. 'चा' ख. पाठः. २. 'न्धी गु' क. ख. घ. च. पाठः.

टीका० — एवं देवभवने देवभूयं देवत्वं देवसायुज्यमित्यपि बोद्धव्यम् ॥

कृच्छ्रं सान्तपनादिकम् ।

क्षीर० — कृन्तति पापं कृच्छ्रं नाम तपः । सन्तपनंभवं सान्तपनम् । यत् स्मृतिः —

"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात् कृच्छ्रं सान्तपनं स्मृतम्" ॥

आदिना पराकादि ॥

टीका० — सान्तपनचान्द्रायणादि कृच्छ्राख्यम् । कष्टे कृच्छ्रमुक्तम् ॥

सन्न्यासवत्यनशने पुमान् प्रायः

क्षीर० — सन्न्यसनं सर्वत्यागो मरणाध्यवसायः । पुमानिति प्रायस्यासन्तत्वं मा विज्ञायीति । यल्लक्ष्यं — 'प्रायोपवेशनमतिर्नृपतिर्बभूव' (रघु० स० ८. श्लो० ९४) ॥

टीका० — सन्न्यस्तोऽहमिति प्रतिज्ञां कृत्वा यदभोजनं स प्रायः । 'प्रायोपवेशनमतिर्नृपतिर्बभूव' (स० ८. श्लो० ९४) इति रघावदन्तः ॥

अथ वीरहा ॥ ५२ ॥

नष्टाग्निः

क्षीर० — वीरयते वीरोऽग्निः । तमुपेक्षया हन्ति ॥

टीका० — उत्सन्नाग्नौ पुरुषे वीरहा नान्तः । वीरोऽग्निः । हन्तेः किप् ॥

कुहना दम्भान्मिथ्येर्यापथकल्पना ।

क्षीर० — ईर्यापथाख्यस्य भिक्षुव्रतस्य दम्भेन परविस्मापनार्थं मिथ्याकल्पना कुहना । 'कुह विस्मापने' । अस्माद् युच् । अर्थलिप्सया विज्ञानदर्शनं वा कुहनाख्या । शाश्वतस्त्वाह —

---

१. 'ने' ख. ग. घ. ङ. पाठः. २. 'स्य शान्त', ३. 'का' ख. पाठः.

"ईर्ष्यालुर्दम्भचर्या च कुहनः कुहना क्रमात्" ॥

टीका० — अन्नलिप्सया मिथ्यामार्गाश्रयणे कुहना । 'कुह विस्मापने' । चुरादिः । युच् ॥

व्रात्यः संस्कारहीनः स्याद्

क्षीर० — व्रते साधुः कालोऽस्य व्रात्यः । प्रायश्चित्तार्हः । संस्कारोऽत्रोपनयनम् । यत् स्मृतिः —

"सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः" ।
(याज्ञ० अध्या० १. श्लो० ३८)

व्रते साधुरित्येके । पृथग्व्यपदेशो[1] नेत्यर्थः ॥

टीका० — अष्टादशसंस्कारहीनो व्रात्यः ॥

अस्वाध्यायो निराकृतिः ॥ ५३ ॥

क्षीर० — निराक्रियते वेदहीनत्वान्निराकृतिः । आकृतेर्जातेर्वा निष्क्रान्तः । यत् स्मृतिः—

"अनधीत्य तु यो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥
(मनु० अध्या० २. श्लो० १६८)

टीका० — वेदपाठशून्ये अस्वाध्यायद्वयम् । निराकृतिः पुमान् । बाहुलकः क्तिच् ॥

धर्मध्वजी लिङ्गवृत्तिः

क्षीर० — धर्मो ध्वजश्चिह्नमिवास्त्यस्य धर्मध्वजी । लिङ्गाज्जटादेर्वृत्तिर्जीविकास्य । भिक्षिष्य इत्यस्य जटा इति यावत् ॥

टीका० — वर्तनार्थमेव जटादिधारणं यस्य तत्र धर्मध्वजिद्वयम् । धर्मध्वजी नान्तः । लिङ्गेन जटादिना वृत्तिर्वर्तनं यस्य स लिङ्गवृत्तिः ॥

---

१. 'शोऽनर्थः' ख. पाठः.

अवकीर्णी क्षतव्रतः।

क्षीर०— अव अन्तरे कीर्णं रेतोऽस्त्यस्यावकीर्णी। यत् स्मृतिः—

"ब्रह्मचार्यवकीर्णी स्यात् कामतस्तु स्त्रियं व्रजन्" ॥

टीका०— स्व्यभिगमनादिना नष्टव्रतोऽवकीर्णी। 'इष्टादिभ्यश्च' (५. २. ८८) इतीनिः ॥

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥ ५४ ॥
अंशुमानभिनिर्मुक्ताभ्युदितौ तौ यथाक्रमम्।

क्षीर०— अभिभूय निर्मुक्तोऽस्तमितोऽर्कोऽस्याभिनिर्मुक्तः। अभिभूयोदितोऽर्कोऽस्याभ्युदितः ॥

टीका०— सुप्ते यस्मिन् द्विजे रविरस्तमेति सोऽभिनिर्मुक्तः, सुप्ते यस्मिन् रविरुदेति सोऽभ्युदितः ॥

परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात् ॥ ५५ ॥

क्षीर०— ज्येष्ठे भ्रातर्यकृतविवाहे कनिष्ठो विवाहाद्धेतोः परिवर्ज्य विन्दति परिवेत्ता। यत् स्मृतिः—

"येऽग्रजेष्वकलत्रेषु कुर्वते दारसङ्ग्रहम्।
ज्ञेयास्ते परिवेत्तारः परिवित्तिस्तु पूर्वजः" ॥

उपलक्षणं चैतद्, यतोऽग्निहोत्रव्रतादावपि परिवेदनस्य व्यवहारोऽस्ति ॥

टीका०— अकृतविवाहे ज्येष्ठभ्रातरि कनीयान् भ्राता परिवेत्ता ॥

परिवित्तिस्तु तज्ज्यायान्

क्षीर०— तस्य ज्यायानग्रजः। परिवर्ज्य यं विन्दति स परिवित्तिः ॥

टीका०— तस्य परिवेत्तुर्ज्यायान् भ्राता परिवित्तिः। बाहुलकः क्तिच् ॥

विवाहोपयमौ समौ ।

तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ॥ ५६ ॥

क्षीर० — विवहनं विवाहः । उपयमनमुपयमः । 'यमः समुपनिविषु च' (३. ३. ६३) इति पक्षेऽप् ॥

टीका० — विवाहषट्कं विवाहे । विवाहोद्वाहग्रोर्घञ् । 'यमः समुपनिविषु च' (३. ३. ६३) इति पक्षेऽप् । उपयमः । घञि उपयामः । नयतेः एरचि परिणयः ॥

व्यवायो ग्राम्यधर्मो मैथुनं निधुवनं रतम् ।

क्षीर० — व्ययनं व्यवायः । मिथुनस्य स्त्रीपुंसयोरिदं मैथुनम् । निधूयन्तेऽङ्गान्यस्मिन् निधुवनम् । रमणं रतम् । रतिः सुरतं मोहनं सम्प्रयोगो याभोऽपि ॥

टीका० — व्यवायचतुष्कं रतौ । इणः एरचि व्यवायः । ग्राम्याणां धर्म आचारो ग्राम्यधर्मः । 'धू विधूनने' । ल्युट् । निधुवनम् ॥

त्रिवर्गो धर्मकामार्थैः

क्षीर० — धर्माद्यैस्त्रिभिस्त्रिसङ्ख्यो वर्गः ॥

टीका० — धर्मार्थकामास्त्रिवर्गाख्याः ॥

चतुर्वर्गः समोक्षकैः ॥ ५७ ॥

क्षीर० — धर्मार्थकामैरित्येव ॥

टीका० — धर्मार्थकाममोक्षाश्चतुर्वर्गाख्याः ॥

सबलैस्तैश्चतुर्भद्रं

क्षीर० — चतुर्णां भद्राणां समाहारश्चतुर्भद्रम्[2] । पात्रादि । तैर्धर्मकामार्थैः । यत् कात्यः —

---

१. 'विक्रिय' ख. पाठः. २. 'म् । तैं' ग. घ. ङ. पाठः.

"आहुश्चत्वारि भद्राणि बलं धर्मं सुखं धनम्" ॥

टीका० — धर्मादिभिश्चतुर्भिः सबलैर्बलवद्भिश्चतुर्भद्रमुच्यते ॥

जन्याः स्निग्धा वरस्य ये ॥ ५७½ ॥

क्षीर० — जनीं वधूं वहति । 'संज्ञायां जन्याः' (४. ४. ८२) इति साधुः । जामातुर्वयस्याः । जनीवोढारोऽपि। यल्लक्ष्यं — 'यातेति जन्यानवदत् कुमारी' (रघु० स० ६. श्लो० ३०) ॥

इति ब्रह्मवर्गः ।

टीका०—ये वरस्य जामातुर्वयस्याः स्निग्धाः ते जन्या इत्युच्यन्ते। जनीं वधूं वहन्तीति 'संज्ञायां जन्याः' (४. ४. ८२) इति यत् ॥

इति ब्रह्मवर्गः ॥

अथ क्षत्रियवर्गः ।

मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ।

क्षीर० — मूर्धास्याभिषिच्यते मूर्धाभिषिक्तः । मूर्धावसिक्तोऽपि । राज्ञोऽपत्यं राजन्यः । 'राजश्वशुराद् यत्' (४. १. १३७) इत्यत्र 'राज्ञोऽपत्ये जातिग्रहणम्' । हिरण्यगर्भबाहुभ्यां जातो बाहुजः । यच्छ्रुतिः— 'बाहू राजन्यः कृतः' । क्षत्रस्यापत्यं जातिः क्षत्रियः । 'क्षत्राद् घः' (४. १. १३८) । क्षत्रं च क्षतत्राणात् ॥

टीका० — मूर्धाभिषिक्तपञ्चकं क्षत्रिये । राज्यारोपणकाले मूर्ध्न्यभिषिक्तो मूर्धाभिषिक्तैः । क्तः । प्रथमः क्षत्रियः । तत्प्रभवतया अनभिषिक्ता अपि मूर्धाभिषिक्ताख्याः । यथा ब्रह्मबाहुजस्य वंश्याश्च बाहुजाः । राजा क्षत्रियः, तस्यापत्यं राजन्यः । 'राजश्वशुराद् यत्' (४. १. १३७) । 'ये चाभावकर्मणोः'

---

१. 'धाभि' ग. घ. ङ. पाठः. २. 'भाद् बा' ग. घ. ङ. पाठः. ३. 'क्तः । प्र' ख. ग. घ. ङ. ञ. पाठः.

(६. ४. १६८) इति प्रकृतिभावः । 'राजेरन्यः' (उ० ३. १००) इत्युणादिः । तत्र 'राजृ दीप्तावि'त्यतोऽन्यप्रत्ययः । ब्रह्मणो बाहोर्जातो बाहुजः । अपत्ये 'क्षत्राद् घः' (४. १. १३८) । क्षत्रियः । तेन क्षत्रोऽप्यस्य नामेत्युक्तम् । अतितेजस्वितया विशेषेण राजते दीप्यत इति विराट् । 'सत्सूद्विष —' (३. २. ६१) इत्यादिना क्विप् ॥

राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ॥ १ ॥

क्षीर० — राजते राट् । व्रश्चादिना षः । 'झलां जशोऽन्ते' (८. २. ३९) इति डत्वम् । 'वावसाने' (८. ४. ५६) । चर्त्वम् । पृथिव्या राजा पार्थिवः । 'सर्वभूमिपृथिवीभ्यामणञौ' (५. १. ४१) । मह्यां क्षियत्यधिवसति महीक्षित् ॥

टीका० — जनपुरपरिपालनाधिकृते क्षत्रियेऽन्यस्मिन्नपि तत्कर्मकारिणि राजसत्तकम् । समृद्ध्या राजतीति राजा । नान्तः । 'कनिन् युवृषितक्षिराजिधन्वद्युप्रतिदिवः' (उ० १. १६२) इति कनिन् । 'सत्सूद्विष—' (३. २. ६१) इत्यादिना क्विप् । राट् । जान्तः । पृथिव्या ईश्वरः पार्थिवः । 'तस्येश्वरः' (५. १. ४२) इत्यण् । क्ष्मां भुनक्ति पालयतीति क्ष्माभुक् । जान्तः । नॄन् पातीति नृपः । आतोऽनुपसर्गे कः' (३. २. ३) 'क्षि निवासगत्योः' । धातूनामनेकार्थत्वान्महीमधिगतवानिति महीक्षित् । क्विबन्तः ॥

राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः ।

क्षीर० — अध्युपरीष्टे तच्छीलोऽधीश्वरः ॥

टीका० — प्रणता अशेषाः सामन्ता यत्र सोऽधीश्वराख्यः । संसक्तः संलग्नोऽन्तो यस्याः सा समन्ता, स्वविषयानन्तरा भूमिः । संशब्द एवात्र संसक्तार्थः । समन्ताया इमे सामन्ताः, अनन्तरा राजानः ।

"नयविक्रमसंस्कृतप्रतापैरपि सामन्तनृपैः प्रयाच्यमानः"

इति जातकमालायामनन्तरराजेवूक्तम् ॥

चक्रवर्ती सार्वभौमः

क्षीर० — नृपचक्रे राजचक्रे वर्तते, स्वाम्येन चक्रं राष्ट्रं वर्तयति वा चक्रवर्ती। सर्वस्या भूमेरीश्वरः सार्वभौमः। अनुशतिकादित्वादुभयपदवृद्धिः। अत्राहुः—

"रामो दाशरथी रावणारिकाकुत्स्थराघवाः।
सौमित्रिर्लक्ष्मणो लङ्कापतिपौलस्त्यरावणाः॥
दशास्योऽथेन्द्रजिन्मेघनादो मण्डोदरीसुतः।
आञ्जनेयस्तु हनुमान् मारुतिर्मारुतात्मजः॥
किष्किन्धाधिपसुग्रीवौ द्वौ जटायुजटायुषौ।
अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः॥
राधेयोऽङ्गाधिपः कर्णो भीमसेनो हिडिम्बभित्।
मारुतिः कीचकारातिर्बकवैरी वृकोदरः॥
धनञ्जयोऽर्जुनः पार्थो विजयः शक्रनन्दनः।
गाण्डीवी फल्गुनः सव्यसाची मध्यमपाण्डवः॥
जिष्णुः किरीटी बीभत्सुः श्वेतवाजी कपिध्वजः।
पृथा तु कुन्ती कृष्णा तु पाञ्चाली याज्ञसेन्यपि॥
द्रौपदी विक्रमादित्यः साहसाङ्कः शकान्तकः।
शूद्रकस्त्वग्निमित्राख्यो हालः स्यात् सालवाहनः॥
वैरोचनो बलिः कार्तवीर्यार्जुनः सहस्रदोः"॥

टीका० — समस्तभूम्यधिपतौ राजनि चक्रवर्तिद्वयम्। पुण्योपनतेन चक्रेण वर्तते चेष्टते असाधुदमनिकां राजवृत्तिमनुतिष्ठतीति चक्रवर्ती। णिन्यन्तः। सर्वभूमेरीश्वरः सार्वभौमः। पार्थिववदण्। 'अनुशतिकादीनां च' (७. ३. २०) इत्युभयपदवृद्धिः॥

नृपोऽन्यो मण्डलेश्वरः॥ २॥

क्षीर० — अन्यो भूम्येकदेशेशो नृपः॥

---

१. 'पमित्रो ना ह्य' ग. घ. पाठः.

टीका० — अन्योऽसार्वभौमो मण्डलेश्वरः ॥

येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः ।
शास्ति यश्चाज्ञया राज्ञः स सम्राड्

क्षीर० —इज्यते स्मेष्टम् । मण्डलस्य द्वादशराजकस्य । समुदितं लक्षणं चैतत् । सम्यग् राजति सम्राट् । 'मो राजि समः क्वौ' (८. ३. २५) इति मस्य मः ॥

टीका० —राजसूयनाम्ना यागेन येनेष्टं स सम्राट् । राजसूयाधिकारश्चासार्वभौमस्य न भवति । सार्वभौमः सकलमण्डलपालनात् सकलराजमण्डलशासनाद् वा भवतीति सार्वभौमप्रकारद्वयं प्रदर्शयति — 'मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञ' इति । एतेन राजसूयाधिकारिणि चाधिकारितामात्रेणापि सम्राट्छब्दो वर्तत इत्युक्तं भवति । वोपालितेन सार्वभौममनभिसन्धाय द्वयमेव सम्राट्त्वेन निबद्धम् । यो राजसूययाजी सर्वावनिराट् स सम्राट् । मण्डलेश्वरश्च य इति यो हिमवत्समुद्राभ्यन्तरे सहस्रयोजनपरिमाणस्य भूमण्डलस्येश्वरः पालयिता सोऽपि सम्राट् । शास्ति यश्चाज्ञया राज्ञ इति यो हिमवत्समुद्राभ्यन्तरवर्तिनो राज्ञो विधेयीकरोति सोऽपि सम्राडित्युक्तम् । प्रेत्य देवेष्विह चातिविलक्षणतया राजसु मध्ये सम्यग् राजते इति सम्राट् । क्विप् । 'मो राजि समः क्वौ' (८. ३. २५) इति मकारस्य मकारोऽनुस्वारनिवृत्त्यर्थः ॥

अथ राजकम् ॥ ३ ॥

राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् ।

क्षीर० — राज्ञां समूहो राजकम् । राजन्यानां समूहो राजन्यकम् । 'गोत्रोक्षोष्ट्र —' (४. २. ३९) इति वुञ् ॥

टीका० — नृपतिसमूहे राजकं क्षत्रियसमूहे राजन्यकम् । 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्य —' (४. २. ३९) इत्यादिनोभयत्र समूहे वुञ् । 'प्रकृत्याके राजन्यमनुष्ययुवान इति वक्तव्यम्' (वा० ६. ४. १६३) इति प्रकृतिभावाद् 'आपत्यस्य च तद्धितेऽनाति' (६. ४. १५१) इति राजन्यके यलोपो न भवति ॥

मन्त्री धीसचिवोऽमात्यः

क्षीर० — मन्त्रं कर्तव्यावधारणमस्त्यस्य मन्त्री। धिया सचति समन्वेति धीसचिवः। अमा सह समीपे वा भवोऽमात्यः[1]। 'अव्ययात् त्यप्' (४. २. १०४)। सामवायिकोऽपि॥

टीका० — मन्त्रित्रयं मन्त्रिणि। इतिकर्तव्यतावधारणं मन्त्रः, तद्योगादिनिः। मन्त्री। धीप्रधानः सचिवो धीसचिवः। 'सचिवः सहायोऽमात्य' इति दन्त्यादावजयः। अमाशब्दः सहार्थे निपातितः। मन्त्रेणामा सह भवतीत्यमात्यः। 'अव्ययात् त्यप्' (४. २. १०४)। अन्येष्वपि सचिवेष्वमात्यशब्दो वर्तते॥

अन्ये कर्मसचिवास्ततः॥ ४॥

क्षीर०— ततो मन्त्रिणोऽन्येऽमात्याः कर्मसहाया नियोग्याख्याः॥

टीका० — धीसचिवादन्येऽक्षपटलादयः कर्मोपयुक्तत्वात् कर्मसचिवाख्याः॥

महामात्राः प्रधानानि

क्षीर० — अमात्या इत्येव। महती मात्रा परिच्छद एषां महामात्राः। प्रदधाति प्रधानम्, आविष्टलिङ्गम्॥

टीका० — नापकृष्टा न चोत्कृष्टा मध्यमाधिकरणव्यवस्थिता राजसहायाः सेनापतिगणस्थिरादयो महामात्राः।

"महामात्रः प्रधाने स्यात् तथा हस्तिपकाधिपे"

इति धरणिः। महती मात्रा परिच्छेद[2] एषामिति महामात्राः। अत एव प्रधानानि। रूपभेदात् क्लीबम्। 'महामात्रः प्रधानः स्याद्' इति पुंस्काण्डे वोपालितः॥

---

१. 'अः। सा' ख. पाठः. २. 'च्छे' ग. पाठः.

पुरोधास्तु पुरोहितः ।

क्षीर० — पुरो धीयते हिनोति वा पुरोहितः । सौवस्तिकोऽपि ॥

टीका० — पुरोधाद्वयं पुरोहिते । दृष्टादृष्टफलेषु कर्मसु पुरो धीयत इति पुरोधाः । पुरोहितश्च । 'पुरसि च' (उ० ४. २३२) इति धाञोऽसुन् । एवं पुरोधाः सान्तः । धाञः क्तः । 'दधातेर्हिः' (७. ४. ४२) । पुरोहितः ॥

द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ ॥ ५ ॥

क्षीर० — द्रष्टा निर्णेता । व्यवहारः ऋणादानादिन्यायः । यत् स्मृतिः —

"वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नानासन्देहहरणाद् व्यवहारः प्रकीर्तितः" ॥

पृच्छतीति प्राट् । 'क्विब्वचि—' (उ० २. ६०) इति दीर्घोऽसम्प्रसारणं च । प्राट् चासौ विविधवाचकः प्राड्विवाकः । अक्षाण्यायमुखानि[1] रूपाण्यवपश्यत्यक्षदर्शकः । धर्माधिकरणिक[2] आक्षपटलिकश्च ॥

टीका० — व्यवहाराणाम्[3] ऋणादानदायादीनां द्रष्टरि[4] धर्माधिकरणिकादौ प्राड्विवाकद्वयम् । तदुक्तं —

"विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः ।
विचारयति येनादौ प्राड्विवाकस्ततः स्मृतः" ॥

पृच्छतीति प्राट् 'क्विब्वचिप्रच्छि—' (उ० २. ६०) इत्यादिना क्विब् दीर्घश्च । विवक्तीति विवाकः । बहुलवचनात् कर्तरि घञ् । विवक्ति तमिति वा विवाकः । कर्मणि घञ् । ततः कर्मधारयः । तुलादिपरीक्षायां यः कृतोपवासो व्याप्रियते, सोऽपि प्राड्विवाकः । अक्षान् व्यवहारान् पश्यतीत्यक्षदर्शकः । ण्वुल् ॥

---

१. 'नि द्रव्याणि वा प' ख. पाठः. २. 'अ' ग. घ. ङ. पाठः. ३. 'ण' ख. पाठः. ४. 'दि' घ. पाठः. ५. 'स्कमि' ङ. छ. पाठः.

प्रतीहारे द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः ।

क्षीर० — प्रतिहियते वार्यतेऽनेन प्रतीहारः । द्वारि तिष्ठति द्वाःस्थः । द्वारि स्थितं दर्शयत्यावेदयति । द्वे संज्ञे इत्येके । द्वाःस्थित एव हि दर्शयति । द्वाःस्थोपस्थितदर्शका इत्येके पेठुः । दण्डी दौवारिको वेत्री उत्सारकश्च ॥

टीका० — प्रतीहारपञ्चकं प्रतीहारे । प्रतिराभिमुख्ये । राज्ञोऽभिमुखं जनान् हरति नयति प्रापयतीति प्रतीहारः । 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०) । 'अन्येषामपि — ' (६. ३. १३७) इति दीर्घः । दीर्घत्वं न भवतीत्यपरे । तथा च नाममाला —

"बुधकुलजावभिजातौ प्रतिहारौ द्वारपालकद्वारौ"

इति । द्वारं पालयतीत्यण् । द्वारपालः । द्वारि तिष्ठतीति द्वाःस्थः । 'सुपि स्थः' (३. २. ४) इति कः । द्वारि स्थितो द्वाःस्थितः । दर्शयति जनानिति दर्शकः । समस्त एवेत्यन्यः । क्वचिद् द्वाःस्थोपदर्शक इति पाठः ॥

रक्षिवर्गस्त्वनीकस्थः

क्षीर० — अङ्गरक्षिवृन्दम् । अनीके तिष्ठत्यनीकस्थः । 'राजशिक्षाविचक्षणा'विति शाश्वतः ॥

टीका० — रक्षिवर्गद्वयमङ्गरक्षे । अनीकेन वृन्देन तिष्ठतीत्यनीकस्थः ॥

अथाध्यक्षाधिकृतौ समौ ॥ ६ ॥

क्षीर०— अधिकृतोऽक्षेष्वायमुखेष्वध्यक्षः, अध्यक्षणोति वा । 'अक्षू व्याप्तौ' । अधिकान्यक्षाणीन्द्रियाण्यस्य वा । अधिक्रियत उपरि[1] नियुज्यते स्म[2]धिकृतः ॥

---

१. 'पयु', २. 'तेऽधि' ख. पाठः. ३. 'स्मादधि' ग. पाठः.

टीका० —सामान्येन यो यत्राधिकृतस्तत्राध्यक्षद्वयम् । 'अक्षू व्याप्तौ' । पचादिः । अध्यक्षः । करोतेः क्तः । अधिकृतः ॥

स्थायुकोऽधिकृतो ग्रामे

क्षीर० — तिष्ठति तच्छीलः स्थायुकः । 'लषपतपद —' (३. २. १५४) इत्युकञ् ॥

टीका० — एकग्रामाधिकृतः स्थायुकः । 'लषपत —' (३. २. १५४) इत्यादिनोकञ् । 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युक् । स्थायुकः ॥

गोपो ग्रामेषु भूरिषु ।

क्षीर० —अधिकृत इत्येव । गां भुवं पाति, गोपायति वा गोपः ॥

टीका० — बहुषु ग्रामेष्वधिकृतो गोपः । गां पातीति 'आतश्चोपसर्गे'[2] (३. १. १३६) इति कः ॥

भौरिकः कनकाध्यक्षः

क्षीर० — भूरिणि हेम्नि नियुक्तो भौरिकः । हैरिक इति पाठे हिरण्ये नियुक्तः ॥

टीका०— सुवर्णाधिकृते भौरिकः । भूरि सुवर्णम् । तथा च धरणिः — 'भूरि प्राज्यसुवर्णयोः' इति । तत्राधिकृत इति ठक् ॥

रूप्याध्यक्षस्तु नैष्किकः ॥ ७ ॥

क्षीर० — रूपमाहतमस्य रूप्यं दीनारादिः । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) । निष्के दीनारादौ नियुक्तो नैष्किकः, टङ्कपतिः ॥

---

१. 'क् ॥ गो' अ. पाठः, २. 'र्गे कः' क. ख. पाठः,

टीका० — रूप्याधिकृते नैष्किकः। पूर्ववट्ठक् ॥

अन्तःपुरेष्वधिकृतः स्यादन्तर्वंशिको जनः।

क्षीर० — 'अन्तःपूर्वपदाट्ठञ्' (४.३.६०)। जनः कुब्जवामनादिसमुदायः ॥

टीका० — बृहदुपकारिकादावन्तःपुराधिकृते जनेऽन्तर्वंशिकः। 'अन्तःपूर्वपदाट्ठञ्' (४. ३. ६०)। संज्ञापूर्वकत्वान्न वृद्धिः ॥

सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते ॥ ८ ॥

क्षीर० — सुविदन्तं विवाहं जानन्तं लान्ति सुविदल्ला ऊढाः स्त्रियः, तत्र भवाः सौविदल्लाः। कञ्चुकं विनीतवेषार्थमस्त्येषाम्। स्त्रियो व्यवस्थायां स्थापयन्ति स्थापत्याः। यद्वा तिष्ठत्यस्मिन् वा स्थः। घञर्थे कः। स्थश्चासौ पतिश्चेति स्थपतिः, तत्र भवा इति 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' (४. १. ८५)। सुविदस्योद्वहत इमे सौविदाः ॥

टीका० — सौविदल्लचतुष्कं कञ्चुकिनि। सत्रयं दन्त्यम्। कञ्चुकं चोलस्तद्योगादिनिः। कञ्चुकी। स्थपतिः कञ्चुकी। स एव स्थापत्यः। स्वार्थे ष्यञ् ॥

शण्ढो वर्षवरस्तुल्यौ

क्षीर० — शाम्यति शण्ढः। अत एवान्तःपुरपालकः। वर्षं रेतःसेकं वृणोत्याच्छादयति वर्षवरः। 'वृष शक्तिप्रबन्धे' वा ॥

टीका० — मुष्कशून्योऽन्यो वा स्त्रीस्वभावो महल्लकस्तत्र षण्डद्वयम्। तदुक्तं —

---

१. 'म्। कुतश्चित् स्त्रीव्य' ग. पाठः. २. 'रः शा', ३. 'वा ॥ तुल्याः से ख. पाठः.

"ये त्वल्पसाराः प्रखलाः क्लीबाश्च स्त्रीस्वभाविनः ।
न दुष्टाः कापि कार्ये च ते वै वर्षवराः स्मृताः" ॥

नपुंसके षण्ड उक्तः ॥

सेवकार्थ्यनुजीविनः ।

क्षीर० — अर्थयते तच्छीलोऽर्थी । 'अर्थाच्चासन्निहिते' (वा० ५. २. १३५) इति इनिर्वा ॥

टीका० — सेवकत्रयं **सेवके** । 'षेवृ सेवने' । ण्वुल् । सेवकः । अर्थनमर्थस्तद्योगादर्थी । नान्तः । प्रभोः पश्चाज्जीवतीत्यनुजीवी । णिनिः ॥

विषयानन्तरो राजा शत्रुः

क्षीर० — विजिगीषुविषयादव्यवहितः ॥

टीका० — विजिगीषोः समन्ततो **मण्डलीभूते[1]भूम्यनन्तरो राजा शत्रुः**, एकार्थाभिनिवेशात् ॥

मित्रमतः परम् ॥ ९ ॥

क्षीर० — अतः शत्रोः परभूमिस्थो विजिगीषोर्मित्रम् ॥

टीका० — ततः परं भूम्येकान्तरितं मित्रम्, उपकारित्वात् ॥

उदासीनः परतरः

क्षीर० — ऊर्ध्वमासीन इवोदासीनः[3] । स्वशत्रुमित्रभूमिभ्यो बाह्योऽत एव तटस्थः ॥

टीका० — अरिविजिगीषुमध्यमानां मण्डलाद् बहिर्भूतोऽत्यन्तव्यवहि-

---

१. 'सत्त्वाः प्र', २. 'तस्य भू' ग. पाठः. ३. 'नः । श' ख. पाठः.

तो बलाधिकोऽप्युपकारापकारौ यो न करोति, स उदासीनः। आस्तेः शानच्। 'ईदासः' (७. २. ८३) इतीत्त्वम्। तदुक्तमर्थशास्त्रे —

"सम्पन्नस्तु प्रकृतिभिर्महोत्साहः कृतश्रमः।
जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः॥
अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम्।
तथारिमित्रमित्रं च विजिगीषोः पुरःस्थिताः।
पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरः।
आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः॥
अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः।
अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे॥
मण्डलाद् बहिरेतेषामुदासीनो बलाधिकः।
अनुग्रहे संहतानां व्यस्तानां निग्रहे प्रभुः॥"

इति॥

पार्ष्णिग्राहस्तु पृष्ठतः।

क्षीर०— नेतुः पश्चात् स्थितो राजा पार्ष्णिमिव पार्ष्णिं गृह्णात्यवष्टभ्नाति। पञ्चस्वेतेषु द्वादशराजकमण्डलं परिसमाप्तम्। यदाहुः —

"अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम्।
तथारिमित्रमित्रं च विजिगीषोः पुरःस्थिताः॥
पार्ष्णिग्राहस्तथाक्रन्द आसारौ च तयोः पृथक्।
मध्यमोऽथाप्युदासीन इति द्वादशराजकम्"॥

टीका०— शत्रुमभियुञ्जानस्य विजिगीषोः शत्रुहननाय यः पार्ष्णिं गृह्णाति पृष्ठतः स पार्ष्णिग्राहः। 'कर्मण्यण्' (३. २. १)॥

रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः॥ १०॥

---

१. 'परे स्थि' ख. ग. ट. पाठः. २. 'तः।' च. पाठः. ३. 'क्रान्तस्त' ग. पाठः. ४. 'मित्रारि' ख. पाठः. ५. 'रश्च त' क. ख. घ. पाठः.

द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः ।
अभिमातिपरारातिप्रत्यर्थिपरिपन्थिनः ॥ १० ॥

क्षीर० — रेपयति रिपुः । 'रेपृ गतौ' । समानं पतत्येकार्थाभिनिवेशित्वात् सपत्नः । इयर्त्यरिः । द्वेष्टि द्विषन् । 'द्विषोऽमित्रे' (३. २. १३१) इति शता । द्वेष्टि तच्छीलो द्वेषणः । 'क्रुधमण्डार्थेभ्यश्च' (३. २. १५१) । युच् । दुष्टं हृदयमस्य दुर्हृत् । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' (५. ४. १५०) इति साधुः । विरुद्धः पक्षो विपक्षः । अमत्यमित्रः । शातयति शत्रुः । 'प्रज्ञादिभ्यश्च' (५. ४. ३८) इति पक्षेऽण् । शात्रवः । अभिमन्यतेऽभिमातिः । म्रियते परः । 'पृङ् व्यायामे' । इयर्त्यरातिः । प्रतीपमर्थयते प्रत्यर्थी । परिपन्थयति परिपन्थी । 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' (५. २. ८९) इति साधुः । प्रत्यवस्थाता प्रत्यनीकः परिपन्थकोऽपि ॥

टीका० — रिपूनविंशतिकं शत्रौ । रपत्यकीर्तिमिति रिपुः । 'रप लप व्यक्तायां वाचि' । 'रपेरिच्चोपधायाः' (उ० १. २६) इति कुः । वैरं विरोधः, तद्योगाद् वैरी इन्नन्तः । सपत्नशब्दोऽव्युत्पन्न इति केचित् । सपत्नीवत् सपत्नोऽपि । दुःख हेतुत्वात् । सपत्नीशब्दाद् इवार्थे 'व्यन् सपत्ने' (४. १. १४५) इति निपातनादकारप्रत्ययः । ईकारलोप इत्यपरः । अर्तेः 'अच इः' (उ० ४. १४०) । अरिः । 'द्विषोऽमित्रे' (३. २. १३१) इति शतृप्रत्ययः । द्विषन् । द्वेषणो नन्द्यादिल्युडन्तः । दुष्टं हृदयमस्येति दुर्हृत् । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' (५. ४. १५०) इति निपातनाद् हृद्भावः । द्विड् मूर्धन्यषान्तः । 'सत्सूद्विष —' (३. २. ६१) इत्यादिना क्विप् । विरुद्धः पक्षोऽस्येति विपक्षः । न हितोऽहितः । 'अम गत्यादिषु' । 'अमेर्द्विषति चित्' (उ० ४. १७५) इति इत्रः । अमित्रः । ना । एकतकारश्च ।

"स्यातामभिमित्रौ मित्रे च सहजप्राकृतावपि" (स० २. श्लो० ३६)

इति माघः । चौरे दस्युरुक्तः । शातयतीति शत्रुः । जत्वादिः । शत्रुरेव शात्रवः । प्रज्ञादिः । यातेः क्तिच् । अभियातिः । 'द्वेष्यभियातिरमित्रः' इति रत्नकोशोऽपि ।

---

१. 'मा' ग. पाठः.

अभिघा(ती)तिपाठे अभिमुखं हन्तीति आवश्यके णिनिः। 'पॄ पालनपूरणयोः'। 'ऋदोरप्' (३. ३. ५७)। परः। अर्तेर्बाहुलक आतिः, अरातिः। प्रतीपमर्थनं प्रत्यर्थः, तद्योगादिनिः, प्रत्यर्थी। 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' (५. २. ८९) इति निपातनात् परिपन्थी नान्तः। छान्दसा अपि भाषायां प्रयुज्यन्ते॥

स्निग्धो वयस्यः सवयाः

क्षीर०—स्निह्यति। वयसा तुल्यो वयस्यः। 'नौवयोधर्म—' (४. ४. ९१) इति यत्। समानं वयोऽस्य सवयाः॥

टीका०—वयस्यत्रयं तुल्यवयसि। वयसा तुल्यो वयस्यः। 'नौवयोधर्म—' (४. ४. ९१) इत्यादिना यत्। स्निहेः क्तः। स्निग्धः। समानं वयोऽस्येति सवयाः। सान्तः। 'ज्योतिर्जनपद—' (६. ३. ८५) इत्यादिना सभावः॥

अथ मित्रं सखा सुहृत्।

क्षीर०—मेद्यति स्निह्यति मित्रम्। समानं ख्याति सखा। 'समाने ख्यश्च स चोदात्तः' (उ० ४. १३८) इतीन् डिच्च यलोपश्च॥

टीका०—मित्रत्रयं मित्रे। सूर्ये मित्रं उक्तः। स पुमान्। 'अयमाविष्टलिङ्गः। 'इदं मित्रमयं मित्र' इति वात्स्यायने। स्त्रियां मित्रेति पाठः। समानः ख्यातः सखा। 'ख्या प्रकथने'। 'समाने ख्यः स चोदात्तः' (उ० ४. १३८) इति डः, टिलोपः, समानस्य च सभावः। 'अनङ् सौ' (७. १. ९३) इत्यनङ्। दुर्हृद्वत् सुहृत्॥

सख्यं सप्तपदीनं स्याद्

क्षीर०—सख्युर्भावः सख्यम्। 'सख्युर्यः' (५. १. १२६)। सप्त पदानि क्रमात् सुप्तिङन्तानि व्याप्नोति सप्तपदीनम्। 'सप्तपदीनं सख्यम्'

---

१. 'त्रशब्द उ' ज. पाठः. २. 'नवाप्नो' ग. घ. ङ. पाठः.

(५. २. २२) इति साधुः। तद्योगात् सख्यापि साप्तपदीनः। सौहृदं सौहार्दं मैत्री सौहृदय्यमजर्यं च ॥

टीका० — सख्यद्वयं मैत्र्याम्। सख्युर्भावः सख्यम्। 'सख्युर्यः' (५. १. १२६) इति यः। 'साप्तपदीनं सख्यम्' (५. २. २२) इति निपातनात् साप्तपदीनम् ॥

अनुरोधोऽनुवर्तनम् ॥ १२ ॥

क्षीर० — इच्छानुवर्तनमित्यर्थः। 'अनौ रुध कामे' ॥

टीका० — अनुरोधद्वयमानुकूल्ये। 'रुधिर् आवरणे'। 'वृतु वर्तने'। घञ्ल्युटौ ॥

यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः।
चारश्च गूढपुरुषश्च

क्षीर० — देशकालोचितो वर्ण आकारो जातिवर्णनं वास्य यथार्हवर्णः। प्रकर्षेण गुप्तो निधीयते परेषु प्रणिधिः। अपच्छन्नः सर्पत्यपसर्पः। चरति चरः चारश्च। ज्वलादित्वाण्णो वा। स्पशति बाधते परान् स्पशः ॥

टीका० — यथार्हवर्णसप्तकं चरे। वणिक्कृषीवलभिक्षुकादिरूपस्थायिनि चरे आद्यं नामद्वयमिति केचित्। वर्णः प्रकारः। यथा येन वर्णेन प्रकारेण परचक्रं ज्ञातुं शक्नोति तत्प्रकारवानित्यर्थः। निधिवत् प्रणिधिः। अपकृष्टं सर्पतीत्यपसर्पः। चरति जानाति परबलमिति चरः। अच्। 'स्पश बाधनस्पर्शनयोः'। पचाद्यच्। स्पशस्तालव्यान्तो रेफशून्यश्च। प्रज्ञाद्यणि चारः। गूढः पुरुषो गूढपुरुषः ॥

आप्तप्रत्ययितौ समौ ॥ १३ ॥

क्षीर० — आप्यते स्माप्तः अविसंवादिवाक्। प्रत्ययो[1] विश्वासः सञ्जातोऽत्र प्रत्ययितः ॥

---

१. 'य आशंसा सञ्जातास्य प्र' ग. पाठः.

टीका० — आप्तद्वयं सभ्ये। आप्नोतेः क्तः। आप्तः। तारकादित्वादितच्। प्रत्यायितः॥

सांवत्सरो ज्यौतिषिको दैवज्ञगणकावपि।
स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि॥ १४॥

क्षीर० — संवत्सरः कालोपलक्षणं[1], तद् वेद सांवत्सरः। 'तदधीते तद् वेद' (४. २. ५९) इत्यण्। ज्योतींषि ग्रहादीन् वेद ज्यौतिषिकः। 'क्रतूक्थादिसूत्रान्ताट्ठक्' (४. २. ६०)। दैवं पूर्वकृतं कर्म जानाति दैवज्ञः। मुहूर्तं वेद मौहूर्तिकः। क्रतूक्थादित्वाट्ठग् वा। कालादिज्ञानमस्यास्ति इति ज्ञानी। कृतान्तं वेद कार्तान्तिकः॥

टीका० — सांवत्सराष्टकं ज्यौतिषिके। 'तदधीते तद् वेद' (४. २. ५९) इत्यणि सांवत्सरः। ज्योतिरधिकृत्य कृतो ग्रन्थो ज्योतिषम्। 'अधिकृत्य कृते ग्रन्थे' (४. ३. ८७) इत्यण्। संज्ञापूर्वकत्वाद् वृद्ध्यभावः। ततः 'क्रतूक्थादिसूत्रान्ताट्ठक्' (४. २. ६०) इत्युक्थादित्वात् 'तदधीते तद् वेद' (४. २. ५९) इत्यर्थे ठक्। ज्यौतिषिकः। एवं मौहूर्तिकः। क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति मौहूर्तः। सर्वज्ञवद् दैवज्ञः। गणयतीति गणकः। शुभाशुभज्ञानयोगाज् ज्ञानी। अत इनिः। कृतान्तो दैवं, ततः पूर्ववट्ठक्। कार्तान्तिकः॥

तान्त्रिको ज्ञातसिद्धान्तः

क्षीर० — तन्यते तन्व्यते वानेन तन्त्रं पारमेश्वरवैद्यकज्योतिषादि। तद् वेद तान्त्रिकः। सिद्धो निवारितविप्रतिपत्तिरन्तो निष्ठा अत्र सिद्धान्तः॥

टीका० — यस्यकस्यचिच्छास्त्रज्ञे तान्त्रिकद्वयम्। 'तदधीते तद् वेद' (४. २. ५९) इत्यर्थे क्रतूक्थादिठकि तान्त्रिकः॥

---

१. 'णं, तं' ग. पाठः. २. 'रपद' ङ. छ. पाठः.

सत्री गृहपतिः समौ ।

क्षीर० — सीदन्त्यस्मिन् सत्रं गृहं सदा दानं च ॥

टीका० — सत्रिद्वयं दानपतौ । सदेरौणादिकः ष्ट्रन् । द्वितकारं दन्त्यादि च ।

"सत्रं यज्ञे सदा दाने छादनारण्ययोरपि"

इति धरणिः । तद्योगात् सत्री ॥

लिपिकरोऽक्षरचणोऽक्षरचुञ्चुश्च लेखके ॥ १५ ॥

क्षीर० — लिपिं करोति । 'दिवाविभा—' (३. २. २१) इत्यादिना टः । अक्षरैर्वित्तोऽक्षरचणः, अक्षरचुञ्चुश्च । 'तेन वित्तश्चुञ्चुप्चणपौ' (५. २. २६) ॥

टीका० — लिपिकरचतुष्कं लेखके । दिवाकरवल्लिपिकरः । 'तेन वित्तश्चुञ्चुप्चणपौ' (५. २. २६) इति चणप्चुञ्चुभ्यामक्षरचणाक्षरचुञ्चू । लिखतेः ण्वुल् । लेखकः ॥

लिखितारक्षविन्यासो लिपिर्लिविरुभे स्त्रियौ ।

क्षीर० — अक्षरविन्यासे त्रयं वर्तते । लिख्यते स्म लिखितम् । लिप्यतेऽनया पत्रं लिपिः । जपादित्वात् पक्षे वत्वम् ॥

टीका० — पुस्तकादौ लिखितेऽक्षरसंस्थाने आरोपणे विन्यासे वा लिपिद्वयम् । लिखितमक्षरसंस्थानं च लिपेर्नामेति कृत्वा नामचतुष्टयमित्यन्ये । 'लिप उपदेहे' । किः । लिपिः । पृषोदरादिबत्वे लिबिः । ङीषि दीर्घान्ते च ॥

स्यात् सन्देशहरो दूतः

क्षीर० — सन्दिश्यते सन्देशो मुखस्वरूपम्। दूयतेऽनेन यथोक्तवादित्वात् पर इति दूतः ॥

टीका० — सन्देशहरद्वयं दूते। 'हरतेरनुद्यमनेऽच्' (३. २. ९)। सन्देशहरः। 'दुद्रु गतौ'। 'दुतनिभ्यां दीर्घश्च' (उ० २. ९०) इति क्तः, दीर्घश्च ॥

दूत्यं तद्भावकर्मणोः ॥ १६ ॥

क्षीर० — 'दूतवणिग्भ्यां च' (वा० ५. १. १२६) इति वक्तव्याद् यः ॥

टीका० — दूतत्वे दूतकर्मणि च दूत्यम्। 'दूतवणिग्भ्यां चेति वक्तव्यम्' (वा० ५. १. १२६) इति यः। ब्राह्मणादेराकृतिगणत्वात् ष्यञि दौत्यमिति भाषावृत्तिः। 'दूत्यं तद्भागकर्मणी' इति पाठ इति केचित्। तत्र 'दूतस्य भागकर्मणी' (४. ४. १२०) इति यत्। भागेन चांशो वर्ण्टक इति गृह्यते(?) ॥

अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि।

क्षीर० — अध्वानं गच्छत्यध्वनीनः। 'अध्वनो यत्खौ' (५. २. १७)। 'आत्माध्वानौ खे' (६. ४. १६९) इति प्रकृतिभावः। पन्थानं गच्छति पथिकः। 'पथः ष्कन्' (५. १. ७५)। पन्थानं नित्यं गच्छति पान्थः। 'पन्थो ण नित्यम्' (५. १. ७६) इति णः पन्थादेशश्च। अदूरविप्रकर्षत्वादनयोः पर्यायत्वम् ॥

टीका० — अध्वनीनपञ्चकं पथिके। 'अध्वनो यत्खौ' (५. २. १७)। अध्वनीनाध्वन्यौ। 'अन्तात्यन्त—' (३. २. ४८) इत्यादिना डः। अध्वगः। 'पन्थो ण नित्यम्' (५. १. ७६) इति णः पन्थादेशश्च। पान्थः। 'पथः ष्कन्' (५. १. ७५) इति ष्कन्। षकारो ङीषर्थः। पथिकः ॥

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च ॥ १७ ॥
राज्याङ्गानि प्रकृतयः

---

१. 'चि' ख. पाठः. २. 'र्ण' च. पाठः.

क्षीर०—स्वं विद्यतेऽस्य स्वामी । 'स्वामिन्नैश्वर्ये' (५. २. १२६) इति साधुः । अमा सह समीपे वा भवोऽमात्यः । 'अमेहकतसित्रेभ्यस्त्यप्' (वा० ४. २. १०४) । कूयते मृग्यते कोशः । कुष्णातेः कोष इत्येके । राजते राष्ट्रम् । दुःखेन गम्यतेऽस्मिन् दुर्गम् । 'सुदुरोरधिकरणे च' (वा० ३. २. ४८) इति डः । बलन्त्यनेनेति बलम् । अङ्गान्यारम्भकाणि । प्रक्रियन्तेऽनया प्रकृतिः ॥

पौराणां श्रेणयोऽपि च ।

क्षीर० – एकमुख्यः सजातीयसमूहः श्रेणिः । प्रकृतयो राज्याङ्गानीत्येव । यत् कात्यः—

"अमात्याश्चापि पौराश्च सद्भिः प्रकृतयः स्मृताः" ॥

टीका०—स्वाम्याद्याः सप्त राज्याङ्गान्युच्यन्ते । प्रकृतिवाच्याश्चैते । प्रकृतिशब्दस्तु पौरश्रेणिष्वपि वर्तते । तत्र स्वामी राजा, अमात्यो मन्त्री, सुहृन्मित्रं, सुवर्णादिमयो भाण्डागारः कोषः, जनपदवती भूमी राष्ट्रं, पर्वतोदकादिभिर्दुर्गमं पुरं दुर्गम् ॥

सन्धिर्नो विग्रहो यानमासनं द्वैधमाश्रयः ॥ १८ ॥
षड् गुणाः

क्षीर०—सन्धानमेकत्वं सन्धिः । विरुद्धं ग्रहणं स्वस्थानात्[3] परमण्डले दाहविलोपादि विग्रहः । यानं प्रयातव्यं प्रति यात्रा । आसनं विग्रहादिनिवृत्तिः । द्विप्रकारं द्वैधम् । 'द्वित्र्योश्च धमुञ्' (५. ३. ४५) । एकेन सन्धायान्यत्र यात्रेत्यर्थः । यद्वा—

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयेत् ।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः" ॥

अशक्त्या बलवदाश्रयणमाश्रयः । गुणा राज्योपकारकाः ॥

---

१. 'द्विविधियोंऽव्ययात्मकः । कू', २. 'मुह्यते' ख. पाठः. ३. 'संस्था' ग. घ., 'स्वात् स्था' क. पाठः.

टीका० — सन्ध्यादिशब्दे गुणशब्दः। तत्रोपहारलक्षणः पणबन्धः सन्धिः। धाञः 'उपसर्गे घोः किः' (३. ३. ९२)। अपहारलक्षणो विग्रहः। ग्रहेः दरवदप्। स्वशक्त्युपचये परस्य व्यसने वा परजिगीषया प्रयाणं यानम्। यातेर्ल्युट्। देशकालाद्यपेक्षया युद्धाभावादुपसंहृतप्रयाणस्य स्थितिरासनम्। आसेर्ल्युट्। बलिनोर्द्विषतोर्मध्ये काकाक्षिवदलक्षितस्योभयत्र वचनेनात्मसमर्पणं द्वैधम्। 'द्विज्योश्च धमुञ्' (५. ३. ४५)। तदुक्तं —

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयेत्।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः" ॥

रिपुणोच्छिद्यमानस्य यद्धर्मविजयिबलवदाश्रयणं स आश्रयः। श्रयतेः 'एरच्' (३. ३. ५६)। तदुक्तं —

"यदा परब(ला?लेना)नुगमनीयतमो भवेत्।
तदा तु संश्रयेत् क्षिप्रं धार्मिकं बलिनं नृपम्" ॥

शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः।

क्षीर० — **शक्यन्ते जेतुमाभिः शक्तयः। कोशदण्डर्द्धिः प्रभुशक्तिः। उद्यम्य सहनमुत्साहशक्तिः। मन्त्रः पञ्चाङ्गो मन्त्रशक्तिः ॥**

टीका० — तिस्रः शक्तयः प्रभावशक्तिरुत्साहशक्तिर्मन्त्रशक्तिश्चेति। तत्र कोशदण्डबलं प्रभुशक्तिः। बलवती विक्रमचेष्टा उत्साहशक्तिः। सन्ध्यादीनां यथावत्प्रयु(क्त?क्ति)ज्ञानबलं मन्त्रशक्तिः ॥

क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम् ॥ १९ ॥

क्षीर० — **प्रागवस्थातः शक्तिसिद्ध्योरपचयः क्षयः। साम्यं स्थानम्। उपचयो वृद्धिः। नीतेरन्यत्र धर्मादिस्त्रिवर्गः ॥**

टीका० — क्षयत्रयं त्रिवर्गवाच्यम्। अयं नीतिवेदिनां त्रिवर्गः,

---

१., २. 'का' क. ग. ङ. च. छ. पाठः.

धर्मार्थकामैरितरेषाम्। आत्मनोऽपचयः शत्रुकर्मोपचयनिमित्तकः क्षयः । तद्विपर्ययो वृद्धिः। उभयोः साम्यं स्थानम्। तदुक्तं —

"परकर्मोदये नेतुः क्षयो वृद्धिर्विपर्यये ।
तुल्यकर्मफले स्थानं कर्मसु ज्ञेयमात्मनः ॥"

इति । एते च क्षयादयोऽष्टवर्गस्यापचयोपचयसाम्याद् भवन्ति।

"कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरब(ला)दानं (च?) शून्यानां च निवेशनम् ॥"

इत्येवाष्टवर्गः ॥

स प्रतापः प्रभावश्च यत् तेजो दण्डकोशजम् ।

क्षीर०—प्रतपत्यनेन प्रतापः। प्रभवत्यनेन प्रभावः। तेज उत्कटत्वम्। यद् भरतः —

"अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत् तेजः समुदाहृतम्" ॥

टीका० — दमो दण्डः। तात्स्थ्याद् बलमपि । ततो जातं कोशाच्च यत् तेजस्तत्र प्रतापद्वयम्। तपेः घञ्। प्रतापः। 'श्रिणीभुवोऽनुपसर्गे' (३. ३. २४) इति घञ्। भावः। ततः प्रकृष्टो भावः प्रभावः। प्रादिसमासः ॥

सामदाने भेददण्डावित्युपायचतुष्टयम् ॥ २० ॥

क्षीर० — उपैत्यनेनोपायः। मायोपेक्षेन्द्रजालान्यत्रैवान्तर्भूतानि ॥

टीका० — (भेद?साम)चतुष्कमुपायाख्यम्। यद्यपि

"साम दानं च भेदश्च दण्डश्चेति चतुष्टयम्।
मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः ॥"

---

१. 'द' ख. पाठः.

इति। तथापि मायोपेक्षे दण्डान्तर्गते। इन्द्रजालं च भेदेऽन्तर्गतम्। तेनापरत्रयं पृथङ् न कृतम्। तत्र परस्माद् विश्लेषणं भेदः। दण्डः पीडा। साम अनुकूलनम्। दानमुपहारः॥

साहसं तु दमो दण्डः

क्षीर०—सहसि बले भवं साहसम्॥

टीका०—नाममात्रेणोक्तानां प्रत्येकं पर्यायमाह। साहसत्रयं **दण्डे**। सहसा बलेन निर्वृत्तं साहसम्। 'तेन निर्वृत्तम्' (४. २. ६८) इत्यण्। दमनं दमः। 'दम उपशमे'। ण्यन्ताद् घञ्। 'णेरनिटि' (६. ४. ५१) इति णिलोपः। 'मितां ह्रस्वः' (६. ४. ९२)। अस्मादेव धातोः 'अमन्ताड्डः' (उ० १. ११९)। दण्डः॥

साम सान्त्वम्

क्षीर०—स्यति वैरं सामयति वा साम प्रियवचनादि[1]। 'साम सान्त्वने'। 'सान्त्व सामप्रयोगे'॥

टीका०—सामद्वयं **सामनि**। वेदे सामोक्तम्। अत्यर्थमधुरे सान्त्वम्॥

अथो समौ।

भेदोपजापौ

क्षीर०—संहतयोर्भेदनं भेदः। उपांशु जपनमुपजापः॥

टीका०—भेदद्वयं **भेदे**। भिदेर्जपेश्च घञ्। दानं च ब्रह्मवर्ग एवाभिहितम्। तेनात्र नोक्तम्॥

उपधा धर्मादैर्यत् परीक्षणम्॥ २१॥

क्षीर०—उपधीयते समीपे ढौक्यते परीक्षार्थमुपधा। धर्मार्थका-

---

१. 'नि' ग. घ. ङ. पाठः.

मभयोपन्यासेनाशयान्वेषणम् । यत् कौटिल्यः — 'उपधाभिः शौचाचार-परिज्ञानममात्यानाम्' (अधि० १. अध्या० १०) ॥

टीका० — धर्माद्यैर्धर्मार्थकामभेदै राज्ञोऽमात्यानां परीक्षणमुपधा । अन्तर्धावत् ॥

पञ्च त्रिषु

क्षीर० — निश्शलाकान्ता वक्ष्यमाणा वाच्यलिङ्गाः ॥

टीका० — निश्शलाकान्ताः पञ्च त्रिषु ॥

अषडक्षीणो यस्तृतीयाद्यगोचरः ।

क्षीर० — न षडक्षीणि यत्र अषडक्षीणो मन्त्रः । 'अषडक्षाशितङ्गु—' (५. ४. ७) इति स्वार्थे खः । यदाहुः — 'षट्कर्णो भिद्यते मन्त्रः' । अत एव तृतीयादीनां नृणामगोचरः ॥

टीका० — द्वाभ्यां यो मन्त्रः असावषडक्षीणः । नास्मिन् षडक्षीणि विद्यन्त इत्यषडक्षीणः । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्—' (५. ४. ११३) इति षच् समासान्तः । ततः 'अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः' (५. ४. ७) ॥

विविक्तविजनच्छन्ननिश्शलाकास्तथा रहः ॥ २२ ॥
रहश्चोपांशु चालिङ्गे

क्षीर० — विविच्यते पृथक्क्रियते स्म विविक्तम् । विगतो जनोऽत्र विजनम् । छाद्यते स्म छन्नम् । निर्गता शलाका व्यथकोऽत्र निश्शलाकः । रहयति रह इत्येके । रहश्शब्दः सान्तः क्लीबे । अन्योऽव्ययम् , उपांशु च । अलिङ्गे अव्यये द्वे । अनुरहसं च ॥

टीका० — विविक्तसप्तकं विजने । 'विचिर् पृथग्भावे' । क्तः । 'विविक्तं त्रिष्वि'ति रुद्रः । विगतो जनोऽस्मादिति विजनः । 'वा दान्तशान्तपूर्णदस्त-

स्पष्टच्छन्नज्ञप्ताः' (७. २. २७) इति निपातनाच्छन्नः। निर्गता शलाका अस्मादिति निश्शलाकः। शलाका शारिका मदनशारिकेति पर्यायाः।

"शल्यं श्वाविच्छलाका स्याच्छारा मदनशारिका"

इति तालव्यादौ रभसः। रमन्तेऽत्रेति रहः। 'देशे ह च' (उ० ४. २१६) इत्यसुन् हश्चान्तादेशः। रहः। सान्तं क्लीबे। द्वितीयो रह उपांशुशब्दश्चालिङ्गे अव्यये॥

रहस्यं तद्भवे त्रिषु।

क्षीर०— रहसि भवं रहस्यम्। दिगादित्वाद् यत्॥

टीका०— रहोभवं रहस्यम्। दिगादियत्॥

समौ विस्रम्भविश्वासौ

क्षीर०— विस्रम्भणं विस्रम्भः। विश्वास आश्वासः॥

टीका० — विस्रम्भद्वयं विश्वासे। 'स्रन्भु विश्वासे'। दन्त्यादिः। घञ्। विस्रम्भः। 'श्वस प्राणने'। घञ्। विश्वासः॥

भ्रेषो भ्रंशो यथोचितात्॥ २३॥

क्षीर०— यथोचिताद् रूपाद् भ्रंशोऽधःपातो भ्रेषः। 'भ्रेष चलने'॥

टीका० — यथोचिताद् यथाप्राप्ताद् भ्रंशो भ्रेषः। मूर्धन्यषः। 'भ्रेषृ चलने'। घञ्॥

अभ्रेषन्यायकल्पास्तु देशरूपं समञ्जसम्।

क्षीर०— नियतमीयते न्यायः। 'परिन्योर्नीणोः—' (३. ३. ३७) इति घञ्। कल्पनं कल्पः सामर्थ्यम्। दिश्यमानस्योचितस्य रूपं देशरूपम्। प्रशस्तं देशनं वा। सम्यगञ्जसा सत्यमत्र समञ्जसम्॥

टीका० — अभ्रेषपञ्चकं न्याये। नञा अभ्रेषः। 'परिन्योर्नीणोर्धूताभ्रेषयोः' (३. ३. ३७) इति घञ्। न्यायः। प्रलये कल्प उक्तः। सङ्गतमञ्ज-

---

१. 'शिदर्शनं' ग. घ. पाठः.

स्तत्त्वं समञ्जसम् । 'अच् प्रत्यन्ववपूर्वात् सामलोम्नः' (५. ४. ७५) इत्यत्र अजिति योगविभागादच् ॥

युक्तमौपयिकं लभ्यं भजमानाभिनीतवत् ॥ २४ ॥
न्याय्यं च त्रिषु षट्

क्षीर० — उपाय एवौपयिकम् । विनयादित्वाद् 'उपायाद्ध्रस्वश्च' (ग० ५. ४. ३४) इति ठक् । अभिनीयते स्माभिनीतम् । तद्वन्न्याय्यं न्यायादनपेतम् । 'धर्मपथ्यर्थ—' (४. ४. ९२) इति यत् । उचितं साम्प्रतं च ॥

टीका० — युक्तषट्कं न्याय्ये । औचित्य इति यावत् । युजेः क्तः । युक्तम् । औपयिकमिति । विनयादिषु 'उपायाद्ध्रस्वश्च' (ग० ५. ४. ३४) इति ठग्ध्रस्वत्वे । स्वार्थे 'पोरदुपधात्' (३. १. ९८) इति यति लभ्यम् । भजेः शानचि भजमानम् । नयतेः क्तः । अभिनीतम् । न्यायादनपेतमिति न्याय्यम् । यथा भजमानाभिनीते युक्ताभिधायके तथा न्याय्यमपीति यच्छब्दस्यार्थः । युक्तषट्कं त्रिषु । न्यायागते द्रव्यादौ युक्तषट्कम्[1], अप्रेषपञ्चकं च न्याय्य इति केचित् ॥

सम्प्रधारणा तु समर्थना ।

क्षीर० — सम्प्रधार्यते भ्रष्टं स्वरूपमापद्यतेऽनयेति सम्प्रधारणा, युक्तायुक्तपरीक्षा ॥

टीका० — सम्प्रधारणद्वयं समर्थने । निर्धारणे इत्यर्थः ॥

अपवादस्तु निर्देशो निदेशः शासनं च तत् ॥ २५ ॥
शिष्टिराज्ञा च

क्षीर० — अपनम्य वदनमपवाद मुखस्वरूपम् । निश्शेषेण देशनं निर्देशः । शासनं नियोजनं शिष्टिः । आज्ञापनमाज्ञा ॥

टीका० — अपवादषट्कमाज्ञायाम् । अपवदनमपवादः । घञ् । दिशेर्घञि निर्देशनिदेशौ । शासेर्ल्युटि शासनम् । शिषेः क्तिन् । शिष्टिः । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । आज्ञा ॥

---

१. 'कं न्या' ग. घ. पाठः.

संस्था तु मर्यादा धारणा स्थितिः।

क्षीर० — सन्तिष्ठतेऽनया संस्था। मर्या इति सीमार्थेऽव्ययं, तत्र दीयते मर्यादा॥

टीका० — संस्थाचतुष्कं **मर्यादायाम्**। न्यायपथस्थितावित्यर्थः। आज्ञावत् संस्था। पर्याङ्पूर्वाद् दाञो मर्यादा। नैरुक्तो वर्णविपर्ययः। धारेः 'ण्यासश्रन्थो युच्' (३. ३. १०७)। धारणा। तिष्ठतेः क्तिन्। स्थितिः॥

आगोऽपराधो मन्तुश्च

क्षीर० —आ अगति कुटिलं गच्छत्यागः, असन्तः क्लीबे। मन्यते हृदि मन्तुः॥

टीका० — आगस्त्वयमपराधे। 'इण आगोऽपराधे' (उ०४. २१३) इत्यनेन इणोऽसुन् आगादेशश्च। 'अभ्यर्णमागस्कृतमस्पृशद्भिः' (स० २. श्लो० ३२) इति रघुः। अपराधनमपराधः। जन्तुवन्मन्तुः॥

समे तूद्दानबन्धने॥ २६॥

क्षीर० — उद्दीयतेऽस्मिन् उद्दानम्। 'दो अवखण्डने' 'देङ् रक्षणे' वा॥

टीका०— उद्दानद्वयं बन्धने। 'दो अवखण्डने'। भावे ल्युट्। उद्दानम्। 'बन्ध बन्धने'। ल्युट्। बन्धनम्॥

द्विपाद्यो द्विगुणो दण्डः

क्षीर० — द्वौ पादौ प्रमाणमस्य द्विपाद्यः। 'पणपादमाषशताद् यत्' (५. १. ३४)। प्राण्यङ्गत्वाभावात् 'पद्यत्यतदर्थे' (६. ३. ५३) इति पद्भावाभावः॥

टीका० — यथोचिताद् द्विगुणो दण्डो द्विपाद्यास्यः। यथा धान्य-

षड्भागहरणे प्राप्ते[1] द्विभागहरणम् । द्वौ पादौ परिमाणमस्येति 'पणपादमाषशताद् यत्' (५. १. ३४) । 'पादः पद्' (६. ४. १३०) इति प्राण्यङ्गग्रहणादत्र[2] न पद्भावः ॥

भागधेयः करो बलिः ।

क्षीर० — भाग एव भागधेयः । 'भागरूपनामभ्यो[3] धेयः' (वा० ५. ४. ३६) । कीर्यते प्रत्येकं करः । बलन्तेऽनेन बलिः । 'राजग्राह्यः षड्भागादिः भागः । प्रत्येकं स्थावरजङ्गमादादेयः करः । नियोज्योपजीव्यो बलि'रित्यवान्तरभेदोऽर्थशास्त्रोक्तो नाश्रितः ॥

टीका० — राजदेये करे भागधेयत्रयम् । प्राग् व्युत्पादितम् ॥

घट्टादिदेयं शुल्कोऽस्त्री

क्षीर० — घट्टन्तेऽनेन घट्टयति वा घट्टो नदीतरणस्थानम् । आदिशब्दाद् गुल्मप्रतोल्यादौ प्रावेश्यनैष्क्रम्यद्रव्येभ्यो राजग्राह्यो भागः शुल्कः, शलँति शलयति वा सुखेन यात्यनेनेति ॥

टीका० — घट्टो वर्त्म । आदिना गुल्मादि । तत्र रक्षार्थं राजदेये शुल्कोऽस्त्री, तालव्यादिश्च ॥

प्राभृतं तु प्रदेशनम् ॥ २७॥

उपायनमुपग्राह्यमुपहारस्तथोपदा ।

क्षीर० — प्रकर्षेणाराधनार्थमाभ्रियते ढौक्यते स्म प्राभृतम् । प्रदिश्यते प्रदीयते प्रदेशनम् । उप समीपंमयन्तेऽनेनोपायनम्[4] । उपगृह्यते उपग्राह्यम् । उपह्रियते उपहारः । उपदीयते उपदा । कौशलिकं ढौकनिकं च । उपदोत्कोच इत्येके ।

"उपप्रदानमुत्कोच उपदा लञ्चया[6] समाः" ॥

---

१. 'ऽऽपि द्वि' ङ. छ. पाठः. २. 'दन्यत्र' ख. ङ. छ. पाठः. ३. 'भ्यः स्वार्थे धे', ४. 'व' ख. पाठः. ५. 'पे अय' ग. पाठः, ६. 'म्ब' ख. ङ. पाठः.

टीका० — प्राभृतद्वयं पाहुड इति ख्याते। भृत्रः क्तः। प्राभृतम्। उपायनचतुष्कमुत्कोचादावुपहारे। एतेः ल्युट्। उपायनम्। ग्रहेर्ण्यति उपग्राह्यम्। हारवदुपहारः। अङि उपदा। षडेव केचिदुपहारे वर्णयन्ति॥

यौतकादि तु यद् देयं सुदायो हरणं च तत्॥ २८॥

क्षीर० — युतयोर्वधूवरयोरिदं यौतकम्। आदिशब्दाद् बन्धुदत्तादि। सुष्ठु दीयते सुदायः। स दाय इत्येके। यच्छाश्वतः —

"यौतकादिधनं दायो दायो दानं च कथ्यते"।

हियते हरणम्॥

टीका० — कन्यादानकाले जामात्रे दानं यौतकं, तत्र दायद्वयम्। युतकं योनिसम्बन्धः, तत्र भवं यौतकम्। अन्तःस्थादिः। आदिना व्रतभिक्षादिः। ददातेः घञ्। दायः। हरतेः ल्युट्। हरणम्॥

तत्कालस्तु तदात्वं स्यात्

क्षीर० — स चासौ कालश्च तत्कालः। तदेत्यस्य भावस्तदात्वम्॥

टीका० — तत्कालद्वयं वर्तमाने काले॥

स्त्र्यायतिः काल उत्तरः।

क्षीर० — आ एत्यायतिरागामिकालः॥

टीका० — भाविनि काले आयतिः॥

सान्दृष्टिकं फलं सद्यः

क्षीर० — सन्दृष्टं प्रत्यक्षं प्रयोजनमस्य सान्दृष्टिकम्। समानेऽहनि सद्यस्तात्कालिकं फलम्। 'सद्यःपरुत्परारि —' (५. ३. २२) इति साधुः॥

---

१. 'के। हि' क. ख. पाठः. २. 'णम्। यल्लक्ष्यं — सत्त्वानुरूपं हरणीकृतश्रीः। तत्का' ख. पाठः.

टीका० — सद्य इति तात्कालिकं फलं सान्दृष्टिकम् । अध्यात्मादित्वाट्ठक् ॥

उदर्कः फलमुत्तरम् ॥ २९ ॥

क्षीर० — उदृच्यतेऽभिलाषात् स्तूयते उदर्कः ॥

टीका० — भावि फलमुदर्कः । अर्कवत् ॥

अदृष्टं वह्नितोयादि

क्षीर० — भयमित्युत्तरेण योज्यम् । आदिशब्दात् पिशाचाशन्यादि ॥

टीका० — वक्ष्यमाणेन भय(सम्बन्धे?शब्दे)न सम्बन्धाद् वह्नितोयाद्यदृष्टं[1] भयमुच्यते, दैवजनितत्वात् । आदिना वृष्टिशलभमूषिकादि । भयहेतुत्वाद् भयम् ॥

दृष्टं स्वपरचक्रजम् ।

क्षीर० — स्वराष्ट्राच्चौराटविकादिभयं[2] परराष्ट्राद् दाहविलोपादिभयं च ॥

महीभुजामहिभयं स्वपक्षप्रभवं भयम् ॥ ३० ॥

क्षीर० — स्वपक्षाद् राजपुत्रादेरहेरिव गृहस्थिताद् भयम् ॥

टीका० — स्वपक्षमात्रप्रभवं[3] यद् राज्ञां युद्धे भयं, तदहेरिव भयमहिभयम् । पक्षशब्देन भृत्यादयः सप्त गृह्यन्ते[4] । तथाहि —

"निजोऽथ मैत्रश्च समाश्रितश्च सम्बन्धजः कार्यसमुद्भवश्च ।
भृत्यो गृहीतो विविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति" ॥

प्रक्रिया त्वधिकारः स्यात्

---

१. 'ष्ट' क. ख. ग. ङ. छ. पाठः. २. 'चौ', ३. 'क्षजाद् य' ख. पाठः. ४. 'भजन्ति' ङ. छ. पाठः.

क्षीर०—प्रारम्भात् करणं प्रक्रिया। अधिक्रियते प्रस्तूयतेऽधिकारः, व्यवस्थास्थापनमित्यर्थः॥

टीका०—नृपादीनां चामरोद्धू(ल्ह)नादिप्रतिपत्तौ प्रक्रियाद्वयम्। 'कृञः श—'(३.३.१००) इति शः। 'रिङ् शयग्लिङ्क्षु' (७.४.२८) इति रिङ्। 'अचि श्नुधातु —' (६.४.७७) इत्यादिना इयङ्। प्रक्रिया॥

चामरं तु प्रकीर्णकम्।

क्षीर०—चमर्या इदं चामरम्। प्रकीर्यते विक्षिप्यते प्रकीर्णकम्॥

टीका०—चामरद्वयं **चामरे**। चमरो मृगः, तस्यायमिति चामरः। 'कृ विक्षेपे'। कर्मणि क्तः। ततः स्वार्थे कन्। प्रकीर्णकम्॥

नृपासनं यत् तद् भद्रासनं

क्षीर०—भद्रस्यासनं, भद्रं रूप्यादिमयं वा आसनं भद्रासनम्॥

टीका०—नृपासनद्वयं नृपासनसामान्ये॥

सिंहासनं तु तत्॥ ३१॥

हैमं

क्षीर०—हेम्न इदं हैमं सिंहोपलक्षितमासनम्॥

टीका०—तदेवासनं सौवर्णं सिंहासनाख्यम्॥

छत्रं त्वातपत्रं

क्षीर०—छाद्यतेऽनेन छत्रम्। आतपात् त्रायत आतपत्रम्॥

टीका०—छत्रद्वयं **छत्रे**। छादेः ष्ट्रन्। छत्रवद् ह्रस्वत्वम्। आतपात् त्रायत इत्यातपत्रम्॥

---

१. 'च' ख. च. पाठः.

राज्ञस्तु नृपलक्ष्म तत् ।

क्षीर० — तत् छत्रम् । यल्लक्ष्यं —

"नृपतिककुदं दत्त्वा यूने सितातपवारणम्" ॥

टीका० — राज्ञश्छत्रं कनकदण्डं नृपलक्ष्म । नान्तम् ॥

भद्रकुम्भः पूर्णकुम्भः

क्षीर० — भद्रार्थं भद्रार्थो वा कुम्भः ॥

टीका० — भद्रकुम्भद्वयं पूर्णकुम्भे ॥

भृङ्गारः कनकालुका ॥ ३२ ॥

क्षीर० — भृज्यते भ्रियते वा भृङ्गारः । सौवर्णी आलुका ॥

टीका० — भृङ्गारद्वयं कनकघटादौ । कनकस्यालुका कर्करी कनकालुका ॥

निवेशः शिबिरं षण्डे

क्षीर० — निवेश्यते सन्निवेशेन स्थाप्यते निवेशः सैन्यावासः । शेरतेऽस्मिञ्छिबिरम् । स्कन्धावारोऽपि ॥

टीका० — आगन्तुकसैन्यस्य[1] वाटके कटके वा निवेशद्वयम् । विशेर्घञ् । निवेशः । 'अजिरशिशिरशिबिर —' (उ० १. ९६) इत्यादिना शेतेर्निपातनाच्छिबिरम् । अनेकार्थत्वादन्तःपुरेऽपि[2] ॥

सज्जनं तूपरक्षणम् ।

क्षीर० — सत् शोभनं जन्यते सज्जनं, सज्ज्यतेऽनेनेति वा । उपरक्ष्यतेऽनेनोपरक्षणं सैन्यस्य प्रगुणीकरणं गुल्मको वा ॥

---

१. 'स्या' ज., 'स्य दाठके' ख. पाठः. २. 'रेऽपि ख. पाठः.

टीका०—बलैकदेशेन यद् बलस्य रक्षणं तत्र सज्जनद्वयम्। 'ग्लुञ्चु-ष्वज्ज गतौ'। ल्युट्। जश्त्वचुत्वे। सज्जनम्॥

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधम्॥ ३३॥

क्षीर०—चतुरङ्गा हि सेना। पदातीनां समूहः पादातम्। भिक्षादित्वादण्॥

टीका०—हस्त्यश्वादिचतुष्कं सेनाङ्गम्। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गा-नाम्' (२. ४. २) इति समासे एकवचनम्। पदातिसमूहे पादातम्। समू-हेऽण्॥

दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी॥ ३४॥
इभः स्तम्बेरमः पद्मी

क्षीर०—दन्तौ[1] स्तोऽस्य दन्ती। दन्तावलः। 'दन्तशिखात् संज्ञा-याम्'(५. २. ११३)। वलच्। 'वले' (६. ३. ११८) इति दीर्घः। हस्ती। 'हस्ताज्जातौ' (५. २. १३३) इतीनिः। द्वौ रदावस्य द्विरदः। न एकेन पिबत्यनेकपः। द्वाभ्यां पिबति द्विपः। मतङ्गादृषेर्जातो मतङ्गजः। गजति माद्यति गजः। नगे भवो नागः। न अगो वा। कुञ्जौ कुम्भाधोगतौ दंष्ट्रे वा स्तोऽस्य कुञ्जरः। 'खमुखकुञ्जेभ्यो रो वक्तव्यः' (वा० ५.२.१०७)। वारयत्यरीन् वारणः। एतीभः। स्तम्बे तृणे रमते स्तम्बेरमः। 'स्तम्ब-कर्णयो रमिजपोः' (३. २. १३)। अच्। पद्मानि यौवने रक्ता बिन्दवः सन्त्यस्य पद्मी। सामजः सिन्धुरः कुम्भी च॥

टीका०—दन्तिपञ्चदशकं हस्तिनि। दन्तयोगाद् दन्ती। 'दन्तशि-खात् संज्ञायाम्' (५. २. ११३) इति वलच्। 'वले' (६. ३. ११८) इति दीर्घः। दन्तावलः। हस्तीति। 'हस्ताज्जातौ' (५. २. १३३) इतीनिः। दन्त-द्वययोगाद् द्विरदः। करेणास्येन च पिबतीत्यनेकपः। अत एव द्विपः। 'सुपि' (३. २. ४) इति योगविभागात् कः। मतङ्गादृषेर्जातो मतङ्गजः। गजतीति

---

१. 'दन्तोऽस्यास्ति द' ग. घ. ङ. पाठः. २. 'ङर्षेर्जा' ख. ङ. छ. पाठः.

गजः । अच् । नग इव दृश्यत इति नागः । शेषेऽण् । कुञ्जौ हनू, तद्योगात् कुञ्जरः । 'खमुखकुञ्जेभ्य उपसङ्ख्यानम्' (वा० ५. २. १०७) इति रः । परबलं वारयतीति वारणः । नन्द्यादिः । करयोगाद् इनौ करी । 'इणः कित्' (उ० ३. १५४) इति भन् । इभः । 'स्तम्बकर्णयो रमिजपोः' (३. २. १३) इति अच् । स्तम्बेरमः । पद्मं बिन्दुजालकं, तद्योगाद् इनिः । पद्मी ॥

यूथनाथस्तु यूथपः ।

क्षीर० — इतोऽश्वेभ्यः प्राग् गजवर्गः ॥

टीका० — यूथनाथद्वयं यूथाधिपतौ करिणि ॥

मदोत्कटो मदकलः

क्षीर० — मदेन दानाम्बुना कलो मनोज्ञः ॥

टीका० — अन्तर्मदे हस्तिनि मदोत्कटद्वयम् ॥

कलभः करिपोतकः ॥ ३५ ॥

क्षीर० — कलो भाति, कं लभते वा कलभः ॥

टीका० — कलभद्वयं करिपोते । § 'शृशलिकलिभ्योऽभच्' (उ० ३. १२२) ॥

प्रभिन्नो गर्जितो मत्तः

क्षीर० — प्रभिद्यते स्म प्रभिन्नः[1] । गर्जा सञ्जातास्य गर्जितः ॥

टीका० — प्रभिन्नत्रयं मत्तहस्तिनि । भिदिगर्जिमदिभ्यः क्तः । प्रभिन्नः ॥

---

१. 'न्नः । इतश्च गर्जि' ख. पाठः.

---

§ 'कृशलिकलिगर्दिभ्योऽभच्' इति मुद्रितोणादिपाठः ।

समावुद्धान्तनिर्मदौ ।

क्षीर० — उद्धमति स्मोद्धान्तः ॥

टीका० — कालवशान्निगलितमदे उद्धान्तद्वयम् । 'ढुवम उद्गिरणे' । 'अनुनासिकस्य —' (६. ४. १५) इत्यादिना दीर्घः । उद्धान्तः ॥

राजवाह्यस्त्वौपवाह्यः

क्षीर० — उपवाह्याः समन्ताद् वोढव्याः सन्त्यस्यौपवाह्यः ॥

सन्नाह्यः समरोचितः ॥ ३६ ॥

क्षीर० — सन्नद्धं कर्तुमर्हति । समराय योग्यत्वात् ॥

हास्तिकं गजता वृन्दे

क्षीर० — हस्तिनां समूहो हास्तिकम् । 'अचित्तहस्तिधेनोष्ठक्' २. ४७) । गजानां समूहो गजता । '†गजाच्च' (वा० ४. २. ४३) वक्तव्यात् तल् ॥

टीका० — **गजवृन्दे** हास्तिकद्वयम् । 'अचित्तहस्तिधेनोष्ठक्' (४. २. । हास्तिकम् । †'गजाच्चेति वक्तव्यम्' (वा० ४. २. ४३) इति तल् । ा ॥

करिणी धेनुका वशा ।

क्षीर० — धयन्त्येनां धेनुका । वष्टि कामयते वशा ॥

टीका० — करिणीत्रयं हस्तिन्याम् । धेनुरेव धेनुका । 'वश कान्तौ' । । वशा तालव्यशा । अतः परं गात्रापरपर्यायान्ता हस्तिनोऽवयवाः क- ॥

---

१. 'ले' ख. पाठः.

---

† 'गजसहायाभ्यां च' इति मुद्रितवार्त्तिकपाठः ।

गण्डः कटः

क्षीर०—'गडि वदनैकदेशे'। कटति वर्षति मदं कटः॥

टीका०—मदनिर्झारस्थाने गण्डद्वयम्। खड्गिनि गण्ड उक्तः। कटेः अच्। कटः॥

मदो दानं

क्षीर०—माद्यत्यनेन मदः। 'मदोऽनुपसर्गे' (३. ३. ६७)। अप्। द्यति खण्डयत्यनेनेति दानम्॥

टीका०—मदद्वयं मदे। द्वयं साधितम्॥

वमथुः करशीकरः॥ ३७॥

क्षीर०—वम्यते वमथुः। 'द्वितोऽथुच्' (३. ३. ८९)॥

टीका०—वमनजले वमथुद्वयम्। 'टुवम उद्गिरणे'। 'द्वितोऽथुच्' (३. ३. ८९)। वमथुः॥

कुम्भौ तु पिण्डौ शिरसः

क्षीर०—कुम्भाकृती मांससङ्घातौ॥

टीका०—शिरःपिण्डौ कुम्भाख्यौ॥

तयोर्मध्ये विदुः पुमान्।

क्षीर०—वेत्ति संज्ञां[1] यस्मादङ्कुशस्थानात् स विदुः। यत् पालकाप्यः—

"तत्र रक्षावितानेऽद्रे विदू द्वौ श्रवणे गतौ।
प्राक् च पश्चाच्च तिर्यक् च षड्भेदाङ्कुशधारणा"[2]॥

---

१ 'नं दन्तिवो॥' ग. घ. ङ. पाठः. २. 'ज्ञायां य' ख. ग. घ. ङ. पाठः.

टीका० — **कुम्भयोर्मध्यभागो** विदुः। अङ्कुशाघातं वेत्त्यस्मिन्निति 'कुर्भश्च' (उ० १. २२) इति बाहुलक औणादिकः कुः॥

अवग्रहो ललाटं स्याद्

क्षीर० — **अवगृह्यतेऽङ्कुशेनावग्रहः॥**

टीका० — ललाटेऽवग्रहो दीर्घशून्यो वृष्टचभावे साधितः।

"गजालिके वृष्टिरोधे प्रतिबन्धेऽप्यवग्रहः"

इति रुद्रश्च॥

ईषिका त्वक्षिकूटकम्॥ ३८॥

क्षीर० — **ईषा लाङ्गलकीलिकेवेषिका॥**

टीका० — अक्षिकूटमक्षिगोलं, तत्रेषिका। दीर्घादिः। 'ईष गतिहिंसादानेषु'। ण्वुल्। उणादौ तु 'ईषेः किद्धूस्वश्च' (उ० ४. २१) इतीकनि धातोर्ह्रस्वत्वे ह्रस्वादि दीर्घमध्यं च। 'ऐषीकमस्त्रमि'त्यादिमुरारेर्दीर्घमध्यप्रयोगः। शरकाष्ठिकायां वीरणकाष्ठिकायां चेदगेव। तथाच—'शरत्समयमिव रोचमानेषीकं द्विरदमि'त्याश्चर्यमञ्जरी। शरत्पक्ष इषीका॥

अपाङ्गदेशो निर्याणं

क्षीर० — **निर्यात्यश्रु अनेन निर्याणम्॥**

टीका० — काशीति ख्याते नेत्रान्ते निर्याणं, निर्यात्यनेन दृष्टिरिति। ल्युट्॥

कर्णमूलं तु चूलिका।

क्षीर० — **चोद्यते पार्श्वगमनायाङ्कुशेनास्यां चूलिका॥**

---

१. 'दुसंज्ञितः। अ' ग. घ. ङ. पाठः.

टीका० — कर्णमूले चूलिका । 'चूल समुच्छ्राये' । ण्वुल् ॥

अधः कुम्भस्य वाहित्थं

क्षीर० — वाह्यतेऽनेनाङ्कुशचोदनया **वाहित्थम्** । मदवाहिनि स्थाने तिष्ठति । वाहिस्थापभ्रंशोऽयं वा ॥

टीका० — कुम्भस्येति **वातकुम्भस्याधो** वाहित्थम् । 'वाहित्थं वातकुम्भाध' इति भागुरिः । वातकुम्भश्च ललाटाधोभागः ॥

प्रतिमानमधोऽस्य च ॥ ३९ ॥

क्षीर० — अस्य वाहित्थस्याधः **प्रतिमानम्** । प्रतिमीयतेऽनेनेति । 'डुमिञ् प्रक्षेपणे' । 'मीनातिमिनोतिदीङां ल्यपि च' (६. १. ५०) इत्यात्वम् ॥

टीका० — वाहित्थस्याधोभागो **दन्तयोर्मध्यं** प्रतिमानम् । मातेर्ल्युट् ॥

आसनं स्कन्धदेशः स्यात्

क्षीर० — आस्यतेऽस्मिन्नासनम् ॥

टीका० — आसनद्वयं **हस्तिपकोपवेशनस्थाने** । आसनमुक्तम् ॥

पद्मकं बिन्दुजालकम् ।

क्षीर० — पद्मप्रतिकृती रक्तत्वात् **पद्मकम्** । तारुण्ये हस्तिनां देहे रक्तबिन्दवः स्युः ॥

टीका० — सिध्मादिरूपबिन्दुसमूहे पद्मकद्वयम् । पद्ममेव पद्मकम् ॥

पक्षभागः पार्श्वभागो दन्तभागस्तु योऽग्रतः ॥ ४० ॥

क्षीर० — हस्तिनां योऽग्रतो भागः ॥

---

१. 'ह्य' ग. पाठः.

टीका०— पक्षभागद्वयं **पार्श्वदेशे**। दन्तसन्निहितोऽग्रभागो दन्तभागः॥

द्वौ पूर्वपश्चाज्जङ्घादिदेशौ गात्रापरे क्रमात्।

क्षीर० — **हस्तिनां पूर्वः पादजङ्घादिर्भागो गात्रम्। पश्चाद्भागोऽपरम्॥**

टीका० — पूर्वमग्रं, पूर्वजङ्घा आदिदेशो यस्य **तद्** गात्रम्। पश्चाज्जङ्घा आदिदेशो यस्य **तत्रापरम्**। पूर्वजङ्घाभागो गात्रं पश्चाज्जङ्घाभागोऽपरमित्यर्थः॥

तोत्रं वैणुकम्

क्षीर० — **तुद्यतेऽनेन वेणुमयेन प्रेषणेनेति तोत्रम्॥**

टीका० — तोत्रद्वयं **कनाल** इति ख्याते। 'तुद व्यथने'। दाम्नीशस —' (३. २. १८२) इत्यादिना ष्ट्रन्। तोत्रम्। वेणुना निर्वृत्तं **वैणुकम्**। 'निर्वृत्तेऽक्षद्यूतादिभ्यः'(४. ४. १९) इति ठक्। क्वचिद् वेणुकमिति पाठः। तदा च स्वार्थिकः कन्॥

आलानं बन्धस्तम्भे

क्षीर० — **आलायते बध्यतेऽत्रालानम्॥**

टीका० — आलानद्वयं **वाखोड** इति ख्याते। बन्धस्तम्भ इति समाहारद्वन्द्व(मि?इ)ति बन्धस्तम्भयोरुभयोरप्यालानं वर्तते इति केचित्। प्रयोगोऽप्युभयत्र दृश्यते। 'नालानं करिणां सत्रे' (इति),

"तद्वज्जालानतां प्राप्तैः सह कालागरुद्रुमैः"

इति च। लातेः करणे ल्युट्॥

अथ शृङ्खले॥ ४१॥

अन्दुको निगलोऽस्त्री स्याद्

---

१. 'दो' ग. घ. ङ. पाठः.

क्षीर० — शृणाति बन्धने[1] शृङ्खलम् । अन्दति बध्नात्यन्दूः । 'अति-अदि बन्धने' । स्वार्थे कन् । 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) । निगल्यते बध्यतेऽनेनेति निगलः[2] ॥

टीका० — शृङ्खलत्रयं सिद्धमिति[3] ख्याते । शिञ्जन्तः स्खलन्त्यनेनेति पृषोदरादिः । शृङ्खलः । 'शृङ्खलस्त्रिष्विति' तालव्यादौ रभसः । 'अति अदि बन्धने' । 'अन्दूहन्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (उ० १. ९६) इति बाहुलकः कूप्रत्ययः । ततः 'इवे प्रतिकृतौ' (५. ३. ९६) इति कन् । 'केऽणः' (७. ४. १३) इति ह्रस्वः । अन्दुकः । 'गड सेचने' । अच् । निगडः ॥

अङ्कुशोऽस्त्री सृणिर्द्वयोः ।

क्षीर० — अङ्क्यते गम्यतेऽनेनाङ्कुशः । सरत्यनया सृणिः ॥

टीका० — अङ्कुशत्रयमङ्कुशे । 'अकि लक्षणे' । 'सानसिवर्णसि—' (उ० ४. १९) इत्यादिना उशप्रत्ययः । अङ्कुशस्तालव्यशः । सर्तेः 'सृवृषिभ्यां कित्' (उ० ४. ५०) इति निः । सृणिः । 'आरक्षमग्रमवमत्य सृणिं शिताग्रम्' (स० ५. श्लो० ५) इति माघप्रयोगात् स्त्रियामिति प्रमादपाठः । द्वयोरित्येव पाठः ॥

दूष्या कक्ष्या वरत्रा स्यात्

क्षीर० — दूष्यते दूयतेवानया वा दूष्या । कक्षायां[4] मध्यमदेशे भवा कक्ष्या । व्रियतेऽनया वरत्रा मध्यबन्धनी चर्मरज्जुः ॥

टीका० — चूषात्रयं कच्छरज्जौ । *'चूष याचने' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । चूषा । दीर्घवच्चकारादिमूर्धन्यषा । कक्षा विश्वप्रकाशे

---

१. 'लेन शृ' क. पाठः. २. 'डः' ग. घ. ङ. पाठः. ३. 'क' ख. ग. पाठः. ४. 'याः' ख. पाठः.

---

* 'चूष पाने इति' मुद्रितधातुपाठः ।

क्षान्तोक्ता । यान्तापि कक्ष्येत्यजयः । 'वृञश्चित्' (उ० ३. १०७) इत्यत्रन् । वरत्रा ॥

कल्पना सज्जना समे ॥ ४२ ॥

क्षीर० — **हस्तिनां सज्जीकरणमङ्कोलगैरिकादिना । शृङ्गारेणेत्येके ॥**

टीका० — कल्पनाद्वयं **सामणी**ति ख्यातायाम् । 'कृपू सामर्थ्ये' । 'ग्लुञ्चु षस्ज गतौ' । 'ण्यासश्रन्थो युच्' (३. ३. १०७) ॥

प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः ।

क्षीर० — **प्रवयत्येनां प्रवेणी । आस्तीर्यते हस्तिपृष्ठे आस्तरणम् । वर्णो वर्णकम्बलः । भीमवत् । परिस्तोम्यते प्रस्तीर्यते परिस्तोमः । वर्णपरिस्तोम इत्येके । कुथ्यते कुथः ॥**

टीका० — प्रवेणीपञ्चकं चित्रकम्बले । वेण्यां प्रवेण्युक्ता । आस्तीर्यतेऽनेनेत्यास्तरणम् । ल्युट् । ब्राह्मणादिषु वर्ण उक्तः । स्तौतेः सोमवन्मन् । परिस्तोमः । 'कुथ पूतीभावे' । इगुपधलक्षणः कः । 'स्त्रियां वेणी कुथं त्रिष्वि'ति वोपालितः ॥

वीतं त्वसारं हस्त्यश्वं

क्षीर० — **वेति स्म याति भुङ्क्ते च वीतम् । विशेषेणेतं नष्टं वा । सेनाङ्गत्वात् समाहारः ॥**

टीका० — असारं **युद्धाक्षमं हस्त्यश्वं** वीतम् । विगतमितं गमनमस्य तद् वीतम् ॥

वारी तु गजबन्धनी ॥ ४३ ॥

क्षीर० — **वार्यतेऽनया वारी गजादानभूमिः ॥**

टीका० — वारिद्वयं **वार्याम्** । 'वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्' (उ० ४. १२६) इति वृणातेः ण्यन्तादिञ् । 'कृदिकाराद् —' (ग० ४. १. ४५) इति ङीषि वारी च । उक्तो हस्ती ॥

---

१. 'णं कोलकरै' ख. पाठः. २. 'वा' क. ख. पाठः.

घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥ ४४ ॥

क्षीर० — घोटते भूमौ परिवर्तते घोटकः । वेति याति वीतिः । पीतिरित्येके । 'पीङ् पाने' । तुरं त्वरितं गच्छतीति तुरगः, 'अन्यत्रापि दृश्यते' (वा० ३. २. ४८) इति डः । तुरङ्गमः, 'गमश्च' (३. २. ४७) इति खच् । तुरङ्गः, 'खच्च डिद् वा वक्तव्यः' (वा० ३. २. ३८) । अश्नुतेऽध्वानमश्वः । वजति तच्छीलो वाजी । वाजाः पक्षा अभूवन्नस्येति वा । वाह्यते वाहः । अर्वति यात्यर्वा । गन्ध्यतेऽर्च्यते गन्धर्वः । हयति याति हयः । सिन्धौ भवः सैन्धवः । विशेषोऽपि सामान्यवृत्तिः । सपति समवैति सप्तिः । इतो रथप्रकरणात् प्राग्श्वपरिकरः ॥

टीका० — घोटकत्रयोदशकमश्वे । 'घुट परिवर्तने' । ण्वुल् । घोटकः । पिबतेः 'क्तिच्क्तौ च संज्ञायाम्' (३. ३. १७४) इति क्तिः । 'पाने स्त्री पीतिरश्वे ना' इति रुद्रः । 'तुर त्वरणे' । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) । तुरो गच्छतीत्यर्थः । भुजगवड्डप्रत्ययादिः । 'अशू प्रुषिलटिकणिखटिविशिभ्यः कन्' (उ० १. १५७) । अश्वः । वाजो वेगस्तद्योगाद् वाजी । वाह्यत इति वाहः । धञ् । अर्तेः वनिप् । अर्वा नान्तः । शत्रन्तोऽप्यर्वन् । तथाच माघे—'(मु-हुरभुः अ)र्वतां व्रजाः' इति । स्त्रियामर्वती । गन्धर्व उक्तः । 'हय गतौ' । पचाद्यच् । हयः । सिन्धुदेशे भवः सैन्धवः । 'कच्छादिभ्यश्च' (४. २. १३३) इत्यण् । सप समवाये' । बाहुलकस्तिः । सप्तिः ॥

आजानेयाः कुलीनाः स्युः

क्षीर०—आजेन क्षेपेण आनेया आजानेयाः, आयत्ता इत्यर्थः ॥

टीका०—कुलीनाः प्रधानाश्च भूमिभवा अश्वा आजानेयाः, सुवाह-त्वात् । अजावन्नेया अजानेयाः । पृषोदरादित्वादादिदीर्घत्वमिति हड्डचन्द्रः ।

"अश्वं कुलीनमाजानेयं शाबकं किशोरकं ब्रूते"

---

१. 'ति । डः । खच्च डित् । गमश्चेति खच् । अश्नु' क. ग. घ. ङ. पाठः. २. 'ति सप्तिः' ग. पाठः.

इति नाममालायामपि ॥

विनीताः साधुवाहिनः।

क्षीर०—विनीयन्ते विनीताः सुशिक्षिताः ॥

टीका०—शोभनवहनशीला यत्र तत्र भवा विनीताः। नयतेः क्तः ॥

वनायुजाः पारसीकाः काम्बोजा बाह्लिका हयाः ॥ ४५ ॥

क्षीर०—वनाय्वादिषु देशेष्वेते जाता हयविशेषाः। एवं तुरका-रादयोऽपि (?)। लक्ष्ये बाह्लीकोऽश्वः ॥

टीका०—वानायुजद्वयं **वनायुजदेशजे**। अनयोरभेदोपचारादेकत्वम्। द्वौ भवार्थेऽणि दीर्घा(दिः?दी)। तथाच नाममाला—

"श्वेतं कर्काख्यं वानायुजमपि पारसीकं तु"।

'पारसीको वनायुजः' इत्युत्पलिन्यां ह्रस्वादिः। **कम्बोजदेशजेऽश्वे** काम्बोज-द्वयम्। 'कम्बोजाल्लुक्' (४. १. १७३) इति 'जनपदशब्दात् क्षत्रियादञ्' (४. १. १६६) इत्यस्यैवानन्तरविहितस्य लुक्, न तु शैषिकाणः। अतो दीर्घादिः काम्बोजः। कुङ्कुमे बाह्लिक उक्तः। हया हयविशेषाः। एकत्वं नास्ति। पृथ-गेव नामानीति केचित् ॥

ययुरश्वोऽश्वमेधीयः

क्षीर०—यात्यत्यर्थं ययुः। अश्वमेधाय हितोऽश्वमेधीयः। 'अश्वमेधाच्छ च' ॥

टीका०—अश्वमेधार्हे घोटके ययुः। द्यन्तस्थः। 'या प्रापणे'। 'यो द्वे च' (उ० १. २१) इत्युः किच्च। ययुः। 'तस्मै हितम्' (५. १. ५) इति छः। अश्वमेधीयः ॥

जवनस्तु जवाधिकः।

क्षीर०—जवते तच्छीलो जवनः। 'जुचङ्क्रम्य—' (३. २.

---

१. 'तुखका' ग. घ. ङ, 'तु तर्करा' ख. पाठः.

१५०) इति युच् । मृगादिरपि । 'प्रजोरिनिः' (३. २. १५६) इति प्रजवी च ॥

टीका० — वेगाधिके जवनश्ववर्गादिः ॥

पृष्ठ्यः स्थौरी

क्षीर० — यत्पृष्ठे जलादिकमुह्यतेऽसौ पृष्ठ्यः । यप् । स्थूराणां पश्चाज्जङ्घाभागानामिदं स्थौरम् । स्थौरं बलमस्त्यस्य स्थौरी ॥

टीका० — बलीवर्दवत् पृष्ठेन भारवाहके पृष्ठ्यद्वयम् । य(त्र? प्र)-करणे 'अन्येभ्योऽपि दृश्यते' (वा० ५. २. १२०) इति य(त्? प्)। पृष्ठ्यः । 'स्थूल परिबृंहणे'। अण्। रलयोरैक्यात् स्थूराया इदं स्थौरं पृष्ठवाह्यं, तद्योगादिनिः, स्थौरी । स्थूरीत्यपि केचित् ॥

सितः कर्कः

क्षीर० — शुक्लोऽश्वः कर्कः । क्रियन्ते वर्णान्तराण्यस्येति ॥

टीका० — श्वेतहये कर्कः ॥

रथ्यो वोढा रथस्य यः ॥ ४६ ॥

क्षीर० — रथं वहति रथ्यः । 'तद् वहति रथयुग—' (४. ४. ७६) इति यत् ॥

टीका० — यो रथं वहति स रथ्यः । 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत् ॥

बालः किशोरः

क्षीर० — (किश्यते?) बध्यते कृश्यते वा किशोरः ॥

टीका० — बाले किशोरः । 'किशोरादयश्च' (उ० १. ६८) इत्यत्र तालव्यशः ॥

वाम्यश्वा बडवा

---

१. 'गोऽपि । प्रज' क. ख. पाठः. २. 'त' ख. ङ. छ. पाठः.

क्षीर०— वाम्यते गर्भं वामी। यल्लक्ष्यम्—'अथोष्ट्रवामीशतहारि-ार्थम्' (रघु० स० ५. श्लो० ३२)। वडं वलं हयं वा वाति वडवा। ङीविषयत्वाद् ङीष् नास्ति। अश्वा त्वजादिः। प्रसूनानार्थे ॥

टीका०— वामीत्रयमश्वायाम्। वामी गौरादिः। अश्व उक्तः। टापि अश्वा। वलतेर्बाहुलकाद् अवन्। डलयोरेकत्वस्मरणम्। वडवा ॥

वाडवं गणे।

क्षीर०— वडवानां समूहो वाडवम्। 'खण्डिकादिभ्यश्च' (४. २. ४५) इत्यञ् ॥

टीका०— वडवासमूहे वाडवम्। 'खण्डिकादिभ्यश्च' (४. २. ४५) इत्यञ् ॥

त्रिष्वाश्वीनं यदश्वेन दिनेनैकेन गम्यते ॥ ४७ ॥

क्षीर०— 'अश्वस्यैकाहगमः' (५. २. १९) इति खञ् ॥

टीका०— अश्वेनैकदिनगम्ये वर्त्मन्याश्वीनम्। 'अश्वस्यैकाहगमः' (५. २. १९) इति खञ् ॥

कश्यं तु मध्यमश्वानां

क्षीर०— कशामर्हति कश्यम् ॥

टीका०— अश्वमध्यभागे कश्यं, कशां चर्मलतां ताडनार्थमर्हतीति। दण्डादिभ्यो यः' (५. १. ६६)। 'दशाकशावशे'ति तालव्यदेशना ॥

हेषा ह्रेषा च निस्वनः।

क्षीर०— 'हेषृ ह्रेषृ अव्यक्ते शब्दे'। 'गुरोश्च हलः' (३. ३. १०३) इत्यः ॥

टीका०— अश्वनिस्वने हेषाद्वयम्। 'रेषृ ह्रेषृ अव्यक्ते शब्दे'। 'गु-ोश्च हलः' (३. ३. १०३) इत्यः। ह्रेषेति पाठो 'ह्रेष गतौ' इत्यतो व्युत्पा-यः। द्वौ मूर्धन्यषौ ॥

निगालस्तु गलोदेशः

क्षीर०—निगलत्यनेन निगालः। गलो जत्रुसन्धिः। 'उन्योर्ग्रः' (३. ३. २९) इति घञ्। गलस्योदेशः प्रदेशः। देवमणेरावर्तस्य स्थानम्॥

टीका०—अश्वानां गलस्योदेशे समीपे निगालः। गिरतेर्ण्यन्ताद् एरचि रलयोरैक्यम्॥

बृन्दे त्वश्वीयमाश्ववत्॥ ४८॥

क्षीर०—अश्वानां समूहे। 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (४. २. ४८)। पक्षे 'अनुदात्तादेरञ्' (४. २. ४४) इत्यञ्॥

टीका०—अश्वीयद्वयमश्वसमूहे। 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्। (४. २. ४८) इति छः। अश्वीयम्। 'तस्य समूहः' (४. २. ३७) इत्यणि आश्वम्॥

आस्कन्दितं धोरितकं रेचितं वल्गितं प्लुतम्।
गतयोऽमूः पञ्च धाराः

क्षीर०—अश्वानां धाराख्याः पञ्चेमा गतयः। धार्यते गतौ स्थाप्यतेऽनया धारा। भिदादित्वात् साधुः। आस्कन्दनमास्कन्दितम्, उत्तेरिताख्यो गतिवेगः। धोरणं धोरितम्। 'धोरृ गतिचातुर्ये'। रेचितम् उत्तेजिताख्यम्। क्रमस्त्वन्यथा। यदाहुः—

"धोरितं वल्गितं धाराः प्लुतमुत्तेजितं क्रमात्।
उत्तेरितं चेति पञ्च शिक्षयेत् तुरगं गतीः॥
धोरितं गतिमात्रे यद् योजनं वल्गितं पुरः।
अग्रकायसमुल्लासात् कुञ्चितास्यं नतत्रिकम्॥
पूर्वापरोन्नमनतः क्रमादारोहणं प्लुतम्।

---

१. 'लोहे' ब पाठः। २. 'स्याम् इति विकल्पेन यञ्' ख. पाठः।

उत्तेजितं मध्यवेगे योजनं श्लथवल्गया ॥
उत्तेरिते तु वेगान्धो न शृणोति न पश्यति।" ॥

टीका०—आस्कन्दितादयः पञ्च गतिविशेषा धाराशब्दवाच्याः। तत्र विष्टब्धा समा च गतिरास्कन्दितं **वीरव** इति ख्यातम्। 'स्कन्दिर् गतिशोषणयोः'। क्तः। ऋजुदूरगमनं पुलिन इति ख्यातं धौरितकम् 'धोर्ऋ गतिचातुर्ये'। क्तः। तदन्तात् स्वार्थे कन्। मण्डलिकालयेन गमनं रेचितम्। क्तः। हेडु इति ख्यातम्। वेगेन विक्षिप्तोपरिचरणं वल्गनं वल्गितम्। वल्गेः क्तः। मार्जा इति ख्यातम्। त्वरया साम्येन गतिः प्लुतम्। प्लुवतेः क्तः। पर इति ख्यातम्॥

घोणा तु प्रोथमस्त्रियाम् ॥ ४९ ॥

क्षीर०—**घुणते श्वासेन चलति घोणा। प्रवते चलति प्रोथः, वृत्तो नासान्तरप्रदेशः॥**

टीका०—**घोणायां** प्रोथः। 'प्रोथृ पर्याप्तौ'। पचादिः॥

कविका तु खलीनोऽस्त्री

क्षीर०—**कवते दन्तचर्वणाच्छब्दायते इति कविका वक्त्रैकदेशे वक्त्रनियामके लोहशङ्कौ वर्तते। लोके त्वयोमयी सर्वमुखनियन्त्रिका कविका। खलति चलति खलीनम्। खे तालुनि लीनं वा॥**

टीका०—**कवीति ख्यातायां लोहकृतायां** (लेखकृतायाम्?) **अश्वमुखबन्धन्यां** कविकाद्वयम्। 'कवी तु खलीनै' इत्यजयः। अतः स्वार्थिकोऽत्र कः।

"कविका तु खलीनोऽस्त्री कविकं कर्षणीत्यपि"

इति रभसः। खे मुखविवरे लीनं खलीनं दीर्घमध्यम्।

"सोत्सेधैः स्कन्धदेशैः खरखलिनकशाकर्कशात्यन्तमुग्रैः"

इति विशाखदत्तः। तदा च पृषोदरादिह्रस्वत्वम्॥

---

१. 'ति', २. 'क्तः। त्व' अ. पाठः. ३. 'लि' ग. घ. पाठः. ४. 'वी' अ. पाठः.

शफं क्लीबे खुरः पुमान् ।

क्षीर० — शाप्यते [1]भुवा घृष्यते शफम् । खुरति विलिखति क्ष्मां खुरः ॥

टीका० — शफद्वयं खुरे । शफं क्लीबम् । 'खुरच्छेदने' । इगुपधलक्षणः कः ।

"भजेथाः पश्चान्मां वरतनु ! पुरस्तान्मृगैखुर-
क्षुरप्रस्यालेख्यस्थपुटितविभागा वनभुवः ।"

इत्यादि । (सुवश्च ?) ॥

पुच्छोऽस्त्री लूमलाङ्गूले बालहस्तश्च बालधिः ॥ ५० ॥

क्षीर० — पूयते दंशादीनुत्सारयति पुच्छम् । [3]पुतं छादयति वा । लूयते लूमम् । लङ्गति चलति लाङ्गूलम् । बालो हस्त इव दंशवारणाद् बालहस्तः । प्रशस्ता बाला वा । वाला धीयन्तेऽस्मिन् बालधिः ॥

टीका० — पुच्छत्रयं लाङ्गूले । 'पुच्छ प्रमादे' । कः । पुच्छः । लूञो बाहुलको मक् । लूममदन्तम् । लगेः 'खर्जपिञ्जादिभ्य ऊरोलचौ' (उ० ४. ९१) । 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः । लाङ्गूलम् । केशवति लाङ्गूलमात्रे बालहस्तद्वयम् । न तु हस्तिन एव । तथा च 'परिगतो ज्वलनमुग्धतावालधिः' इति बालरामायणे हनूमद्विषये वालधिः प्रयुक्तः । बालसमूहयोगाद् बालहस्तः । बालो धीयतेऽत्रेति बालधिः ॥

त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि ।

क्षीर० — उपावर्तते स्मोपावृत्तोऽश्वः । लुठति स्म लुठितः ॥

---

१. 'उपाहृष्य' ग. ङ. पाठः. २. 'गक्षु' ट., 'गखुरप्र' ञ. पाठः. ३. 'तच्छाद' ग. पाठः.

टीका० — भूमौ पुनः पुनर्लोठ्यायतेऽश्वादावुपावृत्तद्वयम्। उपाङ्पूर्वाद् वृतेः लुठतेश्च कर्तरि क्तः॥

याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः॥ ५१॥

क्षीर०—यान्त्यनेन यानं साम्परायिकाख्यं। शताङ्गो बह्वरकः। स्यन्दते याति स्यन्दनः। रमन्तेऽस्मिन् रथः। इतो भटादेः प्राग् रथप्रकरणम्॥

टीका० — युद्धार्थे चक्रवति याने शताङ्गत्रयम्। शतमङ्गान्यस्येति बहुव्रीहिः। 'स्यन्दू प्रस्रवणे'। 'अनुदात्तेतश्च हलादेः' (३. २. १४९) इति युच्। स्यन्दनम्। रमेः 'हनिकुषिनीरमिकासिभ्यः क्थन्' (उ० २. २)। रथः॥

असौ पुष्यरथश्चक्रयानं न समराय यत्।

क्षीर० — पुष्ये[2] यात्रोत्सवादौ मङ्गल्यो रथः पुष्यरथः[3], यद् युद्धार्थं न स्यात्। चक्रयुक्तं यानम्॥

टीका० — यत्र युद्धार्थं चक्रयुक्तम्, अपि तु क्रीडाभ्रमणाद्यर्थं यानं, स पुष्यरथः। पूर्वपदं चात्र यरलवीययकारान्तं,

"महारथः पुष्यरथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः"
(स० ३. श्लो० २२)

इति माघे पुष्यशब्देन सह श्लेषात्॥

कर्णीरथः प्रवहणं डयनं च समं त्रयम्॥ ५२॥

क्षीर०—कर्णिषु स्कन्देषु रथः कर्णीरथः। दीर्घो लक्ष्यात्। पुंस्कन्धोह्यमानो रथः। प्रवहन्त्यनेन प्रवहणम्। डयन्ते विहायसा यान्तीवानेन डयनं विमानाख्यम्॥

टीका० — स्त्रीणां नयनार्थे कोल्लीयके ढल्लरिकाप्राये रथे कर्णीरथत्रयम्। प्रवहेर्ल्युट्। प्रवहणम्। 'हि गतौ'। करणे ल्युट्। डयनम्। 'डीङ् विहायसा

---

१. 'व्यायिते' क. ख. ग. घ. ङ. पाठः. २. 'ष्यो' ग. पाठः. ३. 'थः। च' ख. पाठः. ४. 'ति', ५. 'ल्येन' ख. पाठः.

गतौ'। करणे ल्युटि डयनमपि मतभेदादिति वर्णदेशना ॥

क्लीबेऽनः शकटोऽस्त्री स्याद्

क्षीर०—अनिति चीत्करोति अनः। असुन्। शक्नोति भारं वोढुं शकटम् ॥

टीका०—अनोद्वयं शकटे। 'अन गतौ' इत्यस्माद् धातोः असुनि अनः, सान्तम्। 'शकॢ शक्तौ'। 'शकादिभ्योऽटन्' (उ० ४. ८२)। शकटः ॥

गन्त्री कम्बलिवाह्यकम्।

क्षीर०—गच्छति तच्छीला गन्त्री शकटिका। कम्बलिभिर्दीन्तैर्वोढव्यम् ॥

टीका०—कम्बलिनो गावः, तद्वाह्ये शकटे गन्त्री। गमेः ष्ट्रन्। ङीष् ॥

शिविका याप्ययानं स्याद्

क्षीर०—शिवा श्रेयस्करी। 'संज्ञायां कन्' (५. ३. ८७)। याप्यस्याशक्तस्य यानं युगाख्यम्। कन्यायानमिति गौडः ॥

टीका०—शिविकाद्वयं झंपाण इति ख्याते। शिविका तालव्यादिः। याप्यैरधमैर्याय्यते नीयत इति याप्ययानम्। अन्तस्थादिः ॥

दोला प्रेङ्खादिका स्त्रियाम् ॥ ५३ ॥

क्षीर०—दोल्यते दोला काष्ठमयी रज्जुः प्रालम्बश्च। प्रेङ्ख्यते प्रेङ्खा हिन्दोलकाख्या। आदिशब्दाच्छयानकादि, याप्ययानानुवृत्तेः ॥

टीका०—उद्यानादौ क्रीडनार्थं काष्ठादिमयोऽन्दोलः। प्रेङ्खा। प्रेङ्ख्यते प्रेर्यत इति प्रेङ्खा।

---

१. 'सी' ग. पाठः. २. 'न विग' ग. च., 'नेवल्य' ख. ट., 'नलेल्य' ङ. छ. पाठः. ३. 'कुष्यान' ग. पाठः. ४. 'सं' क. ख. ञ. ट. पाठः. ५. 'ङ्खा। आ' घ. पाठः. ६. 'यो हि' क. ख., 'भि' ङ. च. छ. पाठः.

"दोला प्रेङ्खः पुमान् प्रेङ्खा निःश्रेणिरधिरोहिणी" ॥
इति रत्नकोशे द्वयोः। आदिना घट्टनादिवाह्यापि दोला ॥

उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे।

क्षीर० — द्वीपिनश्चर्मणा प्रावृतो द्वैपो रथः। 'द्वैपवैयाघ्रादञ्' (४. २. १२) ॥

टीका० — व्याघ्रचर्मावृते रथे द्वैपद्वयम्। द्वीपिभवं चर्म द्वैपम्। तेन वृतो रथो द्वैपः। 'द्वैपवैयाघ्रादञ्' (४. २. १२) इत्यञ् ॥

पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली ॥ ५४ ॥

क्षीर० — पाण्डुकम्बलेन प्रावृतो रथः। 'पाण्डुकम्बलादिनिः' (४. २. ११) ॥

टीका० — पाण्डुकम्बलेनावृते रथे पाण्डुकम्बली। 'पाण्डुकम्बलादिनिः' (४. २. ११) इतीनिः ॥

रथे काम्बलवास्त्राद्याः कम्बलादिभिरावृते।

क्षीर० — 'परिवृतो रथः' (४. २. १०) इत्यण्। आदिशब्दाद् दौकूलाद्याः[1] ॥

टीका० — वस्त्रकम्बलाभ्यामावृते रथे काम्बलवास्त्रौ। 'परिवृतो रथः' (४. २. १०) इत्यण्। आदिना क्षौमादिः ॥

त्रिषु द्वैपादयः

क्षीर० — वाच्यलिङ्गत्वाद् द्वैपी गन्त्री, द्वैपो रथः, द्वैपमनः। शकटाद्यपि रथत्वेन मन्यते ॥

टीका० — द्वैपादयो वास्त्रान्तास्त्रिषु ॥

---

१. 'दौग्रल्याख्याः।' ग. पाठः. २. 'ख्याः' ख. पाठः.

रथ्या रथकड्या रथव्रजे ॥५५॥

क्षीर० — रथानां समूहे 'खलगोरथात्' (४. २. ५०) 'इनित्रकड्यचश्च'*(४. २. ५१) इति यत् कड्यच् च ॥

टीका० — रथ्याद्वयं रथव्रजे । 'खलगोरथात्' (४. २. ५०) इति यत् । रथ्या । 'इनित्रकड्यचश्च' (४. २. ५१) इति कड्यच् । ङापि रथकड्या ॥

धूः स्त्री क्लीबे यानमुखं

क्षीर० — धूर्वति हिनस्ति वोढारं धूः । यस्या अग्रे वोढारो बध्यन्ते । यानमुखं रथादेरग्रम् ॥

टीका० — रथाग्रभागे धूर्द्वयम् । 'धुर्वी हिंसायाम्' । 'आजभासभाषधुर्वी —' (३. २. १७७) इत्यादिना क्विप् । 'राल्लोपः' (६. ४. २१) इति वलोपः । धू रेफान्ता ॥

स्याद् रथाङ्गमपस्करः ।

क्षीर० — रथारम्भकं चक्रादन्यत् । अपकरोत्यपस्करः । 'अपस्करो रथाङ्गम्' (६. १. १४९) इति साधुः ॥

टीका० — रथावयवमात्रे चक्रादावपस्करः । 'अपस्करो रथाङ्गम्' (६. १. १४९) इति निपातितः ॥

चक्रं रथाङ्गं

क्षीर० — रथस्य यच्चक्रं, तद् रूढ्या रथाङ्गम् ॥

टीका० — चक्रद्वयं चक्रे । चक्रमुक्तम् ॥

---

१. 'वा' क. ख. घ. पाठः. २. 'वद्वयमा' ख. पाठः.

---

* 'कड्यचश्च' इति मुद्रिताध्यायीपाठः ।

तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान् ॥ ५६ ॥

क्षीर० — तस्य चक्रस्यान्ते। नमतीति नेमिः। प्रान्ते धीयते प्राधिः[1]। प्रथते प्रथिरित्येके ॥

टीका० — नेमिद्वयं चक्रस्यान्ते। 'नियो मिः' (उ० ४. ४४) इति मिः। नेमिः। ङीषि नेमी च। धाञः किः। प्रधिः ॥

पिण्डिका नाभिः

क्षीर० — पिण्ड्यन्ते अरा अस्यां सा पिण्डिका। नभ्यते हिंस्यतेऽक्षेण नाभिः ॥

टीका० — रथमध्ये चक्राकारा पिण्डी। यस्यां सर्वाणि काष्ठान्यासज्ज्यन्ते, सा नाभिः। ङीषि नाभी च[2] ॥

अक्षान्तकीलके तु द्वयोरणिः।

क्षीर०—अक्षस्य नाभिक्षेप्यकाष्ठस्यान्ते ब(द्धौ? न्धा)र्थं कीलके। अणति शब्दायतेऽणिः[3]। लक्ष्ये त्वाणी ॥

टीका० — अक्षः शकटः। तथाच —

"अक्षो वि(हीन?भीत)के निले शकटव्यवहारयोः"

इत्यादि। तस्याग्रिमे कीले अणिः। अणेरौणादिक इः।

"सीमावृक्षाग्रकीलेषु स्यादाणिरणि च द्वयोः"

इति रुद्रः ॥

रथगुप्तिर्वरूथो ना

क्षीर० — व्रियते गुप्त्यर्थं रथो येन, स वरूथो लोहादिमयी आवृतिः ॥

---

१. 'धिः। पिण्डि' ग. घ. ङ. पाठः. २. 'च ॥ द्वयोरिति रुद्रः। चक्रनिरोधार्थेऽक्षाप्रनिखातकीलके अणिः ॥ शस्त्र' ङ. छ., 'च ॥ द्वयोरिति रुद्रः ॥ शस्त्र' ख. पाठः. ३. 'न्धस्यार्थे' ग. घ. पाठः. ४. 'णिः ॥ रथ' ख. पाठः.

टीका० — शस्त्रभयादात्मरक्षार्थं कृते[1] गुत्तीति ख्याते रथस्य स्थानविशेषे रथगुप्तिद्वयम्। 'जृवृञोरूथन्' (उ० २. ६) इत्यूथन्। वरूथः ॥

कूवरस्तु युगन्धरः ॥ ५७ ॥

क्षीर० — कूयते शब्दायते कूवरः। युगं वोढुं स्कन्धकाष्ठं धारयति युगन्धरः। 'संज्ञायां भृतृवृजि'—(३. २. ४६) इति खच् ॥

टीका० — रथस्य युगकाष्ठं यत्रासज्यते, तत्र कूवरद्वयम्। कुं महीं वृणातिच्छादयतीति कूवरः। ‡'अन्येभ्योऽपि —' इति दीर्घः। धारेर्विश्वंभरवद् युगन्धरः ॥

अनुकर्षो दार्वधःस्थं

क्षीर० — अनुकृष्यतेऽनुकर्षः ॥

टीका० — रथस्याधःस्थं यद् दारु, यस्योपरि घट्टकर्म, सोऽनुकर्षः। 'कृष विलेखने'। अच् ॥

प्रासङ्गो ना युगाद्युगः।

क्षीर० — प्रसज्यते वोढुं स्कन्धे प्रासङ्गः। युगेनाताति युगाद् रथादिः, तस्य युगः। ना पुमान्। अन्यस्तु[2] क्लीबे। युगं कालो युग्मं वा। युगाद् युगान्तरं वत्सदमनार्थमिति गौडाः। यन्मुनिः—'युगं द्वितीयं प्रासङ्गम्' ॥

टीका० — गुरुत्वाच्चतुर्भिः षड्भिर्वा वृषैर्यदा शकटो नीयते, तदा दीयमानस्य द्वितीययुगस्य प्रासङ्गाख्या ॥

सर्वं स्याद् वाहनं यानं युग्यं पत्रं च धोरणम् ॥ ५८ ॥

---

१. 'ते र' ञ. पाठः. २. 'त्तु' ख. पाठः.

---

‡ 'अन्येषामपि दृश्यते' (६. ३. १३७) इत्येव दीर्घविधायकसूत्रं दृश्यते।

क्षीर०— सर्वं हस्त्यश्वरथादि दोलान्तम्। योक्तव्यं युग्यम्। 'युग्यं च पत्रे' (३.१.१२१) इति साधुः। पतन्त्यनेनेति पत्रम्। 'दाम्नीशस—'(३. २. १८२) इति करणे ष्ट्रन्। धोर्यतेऽत्र धोरणम्॥

टीका०— सर्वं हस्त्यश्वादि वाहनं यानादिचतुष्केणोच्यते। वहतियात्योः करणे ल्युट्। 'वाहनमाहितात्' (८. ४. ८) इति निपातनाद् दीर्घः। 'युग्यं च पत्रे' (३. १. १२१) इत्यनेन युग्यं निपातितम्। 'धोरि गतिचातुर्ये'। ल्युट्। धोरणम्॥

परम्परावाहनं यत् तद् वैनीतकमस्त्रियाम्।

क्षीर०— वोढृभिः परम्परया वाह्यते। प्रावन्धिकमभ्यासस्थितम्। विनीतानामिदं याप्ययानादि॥

टीका०— मनुष्यादिभिर्यः परम्परया अंसपाण्यादिद्वारेण वाह्यते, स वैनीतकः॥

आधोरणा हस्तिपका हस्त्यारोहा निषादिनः॥ ५९॥

क्षीर०— आधोर्यते हस्ती यैराधोरणाः। हस्तिनं पान्ति हस्तिपकाः। हस्तिनमारोहन्ति हस्त्यारोहाः। निषीदन्त्यवश्यं निषादिनः। द्वौ द्वौ भिन्नार्थावित्येके। आद्यौ पालकौ, परौ योद्धारौ॥

टीका०— आधोरणचतुष्कं हस्त्यारोहे। आङ्पूर्वाद् धोरेः 'चलनशब्दार्थादकर्मकाद् युच्' (३. २. १४८)। आधोरणः। हस्तिनं पातीति हस्तिपः। ततः 'संज्ञायां कन्' (५. ३. ८७)। कर्मण्यणि हस्त्यारोहः। 'सदिरप्रतेः' (८. ३. ६६) इति षत्वे निषादी॥

नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः।

---

१. 'त्य', २. 'ति ष्ट्रन्' ग. पाठः. ३. 'रु' ख. पाठः. ४. 'झम्पणादि' ख. ङ. छ. पाठः.

सव्येष्ठदक्षिणस्थौ च संज्ञा रथकुटुम्बिनः ॥ ६० ॥

क्षीर० — नियच्छति[1] नियन्त्रयति नियन्ता । प्राजति प्राजिता । 'अज गतिक्षेपणयोः' । वानुवृत्तेर्वीभावो नास्ति । सुवति सूतः । 'षू प्रेरणे' । क्षदति क्षत्ता । सरथस्यापत्यं सारयति वाहान्[2] वा[3] सारथिः । सव्ये तिष्ठति सव्येष्ठः । 'सव्ये स्थश्छन्दसि' (उ० २. १०१) इति ऋन् डिच्च । 'स्थास्थिन्स्थूणाम्—' (वा० ८. ३. ९७) इति षत्वम् । रथस्य कुटुम्बी वाहकः ॥

टीका० — रथकुटुम्बी सारथिः, तत्र नियन्त्रष्टकम् । अर्थात् सारथिनो रथकुटुम्बी च नाम । यमेस्तृचि नियन्ता । 'अज गतौ' । प्राजितृशब्दार्तृ तृजन्ताद् 'अजेर्व्यघञपोः' (२. ४. ५६) इति नित्यं वीभावे प्राप्ते 'वलादावार्धधातुके विकल्प इष्यते' (वा० २. ४. ५६) इति वीभावविकल्पः । 'वीभावपक्षे तु प्रवेता इत्यपी'ति वृत्तिः । 'षू प्रेरणे' । क्तः । सूतः । क्षदेः सौत्रात् 'तृन्तृचौ शंसिक्षदादिभ्यः[4] संज्ञायां चानिटौ' (उ० २. ९४) इति तृच् । क्षत्ता । सव्ये तिष्ठतीति सव्येष्ठा । 'दिवेर्ऋन्' (उ० २. ९९) 'नयेर्डिच्च' (उ० २. १००) इति चानुवृत्तौ 'सव्ये स्थश्छन्दसि' (उ० २. १०१) इति सव्यशब्दे उपपदे तिष्ठतेर्धातोः ऋन् । डित्त्वाट्टिलोपः । 'अम्बाम्ब—'(८. ३. ९७) इत्यादिना षत्वम् । 'हलदन्तात्—' (६. ३. ९) इति सप्तम्या अलुक् । 'सव्येष्ठा दक्षिणस्थश्चे'ति त्रिकाण्डपाठाद् भाषायां साधुरिति विनीतकीर्त्तिः । अम्बाम्बगोभूम्यादौ 'स्थास्थिन्स्थूणाम्—'(वा० ८. ३. ९७) इत्यस्य सर्वसम्मतत्वाभावादमरमालायामदन्तोऽयम् । तथाच —

"सूतः क्षत्ता नियन्ता च यन्ता सव्येष्ठ एव च"

इति ॥

रथिनः स्यन्दनारोहाः

क्षीर० — रथयोद्धारः ॥

---

१. 'ति नियन्ता' ख. पाठः. २. 'त्यं सारथिः । सा', ३. 'वा सारथिः । स' क. पाठः. ४. 'द् अजे' क. ख. ङ. छ. पाठः. ५. 'सिशसिशासिक्ष' क. ख. ङ. च. छ. पाठः.

टीका० — रथिद्वयं रथयोधे ॥

अश्वारोहास्तु सादिनः।

क्षीर० — अश्ववाराख्याः। सीदन्त्यवश्यं सादिनः ॥

टीका० — अश्वारोहद्वयमश्वचारे। सदेर्णिनिः, सादी। 'सादी सूताश्वचारयोः' इति दन्त्यादावजयः ॥

भटा योधाश्च योद्धारः

क्षीर० — भटन्ति काङ्क्षन्ति युद्धं भटाः। युध्यन्ते योधाः[1]। पचाद्यच् ॥

टीका० — भटत्रयं सामान्ययोद्धृपुरुषे। 'भट भृतौ'। पचाद्यच्। भटः। 'युध सम्प्रहारे'। पचादिः। योधः। तृचि योद्धा ॥

सेनारक्षास्तु सैनिकाः ॥ ६१ ॥

क्षीर० — 'रक्षति' (४. ४. ३३) इति ठक्। प्राहरिकाद्याः ॥

टीका० — सेनारक्षद्वयं सेनारक्ष(प्र?प्रा)हरिकादौ। 'रक्षति' (४. ४. ३३) इति ठक्। सैनिकः ॥

सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते।

क्षीर० — सेनां समवयन्ति श्लिष्यन्ति। 'सेनाया वा' (४. ४. ४५) इति ण्यठकौ ॥

टीका० — सेनासमवेते अङ्गभूते हस्त्यश्वादौ सैन्यद्वयम्। 'सेनाया वा' (४. ४. ४५) इति ण्यठकौ ॥

बलिनो ये सहस्रेण[2] ते साहस्राः[3] सहस्रिणः ॥ ६२ ॥

क्षीर० — बलं सैन्यम्। सहस्रं योद्धारः सन्त्यस्य। 'तपःसहस्राभ्यां विनीनी' (५. २. १०२)। 'अण् च' (५. २. १०३) ॥

---

१. 'धाः योद्धारश्च। प' ग. घ. ङ. पाठः. २. 'ण सा', 'स्तास्ते स' ख. पाठः.

टीका० —सहस्राश्वादेर्बलस्य स्वामिनि सेनापतौ साहस्रद्वयम्। 'अण् च' (५. २. १०३) इत्यण्। साहस्रः। 'तपःसहस्राभ्यां विनीनी' (५. २. १०२) इति इनिः। सहस्री ॥

परिधिस्थः परिचरः

क्षीर० —परिधौ सेनाप्रान्ते तिष्ठति **परिधिस्थः**। **परितः समन्तात् चरति रक्षितुं परिचरः** ॥

टीका० — परिधिस्थद्वयं युद्धकाले प्रहारादिभ्यो यो रक्षति तत्र। प्रयाणकाले सामन्तस्य स्थापनकारिणीत्यन्यः। सेनाया राज्ञो दण्डनायक इत्यन्यः। चेरेरच्। परिचरः ॥

सेनानीर्वाहिनीपतिः।

क्षीर० —सेनां नयति नियुङ्क्ते **सेनानीः** ॥

टीका० —सेनानीद्वयं **सेनापतौ**। कार्त्तिकेये सेनानीरुक्तः ॥

कञ्चुको वारबाणोऽस्त्री

क्षीर० —कञ्च्यते बध्यते **कञ्चुकः**। **वारमाच्छादकं वानमस्य वारबाणम्**। **'पूर्वपदात् संज्ञायाम्—'** (८. ४. ३) **इति णत्वम्। बाणवारस्य व्यत्ययो मयूरव्यंसकादित्वादिति श्रीभोजः** ॥

टीका० —कञ्चुकद्वयं **भोट्टिकादौ**[3] **चोळकाकृतिसन्नाहे**। 'कचि दीप्तिबन्धनयोः'। 'मृकणिभ्यामूकोकणौ' (उ० ४. ३९) इति बाहुलक उकण्। कञ्चुकः। बाणं वारयतीति पृषोदरादित्वाद् वर्णविपर्ययेण वारबाणः ॥

यत्तु मध्ये सकञ्चुकाः।

बध्नन्ति तत् सारसनमधिकाञ्चः

---

१. 'स्रस्याश्वा' ख. ङ. छ. पाठः. २. 'नान्ते' ग. घ. ङ. पाठः, ३. 'भाडिका' ङ. पाठः. ४. 'काकौकृ' च., 'काकाकृ' क. ख. पाठः,

क्षीर०—सारं सनोति ददाति सारसनम्। अधिकमङ्गादधिकाङ्गः। सारसनाधिपाङ्गे इत्येके[1] पेठुः। यन्मुनिः—'अधिपाङ्गं[2] सारसनम्'। * भुग्नस्तु—

"तस्य सारसनं ज्ञेयमधियाङ्गं[3] निबन्धनम्" ॥

टीका०—सकञ्चुकाः पुरुषाः काण्डाघनादिनिवृत्त्यर्थं (?) हृदयमध्ये यद् दृढार्थं बध्नन्ति[4] पट्टकर्णिकादिकं, तत्र सारसनद्वयम्।

"भवेत् सारसनं काञ्च्यामुरःस्थेऽपि निगद्यते"

इति दन्त्यादावजयः। 'अधिकाङ्गं सारसनम्' इत्यमरमालायाम् आर्यापाठादधिकाङ्गं ह्रस्वादि ॥

अथ शीर्षकम्।

शीर्षण्यं च शिरस्त्रे

क्षीर०—शीर्षप्रतिकृतिः शीर्षकम्। शिरसि भवं शीर्षण्यम्। 'शरीरावयवाद् यत्' (५. १. ६), 'शीर्षश्छन्दसि' (६. १. ६०), 'ये च तद्धिते' (६. १. ६१)। शिरस्त्रायते शिरस्त्रम् ॥

टीका०—शीर्षकत्रयं टोपर इति ख्याते। शीर्षं शिरो रक्षति त्रायत इति शीर्षकम्। 'कुमारशीर्षयोर्णिनिः' (३. २. ५१) इति निपातनाद् अकारान्ताच्छिरःशब्दपर्यायात् शीर्षशब्दात् 'प्रातिपदिकाद् धात्वर्थे णिज्बहुलमिष्ठवच्च' (ग० ३. १. २६) इति णिचि ण्वुल्। शिरसे हितं शीर्षण्यम्। 'शरीरावयवाद्यत्' (५. १. ६)। 'ये च तद्धिते' (६. १. ६१) इति शीर्षन्नादेशः। 'ये चाभावकर्मणोः' (६. ४. १६८) इति प्रकृतिभावः। शिरस्त्रायत इति शिरस्त्रम् ॥

---

१. 'त्यपरे पे', २. 'या' ग. घ. ङ. पाठः. ३. 'लि', ४. 'न्ति त' ख. पाठः.

---

* 'दुर्गस्तु—तस्य सारसनं ज्ञेय धिपाङ्गं च निबन्धनम्। इति' इति भानुजिः।

अथ तनुत्रं वर्म दंसनम् ॥ ६४ ॥

उरश्छदः कङ्कटको जगरः कवचोऽस्त्रियाम् ।

क्षीर० — वृणोत्यङ्गं वर्म । दंस्यते बध्यते दंसनम् । कङ्कटत्याच्छादयति कङ्कते वा कङ्कटकः । जागर्तेरचि ह्रस्वाज्जगरः । यन्माला— 'उरश्छदो जगरः' । कवते कवचः, कं वञ्चति वा ॥

टीका० — तनुत्रसप्तकं सन्नाहे । शिरस्त्रवत् तनुत्रम् । वृञो मनिन् । वर्म । दंशेर्ल्युटि दंशनम् । उरश्छादयत्यनेनेत्युरश्छदः । 'छादेर्घेऽद्व्युपसर्गस्य' (६. ४. ९६) इति ह्रस्वः । 'ककि लौल्ये' । 'शकादिभ्योऽटन्' (उ० ४. ८२) । कङ्कटः । ततः कन् । जगरः । चवर्गादिः ।

"जगरः कङ्कटो योगः सन्नाहः स्यादुरश्छदः"

इति वोपालितः ॥

आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ॥ ६५ ॥

क्षीर० — आमुच्यते, प्रतिमुच्यते, अपिनह्यते बध्यते स्म । पिनद्धः ।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः"

इति पक्षे अल्लोपः ॥

टीका० — परिहिते वस्त्रादौ आमुक्तचतुष्कम् । 'मुच्लृ मोक्षणे' । क्तः । आमुक्तप्रतिमुक्तौ । 'णह बन्धने' ।

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः"

इत्यल्लोपः । 'नहो धः' (८. २. ३४) इति धः । पिनद्धः । यथापिनद्धः परिहितकर्पटे, तथा पिनद्धोऽपीति वच्छब्दार्थः ॥

सन्नद्धो वर्मितः सज्जो दंसितो व्यूढकङ्कटः ।

क्षीर० — सन्नह्यति स्म सन्नद्धः । वर्म सञ्जातमस्य वर्मितः ।

सञ्जायते सज्जति वा सज्जः। व्यूढो धृतः कङ्कटो येन सः व्यूढकङ्कटः॥

टीका० — सन्नद्धपञ्चकं कृतसन्नाहे[1]। पिनद्धवत् सन्नद्धः। 'सत्यापपाश—' (३. १. २९) इति णिजन्तात् क्तः। वर्मितः[2]। 'षस्ज गतौ'। पचाद्यच्। सज्जः। दंशेः क्तः। दंशितः॥

त्रिष्वामुक्तादयः

क्षीर० — नवेत्यर्थः॥

टीका० — आमुक्तादयो[3] व्यूढकङ्कटान्तास्त्रिषु॥

वर्मभृतां कावचिकं गणे॥ ६६॥

क्षीर० — कवचिनां समूहः कावचिकम्। 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञ्॥

टीका० — वर्मभृतां[4] गणे कावचिकम्। 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञ्। 'नस्तद्धिते' (६. ४. १४४) इति टिलोपः॥

पदातिपत्तिपद्गपादातिकपदाजयः।
पद्मश्च पदिकश्च

क्षीर० — पादाभ्यामतति गच्छति पदातिः। पादाभ्यामजति पदाजिः। 'पादस्य पदाज्यातिगोपहतेषु' (६. ३. ५२) इति पदभावः। हलन्तपक्षे पद्मः। यल्लक्ष्यं — 'पद्मा भरद्वाजमुनिं सशिष्यम्' (भट्टि० स० ३. श्लो० ४१)। पादाभ्यामतति पादातिकः। औणादिक इकः। वि-

---

१. 'हे। अपि' ञ. पाठः. २. 'वर्मितदंशितौ तारकादीतजन्तौ। 'षस्ज गतौ'। अर्ज सर्ज व्यूढकङ्कटो बहुव्रीहिः॥ आ' ङ. छ. पाठः. ३. 'दिव्यूढ', ४. 'कवचिनां समूहे का' ञ. पाठः.

नयादित्वात् स्वार्थे ठग्वा । पतति पत्तिः । पादाभ्यां चरति पदिकः । पर्पादित्वात् ठन् । इके चरतौ[1] वक्तव्यात् पादिकः ॥

टीका० — पदातिसप्तकं पादानीके । 'अत सातत्यगमने' । 'अज्यतिभ्यां च' (उ० ४. १३२) इत्यनुवृत्तौ 'पादे च' (उ० ४. १३३) इति पादोपपदे इण् । 'पादस्य पदाज्याति —' (६. ३. ५२) इति[2] पदादेशो[3]ऽदन्तः । पदातिः । 'पदेर्नित्' इति पत्तिः । पादाभ्यां गच्छतीति पदगः । पूर्ववत् पदादेशः । पादातमस्यास्तीति पादातिकः । 'अत इनिठनौ' (५. २. ११९) इति ठन् । पदाजिरिति । 'पादस्य पदाज्याति—' (६. ३. ५२) इति[4] निपातनाद् अजेर्न वीभावः । पादसमानाद्धलन्तात् पच्छब्दात् पद्दः । पद्भ्यां चरतीति पदिकः । 'पर्पादिभ्यः ष्ठन्' (४. ४. १०) । 'इके चरतावुपसख्यानम्' (वा० ६. ३. ५३) इति पद्भावः ॥

अथ पादातं पत्तिसंहतिः ॥ ६७ ॥

क्षीर० — पदातीनां समूहः पादातम् । 'भिक्षादिभ्योऽण्' (४. २. ३८) ॥

टीका० — पदातिसमूहे पादातम् । 'भिक्षादिभ्योऽण्' (४. २. ३८) ॥

शस्त्राजीवे काण्डपृष्ठायुधीयायुधिकाः समाः ।

क्षीर० — काण्डानि पृष्ठेऽस्य काण्डपृष्ठः । आयुधेन जीवति । 'आयुधाच्छ च' (४. ४. १४) इति ठक्छौ ॥

टीका० —शस्त्राजीवचतुष्कं यः शस्त्रं विधार्यावलगति, तत्र । वाहिताग्न्यादित्वात् काण्डस्पृष्टः स्पृष्टकाण्डः । तेन जीवतीत्यर्थे 'आयुधाच्छ च' (४. ४. १४) इति छठकौ । आयुधीयायुधिकौ ॥

---

१. 'तौ पद् व' ख. पाठः. २. 'ति निपातनादजेर्न वीभावः । प' ञ. पाठः. ३. 'शः । प' क. पाठः. ४. 'ति पदादेशः । पाद' ख. ग. ङ. छ. पाठः.

कृतहस्तः सुप्रयोगविशिखः[1] कृतपुङ्खवत् ॥ ६८ ॥

क्षीर० — कृतौ सिद्धौ हस्तावस्य कृतहस्तः। कृताः पुङ्खा अनेन कृतपुङ्खः ॥

टीका० — सुप्रयुक्तकाण्डे पुरुषे कृतहस्तत्रयम्। कृतोऽभ्यस्तो हस्तो येन स कृतहस्तः। सुप्रयोगविशिखोऽपि बहुव्रीहिः। कृतपुङ्खवदित्यत्र कृतशब्दो गृहीतवाची। यथा— 'अकृतव्यूहाः पाणिनीयाः', 'कृतमपि शास्त्रं निवर्तयन्ति'। अत्र हि अकृतव्यूहा अगृहीतशास्त्रा इति परिभाषावृत्तिकारैरुक्तम्। कृतपुङ्खवत् कृतपुङ्ख इव सुप्रयोगविशिख इति वच्छब्दस्यार्थः ॥

अपराद्धपृषत्कोऽसौ लक्षाद् यश्च्युतसायकः।

क्षीर० — अपराद्धा अलब्धलक्षा बाणा अस्य अपराद्धपृषत्कः ॥

टीका० — लक्षात् च्युतः सायको बाणो यस्यासावपराद्धपृषत्कः। राधेः क्तः। अपराद्धः। अपराध्यो यकारान्त इति केचित्। अपराद्धः अशोभनः पृषक्तोऽस्येति बहुव्रीहिः ॥

धन्वी धनुष्मान् धानुष्को निषङ्गयस्त्री धनुर्धरः ॥ ६९ ॥

क्षीर० — धन्वास्यास्तीति धन्वी। व्रीह्यादित्वादिनिः। धनुःप्रहरणमस्य धानुष्कः। तदस्य प्रहरणमिति ठक्। निषङ्गस्तूणोऽस्यास्तीति निषङ्गी। अस्त्राणि सन्त्यस्य अस्त्री ॥

टीका० — धन्विषट्कं धानुष्के। धनुस्समानार्थाद्धन्वन्शब्दाद् व्रीह्यादित्वादिनिः। धन्वी। धनुष्मान् मत्वन्तः। धनुःप्रहरणमस्येति धानुष्कः। 'प्रहरणम्' (४. ४. ५७) इति ठक्। निषङ्गोऽस्त्रं तूणोऽपि[2]। 'स्याच्चापायुधयोरस्त्रम्' इति रभसः। तद्योगादुभयत्र इनिः ॥

---

१. 'खे' ख. पाठः. २. 'णः। स्या' ग. पाठः.

स्यात् काण्डवांस्तु काण्डीरः

क्षीर० — 'काण्डाण्डादीरन्नीरचौ' (५. २. १११) ॥

टीका०— काण्डवद्वयं काण्डधरे । उपाधिभेदाद् भेदः । काण्ड एव केवलो यस्यास्त्रमिति । अस्यैव वा नामद्वयम् । 'काण्डाण्डादीरन्नीरचौ' (५. २. १११) । काण्डीरः ॥

शाक्तीकः शक्तिहेतिकः ।

क्षीर० — शक्तिः प्रहरणमस्य शाक्तीकः । 'शक्तियष्ट्योरीकक्' (४. ४. ५९) ॥

याष्टीकपारश्वधिकौ यष्टिपार्श्वधहेतिकौ ॥ ७० ॥

क्षीर० — पार्श्वधः परशौ न दृष्टः । अतो 'यष्टिस्वधितिहेतिकौ' इति कश्मीराः पठन्ति । यन्मुनिः — 'परश्वधः कुठारश्च स्वधितिः' । तदस्य प्रहरणम् । 'परश्वधाट्ठञ्च' (४. ४. ५८) ॥

नैस्त्रिंशिकोऽसिहेतिः स्यात्

क्षीर० — निस्त्रिंशोऽसिः प्रहरणमस्य नैस्त्रिंशिकः ॥

टीका० — शक्त्यादिको हेतिः प्रहरणं येषां ते शाक्तीकयाष्टीकपारश्वधिकनैस्त्रिंशिकाः । यथाक्रमं 'शक्तियष्ट्योरीकक्' (४. ४. ५९) 'परश्वधाट्ठञ्च' (४. ४. ५८) 'प्रहरणम्' (४. ४. ५७) इति ठक् ॥

समौ प्रासिककौन्तिकौ ।

क्षीर० — प्रासः कुन्तश्च प्रहरणमस्य ॥

टीका० — प्रासिकद्वयं कुन्तकरे । पूर्ववत् ठक् ॥

चर्मी फलकपाणिः स्यात्

क्षीर० — चर्म[1] फलकोऽस्यास्तीति चर्मी[2]। फलति विशीर्यते घातैः फलकः। रलयोरैक्यात् फरकोऽपि ॥

टीका० — चर्मिद्वयं फलकपाणौ। चर्मी व्रीह्यादिः ॥

पताकी वैजयन्तिकः ॥ ७१ ॥

क्षीर० — वैजयन्त्या चरति वैजयन्तिकः। 'चरति' (४. ४. ८) इति ठक् ॥

टीका०—पताकिद्वयं[3] पताकायुक्ते। व्रीह्यादित्वादिनिः। पताकी। 'चरति' (४. ४. ८) इति ठक्। वैजयन्तिकः ॥

अनुप्लवः सहायश्चानुचरोऽभिचरः समाः।

क्षीर० — अनु पश्चात् प्लवते अनुप्लवः। सह अयते सहायः ॥

टीका० — अनुप्लवचतुष्कं सहायें[4] वाच्छियाण[5] इति ख्याते। सर्वे पचाद्यजन्ताः। सह अयते गच्छतीति[6] सहायः। अन्वभिशब्दौ पश्चादर्थे ॥

पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः ॥ ७२ ॥

पुरोगमः पुरोगामी

क्षीर० — पुरो गच्छतीति पुरोगः। गमश्च (इति?) डः। अग्रे सरत्यग्रेसरः। 'पुरोऽग्रतोऽग्रेषु सर्तेः' (३. २. १८)। टः। प्रतिष्ठते प्रष्ठः। 'प्रष्ठोऽग्रगामिनि' (८. ३. ९२) इति साधुः ॥

टीका०—अग्रगामिनि पादातिकादौ पुरोगसप्तकम्। 'अन्येष्वपि —' (३. २. १०१) इति डः। पुरोगः। 'पुरोऽग्रतोऽग्रेषु सर्तेः (३. २. १८) इति टः। पुरःसराग्रेसराग्रतःसराः। 'प्रष्ठोऽग्रगामिनि' (८. ३. ९२) इति निपा-

---

१. 'र्मा' ख. पाठः. २. 'पुरोऽस्या' ग. घ. ङ. पाठः. ३ 'कायुक्ते पताकी।' क. ग. पाठः. ४. 'ये। स' ञ. पाठः. ५. 'पाजिया' ख. पाठः. ६. 'उच्छति' घ. पाठः.

तनात् प्रष्ठः । 'गमश्च' (३. २. ४७) इति खचि पुरोगमः । अव्ययत्वान्नुमभावः । णिनौ पुरोगामी ॥

मन्दगामी तु मन्थरः ।

क्षीर० — मश्नाति पादौ मन्थरः ॥

टीका० — मन्दगामिद्वयं **मन्दगमनशीले** ताच्छीलिकणिनौ मन्दगामी । 'मन्थ विलोडने' । 'ऋच्छेरन्' (उ० ३. १३१) इति बाहुलकोऽरन् । मन्थरः ॥

जङ्घालोऽतिजवः

क्षीर० — जङ्घे स्तोऽस्य जङ्घालः ॥

टीका० — **अतिवेगवति** जङ्घालद्वयम् । 'प्राणिस्थादातो लजन्यतरस्याम्' (५. २. ९६) इति लच् । जङ्घालः । अतिशयितो जवो वेगो यस्य सोऽतिजवः ॥

तुल्यौ जङ्घाकरिकजाङ्घिकौ ॥ ७३ ॥

क्षीर० — जङ्घा एव करो राजदेयोंऽशोऽस्त्यस्य जङ्घाकरिकः । जङ्घाभ्यां जीवति जाङ्घिकः ॥

टीका० — जङ्घाकरिकद्वयं **जङ्घाजीविनि धावकादौ** । जङ्घैव करी यस्येति व्युत्पत्त्या संज्ञायां कनि जङ्घाकरिक इति कैश्चित्[1] । करो राजदेयः । जङ्घैव करो जङ्घाकरः । तद्योगाद् मत्वर्थठनि जङ्घाकरिक इत्यपरः । 'जीवति' इति ठकि जाङ्घिकः ॥

तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ।

क्षीर० — तरोऽस्यास्ति तरस्वी । 'अस्मायामेधा —' (५. २. १२१) इति विनिः । त्वरते स्म त्वरितः । प्रजवते प्रजवी । 'प्रजोरिनिः'

---

१. 'केचित्' अ. पाठः.

(३. २. १५६)। जवते तच्छीलो जवनः। 'जुचङ्क्रम्य—' (३. २. १५०) इति युच्। जवते जवः। पचाद्यच्॥

टीका०—वेगवन्मात्रे तरस्विषद्क्रम्। 'अस्मायामेधास्रजो विनिः' (५. २. १२१)। तरस्वी। त्वरितजवयोः अर्शआद्यच्। वेगयोगाद् वेगी। जुः सौत्रो धातुः। चवर्गादिः। 'प्रजोरिनिः' (३. २. १९६) इति प्रजवी। जुचङ्क्रम्यादियुचि जवनः॥

जय्यो यः शक्यते जेतुं

क्षीर०—'क्षय्यजय्यौ शक्यार्थे' (६. १. ८१) इति साधुः॥

टीका०—अवश्यं जेतुं शक्यो जय्यः। 'शकि लिङ् च' (३. ३. १७२) इति शक्नोत्यर्थे वर्तमानाद् धातोर्लिङ्कृत्यानां विधानाद् 'अचो यत्' (३. १. ९७) इति यत्। 'क्षय्यजय्यौ शक्यार्थे' (६. १. ८१) इत्ययादेशनिपातनाद् जय्यः॥

जेयो जेतव्यमात्रके ॥ ७४ ॥

क्षीर०—शक्यादन्यत्रेत्यर्थः॥

टीका०—योग्यतामात्रेण जयनीये जेयः। 'अचो यत्' (३. १. ९७)॥

जैत्रस्तु जेता

क्षीर०—जेतैव जैत्रः। तृन्नन्तात् प्रज्ञादित्वादण्। जेतुरयं वा। फलितं[2] तुल्यार्थत्वम्॥

टीका०—जेतृमात्रे जैत्रद्वयम्। जयशीले तु 'जेता जिष्णुश्च जित्वर' इति वक्ष्यति। जेतृशब्दात् प्रज्ञाद्यणि जैत्रः। तृचि जेता॥

यो गच्छत्यलं विद्विषतः प्रति।

---

१. 'म्येत्यादि' ज. पाठः. २. 'लतस्तुल्या' ख. पाठः.

सोऽस्यामित्रोऽस्यमित्रीयोऽभ्यमित्रीण इत्यपि ॥ ७५॥

क्षीर० — आभिमुख्येनामित्रानलङ्गामी । 'अध्वनो यत्खौ' (५. २. १६) 'अभ्यमित्राच्छ च' (५. २. १७) इति छो यत्खौ च ॥

टीका० — विपक्षाभिमुखमत्यन्तगन्तरि अभ्यमित्र्यत्रयम् । 'अध्वनो यत्खौ' (५. २. १६) इत्यनुवर्तमाने 'अभ्यमित्राच्छ च' (५. २. १७) इति छयत्खप्रत्ययाः ॥

ऊर्जस्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः ।

क्षीर० — ऊर्ज[1] ऊर्जा वास्त्यस्येति 'ज्योत्स्नातमिस्रा—' (५. २. ११४) इति साधुः । ऊर्जो (नदिस? नास) न्तं मन्यते । अन्यथा ऊर्जस्वीति निपातनं व्यर्थं स्यात् । 'अस्मायामेधास्रजो विनिः' (५. २. १२१) इति विधिना सिद्धत्वात् ॥

टीका० — अतिशयितबलयुक्ते अतिशयितपराक्रमयुक्ते वा ऊर्जस्वलद्वयम् । 'ज्योत्स्नातमिस्रा —' (५. २. ११४) इत्यादिना निपातितौ ॥

स्यादुरस्वानुरसिलः

क्षीर० — उरसा बलं लक्ष्यते । तदस्यास्ति । पिच्छादित्वादिलच् ॥

टीका० — अतिशयितोरसि उरस्वद्वयम् । मतुपि 'झयः' (?) (८. २. १०) इति वत्वे उरस्वान् । पिच्छादीलचि उरसिलः ॥

रथिको रथिरो रथी ॥ ७६ ॥

क्षीर० — रथोऽस्यास्ति रथिकः । 'अत इनिठनौ' (५. २. ११५) । 'मधारथाभ्यामिरन्निरचौ' (वा० ५. २. १०९) । रथिन इत्यपपाठः ॥

टीका० — रथस्वामिनि राजादौ रथिकत्रयम् । 'अत इनिठनौ'

---

१. 'ऊर्जमस्यास्तीति' क. च. पाठः. २. 'जोऽस' क. ग. घ. पाठः.

(५. २. ११५)। रथिकरथिनौ। 'मेधारथाभ्यामिरच्निरचौ वक्तव्यौ' (वा० ५. २. १०९) इति मत्वर्थे इरच्। रथिरः॥

कामंगाम्यनुकामीनो हि

क्षीर०—अनुकामं यथेच्छं गामी अनुकामीनः। 'अवारपारात्यन्तानुकामं गामी' (५. २. ११) इति खः॥

टीका०—कामंगामी यथेष्टगमनशीलः। स्वेच्छाप्रवृत्तिरनुकामीनः। 'अवारपारात्यन्तानुकामं गामी' (५. २. ११) इति खः॥

अत्यन्तीनस्तथा भृशम्।

क्षीर०—अत्यन्तं भृशं कृत्वा गामीत्यत्यन्तीनः। भृशं गन्तेत्यर्थः। पूर्ववत् खः॥

टीका०—अत्यन्तगमनशीले अत्यन्तीनः। पूर्ववत् खः॥

शूरो वीरश्च विक्रान्तः

क्षीर०—शूरयते वीरयते शूरवीरौ। विक्रमते उत्सहते स्म विक्रान्तः॥

टीका०—शूरत्रयं शूरे। 'शूर वीर विक्रान्तौ'। चुरादिः। पचादिः। सूर्यनाम्यशत्वमपि निरूपितम्। क्रमेः क्तः। क्रान्तः॥

जेता जिष्णुश्च जित्वरः॥ ७७॥

क्षीर०—जेतुं शील इति तृन्। 'ग्लाजिस्थश्च क्स्नुः' (३. २. १३९)। 'इण्नशिजिसर्त्तिभ्यः करप्' (३. २. १६३)॥

टीका०—जैयनशीले जेतृत्रयम्। जयतेस्तृचि जेता। 'ग्लाजिस्थश्च क्स्नुः' (३. २. १३९)। जिष्णुः। इत्वरवज्जित्वरः॥

सांयुगीनो रणे साधुः

---

१. 'मी', २. 'गच्छतीति अ' क. पाठः. ३. 'जेतुं शी' ख. पाठः.

क्षीर० — संयुगे साधुः सांयुगीनः । 'प्रतिजनादिभ्यः खञ्' (४. ४. ९९) ॥

टीका० — सङ्ग्रामकुशले सांयुगीनः । 'प्रतिजनादिभ्यः खञ्' (४. ४. ९९) इति खञ् ॥

शस्त्राजीवादयस्त्रिषु ।

क्षीर० — वाच्यलिङ्गत्वात् ॥

टीका० — पूर्वोक्ताः शस्त्राजीवादयः सांयुगीनान्तास्त्रिषु ॥

ध्वजिनी वाहिनी सेना पृतनानीकिनी चमूः ॥ ७८ ॥

वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् ।

क्षीर० — वाहाः सन्त्यस्यां वाहिनी । सिनोति सेना, सह इनेन वर्तते वा । प्रियते पृतना । 'पृङ् व्यायामे' । चमत्यरीन् चमूः । वरूथो रथगुप्तिरस्त्यस्यां वरूथिनी । बलति प्राणिति बलम् । सेनैव सैन्यम् । चातुर्वर्ण्यादित्वात् ष्यञ् । करोति चकते वा चक्रम् । अनित्यनीकं, न नीयते वा । सैन्यैकदेशोऽयम् ॥

टीका० — ध्वजिनीसप्तकं सेनायाम् । तत्र वाहिनी पृतना अनीकिनी चमूरिति चतस्रः सेनाभेदेऽपि वक्ष्यति । पताकाहयबलरथगुप्तीनां योगाद् ध्वजिनीवाहिन्यनीकिनीवरूथिन्यः । 'कृवृजृपृसिदुपन्यनिस्वपिभ्यो नित्' (उ० ३. १०) इति नः । सेना । 'कृपिचमितनि —' (उ० १. ८४) इत्यादिना ऊः । चमूः । बलचतुष्कं सामान्येन सेनाङ्गे । बलचक्रशब्दौ उक्तौ । सेनैव सैन्यम् । हृषीकवदनीकम् ॥

व्यूहस्तु बलविन्यासः

---

१. 'नि क्रियते च' क. पाठः.

क्षीर० — व्यूह्यते रच्यते व्यूहः ॥

टीका० — यथोक्तदेशे बलविन्यासो विभज्य स्थापनं व्यूहः। 'ऊह वितर्के'। घञ् ॥

भेदा दण्डादयो युधि ॥ ७९ ॥

क्षीर० — व्यूहस्येति शेषः। यदाहुः —

"दण्डो मण्डलभोगौ चाप्युत्सन्नश्चाचलो दृढः।
व्यूहास्तेषां विशेषाः स्युश्चक्रव्यूहादयोऽपि च" ॥

टीका० — दण्डभोगमण्डलासंहताश्चत्वारः प्रकृतिव्यूहभेदाः। तत्रानीकानां तिर्यग्वृत्तिर्दण्डः। समस्तानामन्वावृत्तिरन्योन्यगतावृत्तिर्भोगः। मण्डलरचनया सरतामनीकानां सर्वतोवृत्तिः सर्पशरीरवन्मण्डलः। स्थितानामितरेतरसंहतानां विशिष्टतराणामनीकानां पृथग्वृत्तिरसंहतः। तथाच कामन्दकः —

"तिर्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽन्वावृत्तिरेव च।
मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः ॥"

इति। तत्रापि प्रदरदृढकादयः सप्तदश दण्डभेदाः। गोमूत्रिकाहिंसकसञ्चारिकशकट(नरक? मकर)पतन्तकाः पञ्च भोगभेदाः। सर्वतोभद्रदुर्जयौ मण्डलभेदौ। अर्धचन्द्रकोद्यानादयः षडसंहतभेदाः ॥

प्रत्यासारो व्यूहपार्ष्णिः

क्षीर० — प्रत्यासरति भग्नान् प्रत्यासारः। 'सृ स्थिरे' (३. ३. १७) इति घञ्। पार्ष्णिः पश्चाद्भागः ॥

टीका० — व्यूहसमवेत एव व्यूहस्य पश्चाद्भागे व्यूहान्तरे वा प्रत्यासारद्वयम्। सर्तेर्घञ्। प्रत्यासारः ॥

सैन्यपृष्ठे प्रतिग्रहः।

१. 'च व्युत्पन्न' क. पाठः. २. 'नु' ञ. पाठः. ३. 'तिर्यग्वृ' ग. पाठः ४. 'किः', ५. 'ना' ञ. पाठः. ६. 'भागान' ग. घ. पाठः.

क्षीर० — प्रतिगृह्यतेऽवष्टभ्यतेऽनेन सैन्यम् ॥

टीका० — यत्र स्थितो राजा स्वसैन्यं प्रतिगृह्णाति, तत्सैन्यस्य पश्चाद् धनुःशतद्वयान्तरे स्थितं भिन्नसङ्घातमनीकं प्रतिग्रहः परिग्रहो वा । ग्रहेरप् ॥

एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ॥ ८० ॥

क्षीर० — पतति पत्तिः सेनाङ्गम् । यद् भारतम् —

"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते" ॥

टीका० — पत्तिनवकं प्रत्येकं सेनाविशेषे । तत्र त्रिभिरश्वैर्गजनैकेन रथेन पदातिभिः पञ्चभिः पत्तिर्नाम सेनान्तरम् ॥

पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ।
सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ॥ ८१ ॥
अनीकिनी

क्षीर० — पत्तिस्त्रिगुणा सेनामुखम् । तत्त्रिगुणं गुडति गुल्मः । तत्त्रिगुणो गण्यते गणः । एवमुत्तरोत्तरं क्रमात् त्रिगुणम् ॥

टीका० — पत्त्यङ्गैश्च सर्वैर्गजादिभिर्यथापूर्वं त्रिगुणैः तथोक्तक्रमेण सेनामुखादयो भवन्ति । एतदुक्तं भवति — तिस्रः पत्तयः सेनामुखम । त्रिभिः सेनामुखैर्गुल्मः । गुल्मत्रयेण गणः । त्रयो गणा वाहिनी । वाहिनीत्रयं पृतना । पृतनात्रयं चमूः । चमूत्रयमनीकिनी ॥

दशानीकिन्यक्षौहिणी

क्षीर० — अक्षाणां रथकाष्ठानाम् ऊहोऽस्त्यस्याः । अक्षादूहिन्यां वृद्धिश्च ॥

---

१. 'च्' क. छ. पाठः. २. 'नरश्चैको नागाः प' ख. पाठः.

टीका० — अक्षौहिण्यां न त्रैगुण्यं, किन्तु दशानीकिन्यो[1]ऽक्षौहिणी। अक्षो रथावयवः, तस्येाहः, तद्योगान्मत्वर्थीय इनिः। 'ऋतेभ्यो ङीन्' (४. १. ५)। 'पूर्वपदात् —' (८. ४. ३) इत्यादिना णः। 'अक्षादूहिन्यां वृद्धिर्वक्तव्या'(वा० ६. १. ८९) इति वृद्धिः।

"अक्षौहिण्यामित्यधिकैः सप्तत्या त्वष्टभिः शतैः।
संयुक्तानि सहस्राणि रथानामेकविंशतिः॥
एवमेव गजानां तु संख्यानं कीर्तितं बुधैः।
पञ्चषष्टिसहस्राणि षट्शतानि दशैव तु॥
सङ्ख्याता[2]स्तुरगास्तज्ज्ञैर्विना रथैस्तुरङ्गमैः।"

रथसम्बन्धिनोऽश्वान् विहायेत्यर्थः।

"नृणां शतसहस्रं तु सहस्राणि नवैव तु॥
शतानि त्रीणि चान्यानि पञ्चाशत्तु पदातयः॥"

इति तदङ्केनाप्यक्षौहिणीसङ्ख्या यथा—गजरथौ (२१८७०), अश्वः (६५६१०) पदातिः (१०९३५०)॥

अथ सम्पदि।

सम्पत्तिः श्रीश्च लक्ष्मीश्च

क्षीर० — 'सम्पदादिभ्यो भावे किव् वक्तव्यः' (वा० ३. ३. १०८)। श्रयन्ति तां श्रीः। 'किव् वचि —' (उ० २. ६०) इति किव दीर्घश्च॥

टीका० — धनोत्कर्षः सम्पत्तिः, तत्र सम्पच्चनुष्कम्। 'सम्पदादिभ्यः किव् वक्तव्यः'। (वा० ३. ३. १०८)। सम्पत्। श्रीलक्ष्मीशब्दावुक्तौ। क्तिनि सम्पत्तिः॥

---

१ 'न्य' ङ. छ. पाठः. २. 'ता' ख. पाठः. ३. 'च प' ख. ङ. छ. पाठः.

विपत्त्यां विपदापदौ ॥ ८२ ॥

क्षीर० — विपत्तिर्दारिद्र्यम् ॥

टीका० — विपत्तित्रयं विपदि । पूर्ववत् ॥

आयुधं तु प्रहरणं शस्त्रमस्त्रम्

क्षीर० — आयुध्यन्तेऽनेनेत्यायुधम् । 'घञर्थे कविधानं स्थास्ना-गापाव्यधिहनियुध्यर्थम्' (वा० ३. ३. ५८) । शस्यतेऽनेन शस्त्रम् । 'दाम्नी —' (३. २. १८२) इति करणे ष्ट्रन् । अस्यतेऽस्त्रम् । हेतिर्नानार्थे ॥

टीका० — आयुधचतुष्कं शस्त्रमात्रे । 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति युध्यतेः कः । आयुधम् । 'शसु हिंसायाम्' । 'दाम्नीशस —' (३. २. १८२) इत्यादिना ष्ट्रन् । शस्त्रम् । 'असु क्षेपणे' । *'ष्ट्रन्' (उ० ४. १६०) इति ष्ट्रन् । अस्त्रम् । शस्त्रं, विना क्षेपेण[3] घातकं खड्गादि, क्षेपणीयं शर(श)ल्यादि अस्त्रमिति केचिच्छस्त्रास्त्रयोर्भेदमाहुः । 'शस्त्रास्त्रैर्बहुधा मुक्तै-रि'ति[2] देवीमाहात्म्ये च ॥

अथास्त्रियौ ।

धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् ॥ ८३ ॥

इष्वासोऽपि

क्षीर० — धन्यते अर्थ्यते धनुः । अर्धर्चादिः । यल्लक्ष्यं — 'ततो धनुषमादाय' । चपस्य वेणोर्विकारश्चापम् । धनेः(इति?) कनिप् । शरा अस्यन्तेऽनेनेति[3] शरासनम् । 'कुदि अनृतभाषणे' । अस्मादूँ[4] अण्डन्, कुर्देर्वा रेफलोपे कोदण्डम् । कर्मणे प्रभवति कार्मुकम् । 'कर्मण उकञ्' (५. १. १०३) । इषवोऽस्यन्तेऽनेन इष्वासः । आसोऽपि ॥

टीका० — धनुःसप्तकं चापे । 'धन धान्ये' । 'अर्तिपृवपियजितनिध-नित्रपिभ्यो नित्' (उ० २. ११७) इति उसिः । धनुः सान्तम् । 'भृमृशीतृचे-

---

१. 'प' ब. पाठः. २. 'त्म्यं' ख. पाठः. ३. 'न श' ख. ग. पाठः. ४. 'तृ, कु' क. पाठः. ५. 'स' ख. पाठः.

---

* 'सर्वधातुभ्यः ष्ट्रन्' इति मुद्रितोणादिपाठः ।

रित्सरितनिधनिमिमस्जिभ्य उः' (उ० १. ७) इत्यनेन धनुरुदन्तोऽपीत्युणादिः। दीर्घान्तः स्त्रीलिङ्गः। तथाच — 'शरावापो धनूः स्त्री स्याद्' इति त्रिकाण्डशेषः। 'चप सान्त्वने'। भूवादौ पवर्गमध्ये पठितः। ततः पचाद्यच्। चपो वृक्षविशेषः। तस्य विकारश्चापः। धन्वचतुष्कं क्लीबम्। तत्र धन्व नान्तम्। 'कर्मण उकञ्' (५. १. १०३)। कार्मुकम्। इष्वासो मूर्धन्यमध्यो दन्त्यान्तः॥

अथ कर्णस्य कालपृष्ठं शरासनम्।
कपिध्वजस्य गाण्डीवगाण्डिवौ पुन्नपुंसके॥ ८४॥

क्षीर० — गाण्डिः पर्वास्यास्तीति गाण्डीवम्। 'गाण्ड्यजगात् संज्ञायाम्' (५. २. ११०) इति वः। गाण्डिरिदन्त ईदन्तश्चात्र श्लिष्य निर्दिष्टः। पुन्नपुंसके इति प्रथमाद्विवचनमजहल्लिङ्गम्॥

टीका० — कर्णस्य कानीनस्य धनुः कालपृष्ठम्। कपिध्वजोऽर्जुनः, तद्धनुषि गाण्डीवद्वयम्। 'गाण्ड्यजगात् संज्ञायाम्' (५ २. ११०) इति गाण्डीगाण्डिशब्दाभ्यां वः। गाण्डीवं गाण्डिवम्। द्वितीयो ह्रस्वान्तः, 'गाण्ड्यजगादि'ति संहितायां दीर्घह्रस्वान्तयोस्तुल्यत्वात्॥

कोटिरस्याटनिः

क्षीर० — अस्य धनुषः प्रान्तः कुटति कोटिः। अटत्यटनिः। अटनीत्येके॥

टीका० — धनुषः कोटिरुभयप्रान्तम् अटनिः। 'अट पट गतौ'। अशनिवदैनिः। पक्षे ङीष्॥

गोधे तले ज्याघातवारणे।

क्षीर० — गोधा च गोधा च द्वे, सव्यसाचित्वात्। 'गुध परिवेष्टने'। तलं चर्मादिमयो ज्याघाताधारः। गोधा तला च गोधातले द्वे इत्येके॥

---

१. 'स्ति गा' ख. ग. घ. पाठः. २. 'दटनिः' ञ. पाठः.

टीका० — गुणाद्याघातनिवारणार्थं[1] बाहुपट्टिकायां गोधाद्वयम् ।

"तलस्ता(लं?ले) चपेटे च तलं चाधः स्वरूपयोः ।
*कार्यवीर्ये[2] प्रकोष्ठे ज्याघातस्यैवापवारके ॥"

क्वचिद् बाह्वोर्द्वित्वाद् गोधे तले इति पाठः ॥

लस्तकस्तु धनुर्मध्यं

क्षीर० — 'लस श्लेषणे' ॥

टीका० — वाँस[3] इति ख्याते लस्तकः ॥

मौर्वी ज्या शिञ्जिनी गुणः ॥ ८८ ॥

क्षीर० — मूर्वाख्यतृणस्य विकारो मौर्वी । जिनाति ज्या । जीवापि । शिङ्के शब्दायते शिञ्जिनी । गुण्यतेऽभ्यस्यते गुणः ॥

टीका० — मौर्वीचतुष्कं धनुर्गुणे[4] । मूर्वा वृक्षविशेषः, तद्विकारो मौर्वी । ज्या चवर्गादिः । आवश्यकणिनौ शिञ्जिनी । तालव्यादिः । गुण उक्तः ॥

स्यात् प्रत्यालीढमालीढमित्यादि स्थानपञ्चकम् ।

क्षीर० — जङ्घयोश्चारिनिवृत्तौ[5] स्थितिः स्थानकम्[6] । अत्र विशेषः । आलेढि भुवमालीढम् । आदिशब्दात् समपादं, वैशाखं, मण्डलं च धनुर्वेदप्रसिद्धम् । भरतस्त्वन्यथाह —

"वैष्णवं समपादं च वैशाखं मण्डलं तथा ।
प्रत्यालीढमथालीढं स्थानान्येतानि षड् नृणाम् ॥"

इति ॥

टीका० — प्रत्यालीढमालीढं समपदो विशाखो मण्डलं चेति भन्विनः पञ्च पदस्थानानि । तत्रोर्ध्वस्थस्य वामजङ्घाप्रसारे दक्षिणसङ्कोचे प्रत्यालीढम् ।

---

१. 'र्थं', २. 'मध्ये प्र', ३. 'खाल इ' क. पाठः. ४. 'नुवृ', ५. 'वृं' ख. पाठः. ६. 'मात्र' ग. घ. पाठः.

---

* 'कार्यबीजे' इति तु मेदिनी ।

दक्षिणप्रसारे वामसङ्कोचे आलीढम्। तुल्यपादयुगे[1] समपदम्। वितस्त्यन्तरेण स्थिते पदद्वये विशाखेः[2]। मण्डलाकृतिपदद्वयं मण्डलम्॥

लक्षं लक्ष्यं शरव्यं च

क्षीर०—लक्ष्यत इति घञ् ण्यच्च। शृणाति शरुर्हिंस्रः, तस्मै हितं शरव्यम्। 'उगवादिभ्यो यत्' (५. १. २)। शरैर्वीयते[3] छाद्यते वा[4]। वेध्यं च॥

टीका०—लक्षत्रयं वेज्ञा इति ख्याते। व्याजे लक्षमुक्तम्। शृणातेः स्वरुवदुः (शरुः) आयुधं, तस्मै हितं शरव्यम्। 'उगवादिभ्यो यत्' (५. १. २) इति यत्। 'ओर्गुणः' (६. ४. १४६) इति गुणः। अवन्तादेशः॥

शराभ्यास उपासनम्॥ ८६॥

क्षीर०—'असु क्षेपणे'॥

टीका०—नित्यं शराभ्यासे परिशीलने उपासनम्॥

पृषत्कबाणविशिखा अजिह्मगखगाशुगाः।
कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः॥ ८७॥

क्षीर०—पर्षति सिञ्चत्यसृजा पृषत्कः, पृथक् षट्कमस्येति। धनुर्वेदः—

"पुङ्खः शरस्तथा शल्यं पक्षस्त्रायुजतूनि षट्।"

वणति श्रण्यतेऽनेन वा बाणः। विशीर्यते विशिखः। 'शि निशाँ-ने'। विविधशिखो वा। अजिह्मगः ऋजुगामी। कल्यते क्षिप्यते कलम्बः। मार्गयति लक्ष्यं मार्गणः। शृणाँति शरः। रोप्यते निखन्यते रोपः। इ-ष्यति इषुः। 'इष गतौ'। पर्दराद्या[5] नानार्थे॥

टीका०—पृषत्कद्वादशकं काण्डे। स्पृँशन् कसति गच्छतीति पृषत्कः। पृषोदरादिः मूर्धन्यषश्च। 'बण भण सम्भक्तौ'। घञ्। बाणः। वेशन् खनतीति

---

१. 'गे' ज. पाठः. २. 'खम्॥' ङ. छ. पाठः. ३. 'वा॥ अ' ग. घ. ङ. पाठः. ४. 'शासने' ख. पाठः. ५. 'णो' ग. घ. ङ. पाठः. ६. 'त' ग. घ. पाठः. ७. 'पृ-षति क' ङ. छ. पाठः.

विशिखः। पृषोदरादिः। अजिह्मगाद्यास्त्रयो डप्रत्ययान्ताः। 'कड मदे'। बाहुलकोऽम्बन्। लडयोरेकत्वस्मरणम्। कलम्बः। 'मार्ग अन्वेषणे'। ल्युट्। मार्गणः। शृणातेः 'ऋदोरप्' (३. ३. ५७)। शरः।

"स्थलं क्ष्वेडो विपाटश्च चित्रपुङ्खः शरः सरः"

इति त्रिकाण्डशेषे दन्त्यादिश्च। पत्रं पक्षः, तद्योगात् पत्री। 'रुप विमोहने'। चुरादिः। अच्। रोपः। 'इषेः किच्च' (उ० १. १३) इत्युः। इषुः॥

प्रक्ष्वेडनास्तु नाराचाः

क्षीर०—प्रक्ष्वेडन्ते प्रक्ष्वेडनाः। क्ष्विदे रूपं क्ष्वेडतेर्वोन्नेयम्। नरमञ्चति नराचः। नराच एव नाराचः। स्वार्थेऽण्। सर्वलोहोऽयम्॥

टीका०—प्रक्ष्वेडनद्वयं नाराचे। 'ञिक्ष्विदा स्नेहनमोचनयोः'। नन्द्यादिः। पृषोदरादित्वाड्डुत्वम्। प्रक्ष्वेडनः। नरानाचामतीति नाराचः। 'अन्येभ्योऽपि—' (३. २. १०१) इति डः। 'अन्येषामपि —' (६. ३. १३७) इति दीर्घः॥

पक्षो वाजः

क्षीर०—'पक्ष परिग्रहे'। वजति गच्छत्यनेन वाजः॥

टीका०—काण्डपत्रे पक्षद्वयम्। 'वज गतौ'। करणे घञ्। वाजः। 'अजिव्रज्योश्च' (७. ३. ६०) इति चकारस्यानुक्तसमुच्चयार्थत्वात् कुत्वनिषेधः॥

त्रिषूत्तरे।

क्षीर०—लिङ्गान्ता वाच्यलिङ्गाः॥

---

१. 'डिर्वो' ग. घ. पाठः. २, ३, ४. 'ना' क. ख. ङ. पाठः. ५. 'ष्व' ञ. पाठः. ६. 'जः। न्यङ्क्वादेः कुत्वम्॥ त्रि' ग. घ. ङ. पाठः.

टीका० — उत्तरे परे लिप्तकान्तास्त्रिषु ॥

निरस्तः प्रहिते बाणे

क्षीर० — निरस्यते[1] स्म प्रहीयते स्म, क्षिप्त इत्यर्थः ॥

टीका० — प्रहिते (नि?वि)क्षिप्ते बाणे निरस्तः। प्राक् साधितः ॥

विषाक्ते दिग्धलिप्तकौ ॥ ८८ ॥

क्षीर० — विषेणाक्ते उक्षिते। दिह्यते स्म लिप्यते स्म ॥

टीका० — वि(षभ?षो)क्षितकाण्डे दिग्ध(त्र?द्व)यम्। दिहेः क्तः। दिग्धः। 'लिप उपदेहे'। क्तः। ततः कन्। लिप्तकः ॥

तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः।
तूण्यां

क्षीर० — तूण्यते पूर्यते शरैस्तूणः। तूणीति लिङ्गभेदार्थम्। उपासज्यन्ते निषज्यन्ते (स्म?) च बाणा यत्रेत्युपासङ्गनिषङ्गौ। इषवो धीयन्तेऽत्र इषुधिः। कलापो नानार्थे ॥

टीका० — तूणषट्कं तोण इति ख्याते। 'तूण पूरणे'। चुरादिः। एरचि तूणः। गौरादिङीषि तूणीत्यपीति धातुप्रदीपः। रूपभेदात् पुमान्। टापि तूणेति वररुचिः। 'षेञ्ज सङ्गे'। घञ्। उपासङ्गः। 'कृगृशृपृकटिपटिशौटिभ्य ईरन्'[2] (उ० ४.३०) इति बाहुलक ईरन्। तूणीरः। 'उपसर्गात्—' (८. ३. ९५) इत्यादिना षत्वे निषङ्गो मूर्धन्यषः। इषवो धीयन्तेऽत्रेति इषुधिः ॥

खड्गे तु निस्त्रिंशचन्द्रहासासिक्रष्टयः ॥ ८९ ॥

कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्।

---

१. 'ते प्र' क. ग. पाठः. २. 'स' क. ख. पाठः.

क्षीर०— खण्डयति[1] भिनत्ति खड्गः । निष्क्रान्तस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः । चन्द्रवद्भासः प्रभास्य चन्द्रहासः । अस्यतेऽसिः । ऋषेर्गत्यर्थादृष्टिः । 'ऋत्यकः' (६. १. १२८) इति प्रकृतिभावः । हिंसार्थाद् रिषेस्तु रिष्टिः । चन्द्रहासासिरिष्ट्य इति केचित् पठन्ति । कुक्षौ भवः कौक्षेयकः । 'कुलकुक्षि—' (४. २. ९६) इति ढकञ् । मण्डलाकृत्यग्रमस्य मण्डलाग्रः । करे वलनमस्य करवालः । कल्पते कृपाणः । कृपिः पूरणार्थः ॥

टीका० — खञ्जनवकं खड्गे । 'खट खटि भेदने' । बाहुलको गन् । खञ्जः । निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति निस्त्रिंशः । 'डच्प्रकरणे सङ्ज्ञायास्तत्पुरुषस्योपसङ्ख्यानं निस्त्रिंशाद्यर्थम्' (वा० ५. ४. ७३) । डच् । चन्द्रमिव हसति उद्योतकारित्वाच्चन्द्रहासः । 'कर्मण्यण्' (३. २. १) । 'असु क्षेपणे' । 'खनिकष्यञ्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च' (उ० ४. १४१) इति इः । असिः । दन्त्यसः । 'ऋषि गतौ' । क्तिचि ऋष्टिः । एवमजादिः ।

"चन्द्रहासर्ष्टिनिस्त्रिंशा ज्ञेया एकार्थवाचकाः"

इति त्रिकाण्डशेषश्च । 'रिषि हिंसायां, हलादिरि'ति वर्णदेशना । द्विविध एवेति रभसः । 'कुलकुक्षि—' (४. २. ९६) इत्यादिना ढकञ् । कौक्षेयकः । करं पालयति पलतीति वा करपालः । 'कर्मण्यण् (३. ४. १) । 'विधूतकरपालकः पालक' इति यमकम् ।

"दन्तैश्चिच्छिदिरे लूनकरवालाः पदातयः" (स० १९. श्लो० ५५)

इति माघश्लेषाद् वकारवानपि । कृपाण इति । ऋपेर्बहुलवचनादानच् सम्प्रसारणं चेति न्यासकारः । यथा कृपाणः खड्ग तथा करवालोऽपीति वत्यर्थः ॥

त्सरुः खड्गादिमुष्टौ स्यात्

क्षीर०— 'त्सर छद्मगतौ' ॥

---

१. 'ति ख' ख. पाठः.

टीका० — खड्गच्छुरिकादिमुष्टौ[1] त्सरुः। ना। 'त्सर छद्मगतौ'। दन्त्यसः। चरुवद् उः॥

मेखला तन्निबन्धनम्॥ ९०॥

क्षीर० — मीयते मणिबन्धे प्रक्षिप्यते मेखला। यथा प्रहरतो हस्तान्न निर्याति॥

टीका० — खड्गादिनिबन्धनः सीकनलिकातकादिकं(?)[2] मेखला। गञ्जाया-मिति केचित्॥

फलकोऽस्त्री फलं चर्म

क्षीर० — फलति विशीर्यते प्रहारैः फलकम्। फलं मुनिना खड्गाद्यग्रे दृष्टम्। अयं तु लोकात् फलकं मन्यते। यच्छाश्वतः—

"लाभे[4] सस्ये शरार्द्धाङ्गे व्युष्टौ च फलके फलम्"।

चर्ममयत्वाच्चर्म॥

टीका० — फलगा इति ख्याते फलकत्रयम्। फलकचर्मणी साधिते॥

सङ्ग्राहो मुष्टिरस्य यः।

क्षीर० — सङ्गृह्यतेऽनेन सङ्ग्राहः। 'समि मुष्टौ' (३. ३. ३६) इति घञ्। अस्य चर्मणो मुष्टिर्ग्रहणस्य स्थानम्॥

टीका० — फलकस्य मुष्टौ माण्डु इति ख्याते सङ्ग्राहः। 'समि मुष्टौ' (३. ३. ३६) इति ग्रहेर्घञ्॥

द्रुघणे मुद्गरघनौ

क्षीर० — द्रुं वृक्षाङ्गं हन्ति द्रुघणः। द्रोर्घनो वा। अयोघनो-

---

१. 'दिषु मु' ङ. छ. पाठः. २. 'सिककलिकातनिका' क. ख. ङ. छ. पाठः. ३. 'द' ख. पाठः. ४. 'लो' क. ख. पाठः. ५. 'द्या' ख. पाठः.

ऽन्यः । मुदं गिरति ग्रसते मुद्गरः । हन्यतेऽनेन घनः । 'मूर्तौ घनः' (३. ३. ७७) इति साधुः । यच्छाश्वतः —

"वाद्ये मुस्तेऽम्बुदे सान्द्रे घनः स्याल्लोहमुद्गरे" ॥

टीका० — वर्धकिमुद्गराकृतावस्त्रविशेषे द्रुघणत्रयम् । द्रुः वृक्षो हन्यतेऽनेनेति द्रुघणः । 'करणेऽयोविद्रुषु' (३. ३. ८२) इति द्रुशब्द उपपदे हन्तेर्धातोरप्प्रत्ययः, घनादेशश्च । धातोः 'पूर्वपदात् संज्ञायामगः' (८. ४. ३) इति णत्वम् । क्षुभ्नादेराकृतिगणत्वात् 'कवर्गव्यवाये हादेशप्रतिषेधो वक्तव्य' इति णत्वं न भवतीत्यपरे । मुदं हर्षं हरतीति मुद्गरः । पचाद्यिः ॥

स्यादीली करवालिका ॥ ९१ ॥

क्षीर० — ईड्यते ईली । एकधारोऽसिस्तुरुष्कायुधम् । करवालादल्पे कन् । तरवारिकेत्येके ॥

टीका० — हस्तकुण्डेति ख्याते ईलीद्वयम् ।

"ईलिः करवाली स्याद् धैमेयो धान्यपरिवर्तः[1]"

इति नाममालायामार्यापाठाद् दीर्घादिः । 'इल स्वप्नक्षेपणयोः' । 'इगुपधात् किरि'त्यनेन ह्रस्वादिरिति पुरुषोत्तमटीका । पक्षे ङीष् ॥

भिन्दिपालः सृगस्तुल्यौ

क्षीर० — भिन्दतः पालयति भिन्दिपालः[2] । स हस्ताक्षेप्यो लगुडः । सृज्यते सरति वा सृगः ॥

टीका० — भिन्दिपालद्वयं **हस्तप्रमाणे हस्तकाण्डे** इति ख्याते । नळिकाण्डमिति केचित् तमाहुः ।

"भिन्दिर्द्वादशतालं तु दशकुन्तोऽभिधीयते"

इति भरतीये । सृगो दन्त्यादिः ॥

परिघः परिघातनः ।

क्षीर० — परिहन्ति परिघः । 'परौ घः' (३. ३. ८४) इति घत्वम् । लोहबद्धो लगुडः ॥

---

१. 'तीं' ज. पाठः. २. 'लः । सहस्राक्षे' ख. पाठः,

टीका० — परिघद्वयं लोहबद्धलगुडे खड्गे च । 'परौ घः' (३. ३. ८४) इति हन्तेरप् घादेशश्च । 'परेश्च घाङ्कयोः' (८. २. २२) इति लत्वविकल्पः । परिघः पलिघः । हन्तेर्ण्यन्ताल्ल्युटि परिघातनः ॥

द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः ॥ ९१ ॥

क्षीर० — कुठान् वृक्षान् इयर्त्ति कुठारः । स्वं धियति बिभर्ति स्वधितिः । परान् शृणाति परशुः परश्वधश्च । पर्श्वधोऽपि । यदाह —

"याष्टीकपारश्वधिकौ यष्टिपर्श्वधहेतिकौ" ॥

टीका० — कुठारचतुष्कं कुठारे । कुठं तरुम् आरातीति कुठारः, कप्रत्ययान्तः । आङ्पूर्वाच्छृणातेः 'आङ्परयोः खनिशृभ्यां डिच्च' (उ० १. ३४) इति कुः । परशुः ।

"कुठारः स्त्री च स्वधितिः परशुश्च परश्वधः ।
कुठाटङ्कः पर्शुरथच्छुरिका कोषणादिका ॥"

इति रभसः । परश्वधस्तालव्यमध्यः ॥

स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ।

क्षीर० — शस्यतेऽनया शस्त्री । असेः पुत्रीव, अल्पत्वात् । छुराति छिनत्ति छुरिका । क्षुरिकापि ॥

टीका० — शस्त्रीचतुष्कं छुरिकायाम् । ङीषि शस्त्री । पुत्रीधेनुकाभ्यामसेः षष्ठीसमासः । 'छुर छेदने' । कुन् । छुरिका ॥

वा पुंसि शल्यं शङ्कुर्ना

क्षीर० — शलति विशत्यन्तः शल्यम् । शङ्कतेऽस्माच्छङ्कुरायुधविशेषः । यच्छाश्वतः —

"सङ्ख्याकीलकयोः शङ्कुः शङ्कुः प्रहरणान्तरे" ।

अन्यत्रोपचाराच्छल्यम् ॥

---

१. 'ठारट', २. 'परशुर' क. ख. पाठः.

टीका० — शल्यद्वयं शेल्ल इति ख्याते । शलेः यत् । शल्यः । यादोभेदे शङ्कुरुक्तः ॥

सर्वला तोमरोऽस्त्रियाम् ॥ ९२ ॥

क्षीर० — सर्वान् लाति सर्वला । स्तोम्यते श्लाघ्यते तोमरम् । तुः सौत्रो वा ॥

टीका० — शर्वरीति ख्यातायां शर्वलाद्वयम् । 'शर्व चर्व गतौ' । वृषादिकलच् । शर्वला । 'शार्दूलशर्वलाशलादुः' इति शभेदः ॥

प्रासस्तु कुन्तः

क्षीर० — प्रास्यते प्रासः । हस्तक्षेप्यः (शिल्पः ? शल्यः) । कुणति कुन्तः ॥

टीका० — प्रासद्वयं कुन्ते । 'असु क्षेपणे' । घञ् । प्रासः । कुं तनोतीति कुन्तः । पृषोदरादिः ॥

कोणस्तु स्त्रियः पाल्यश्रिकोटयः ।

क्षीर० — कोणो गृहादेर्विदिक् । 'कुण शब्दोपकरणयोः' । पाति पालिः । अश्नुते अश्रिः । कुटति कोटिः ॥

टीका० — कोणचतुष्कमग्रभागे । यथा षट्कोणः षडश्र इति । पालित्रयं पक्षे ङीषन्तं च । 'अश भोजने' । वङ्क्र्यादित्वाद् रिन् । अश्रिः । कुटेरिः । कोटिः ॥

सर्वाभिसारः सर्वौघः सर्वसन्नहनार्थकः ॥ ९३ ॥

क्षीर० — सर्वेण सैन्येनाभिसरणं सर्वाभिसारः । सर्वेषामोघो वहनं सर्वौघः । सर्वैः सन्नह्यतेऽत्र सर्वसन्नहनम् ॥

टीका० — चतुरङ्गबलस्य सन्नहने सर्वपल्लाण इति ख्याते सर्वाभिसारद्वयम् ॥

लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनो विधिः ।

---

१ 'ज्वलीति' अ. पाठः.

क्षीर०—अस्त्रभृतां राज्ञां यः शास्त्रिको[1] विधिः प्रस्थानात् प्राक्, स लोहाभिसारः। लोहं शस्त्रमभिसार्यते प्रस्थाप्यतेऽत्रेति। नीरस्य शान्त्युदकस्य अजनं क्षेपोऽत्र नीराज(नं[2]नः), मन्त्रोक्तया वाहनायुधादेर्निश्शेषेण राजनं वा। अत्र नीराजनानन्तरं कर्म लोहाभिसार[3] इति मुनिः—

"विधिर्लोहाभिसारस्तु राज्ञां नीराजनोत्तरः"।

भुग्नोऽपि—

"लोहाभिसारस्तु विधिः परो नीराजनान्नृपैः।"
दशम्यां दंसितैः कार्यः"

इति। अत एव नीराजनाद्विधिरित्येके पठन्ति॥

टीका०—महानवमीदीक्षायां बलस्य नीराजने निर्मज्जने राज्ञां शस्त्रधारिणां यः शास्त्रचोदितो विधिः, तत्र लोहाभिहारः॥

यत् सेनयाभिगमनमरौ तदभिषेणनम्॥ ९४॥

क्षीर०—'सत्यापपाश—' (३. १. २५) इति णिच्। 'उपसर्गात् सुनोति—' (८. ३. ६५) इति षत्वम्॥

टीका०—सेनया करणभूतया विजिगीषोररौ शत्रौ आभिमुख्येन गमनमभिषेणनम्। सेनाशब्दात् 'सत्यापपाश—' (३. १. २५) इत्यादिना णिच्। ल्युट्। 'उपसर्गात् सुनोति—' (८. ३. ६५) इत्यादिना षत्वम्॥

यात्रा व्रज्याभिनिर्याणं प्रस्थानं गमनं गमः।

क्षीर०—यान्त्यस्यां यात्रा। व्रजनं व्रज्या। 'व्रजयजोर्भावे क्यप्' (३. ३. ९८)। प्रपूर्वस्तिष्ठतिर्गत्यर्थः। 'ग्रहवृदृनिश्चि—' (३. ३. ५८) इत्यपि गमः॥

---

१. 'न्ति' ग. पाठः. २, ३, ४. 'हा' ग. पाठः.

टीका० — विजिगीषोः प्रयाणे यात्राषट्कम् । यातेः ष्ट्रन् । यात्रा । भिक्षायां व्रज्योक्ता । निर्याणत्रिके ल्युट् । गमेरप् । गमः ॥

स्यादासारः प्रसरणं

क्षीर० — सैन्यस्य सर्वतो व्याप्तिरासारः । आस्रियतेऽनेनेत्यासारः अन्वागच्छद्बलम् । प्रसारस्तु सैन्याद्बहिस्तृणजलाद्यर्थं प्रसरणमिति कौटिल्यः । यल्लक्ष्यं —

"निरुद्धवीवधासारप्रसारा गा इव व्रजम्" ॥

टीका० — सर्वतो बलस्य प्रसारे आसारद्वयम् । सर्तेर्घञ् । आसारः । धैरणिवत् प्रसरणिः । पक्षे 'कृदिकारात्—' (ग० ४. १. ४५) इति ङीष् ॥

प्रचक्रं चलितार्थकम् ॥ ९५ ॥

क्षीर० — प्रस्थितं सैन्यं प्रचक्रम् ॥

टीका० — चलितशब्दस्यार्थे प्रचक्रम् । 'प्रचक्रं चलितं त्रिषु' इत्यमरमाला ॥

अहितान् प्रत्यभीतस्य रणे यानमभिक्रमः ।

क्षीर० — आभिमुख्येनाभिभूयारीन् वा[1] प्रतिगमनमभिक्रमः ॥

टीका० — अरीन् प्रति निर्भयस्य पुंसो याने अभिक्रमः ॥

वैतालिका बोधकराः

क्षीर० — वितालः शब्दः प्रयोजनमेषां वैतालिकाः । मङ्गल्याख्याः प्रातर्बोधका इत्येके ॥

टीका० — निशान्ते ये बोधयन्ति, तत्र वैतालिकद्वयम् । विविधतालेन चरन्तीति[3] वैतालिकाः । 'चरति' (४. ४. ३) इति ठक् ॥

---

१ 'स', २. 'वा ग' क. ख. पाठः. ३. 'ति ठ' ब. पाठः.

चाक्रिका घाण्टिकार्थकाः ॥ ९६ ॥

क्षीर० — चक्रं राष्ट्रम् । घण्टाघातेन देवताग्रे ये शंसन्ति ते, श्रावकाख्याः ॥

टीका० — बहुभिर्मिलित्वा[1] स्तुवत्सु चाक्रिकद्वयम् । चक्रेण चरन्तीति ठक् । घटया[2] चरन्तीति घाण्टिकाः । पृषोदरादित्वाद् वर्णागमः, निरनुनासिको वा ॥

स्युर्मागधास्तु मगधाः[3]

क्षीर० — वंशोदीरणेन ये याचन्ते । आहुश्च —

"वैतालिकास्तु कथ्यन्ते कविभिः सौखशायिकाः ।
राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ॥
मागधाः स्तुतिवंशज्ञाः"

इति । मगधेति याच्ञार्थः कण्ड्वादिः । यच्छ्रीभोजः —

"कमर्थिनः कुषुभ्यन्तु कं मगध्यन्तु मागधाः ।
कमिषुध्यन्तु यज्वानो रामेऽरण्यं भुरण्यति" ॥

टीका० — वंशस्तुतिपाठकेषु मागधद्वयं, वनौषधौ साधितम् ॥

वन्दिनः स्तुतिपाठकाः ।

क्षीर० — वन्दन्ते स्तुवन्ति तच्छीलाः । चत्वार एकार्था इत्येके ॥

टीका० — वीर्यादिस्तुतिं ये नासीरे पठन्ति, तत्र वन्दिद्वयम् । सारपद्यस्तुतिपाठक इति केचित् । व्रीह्यादीनौ वन्दी ॥

संशसकास्तु समयात् सङ्ग्रामादानवर्तिनः ॥ ९७ ॥

---

१. 'लिताभिस्तुवत्सु वावेहा इति ख्यातेषु चा' ख. ङ. छ. पाठः. २. 'ण्ट' ख, पाठः. ३. 'वंशज्ञाः' ख. छ. पाठः.

क्षीर० — संशपन्ति पलायमानान्, सशपथं वा युध्यन्ते दृढनिश्चयाः संशप्तकाः ॥

टीका० — समयात् तत्रैव स्थित्वास्माभिर्योद्धव्यमित निश्चयाद्, अथवा कुलाचाराद्, ये सङ्ग्रामे न निवर्तन्ते, ते संशप्तकाः । 'शप उपालम्भने' । क्तः ॥

रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः ।

क्षीर० — रीयते रेणुः । 'रीङ् गतौ' । धूयते धूलिः । पंसयति वस्त्रादि पांसुः । 'पंसि नाशने' । रज्यते वस्त्राद्यनेन रजः क्लीबे । 'रजनरजकंरजस्सूपसंख्यानम्' इति नलोपः ॥

टीका० — रेणुचतुष्कं धूल्याम् । स्थाणुवद् रेणुः । 'धू विधूनने' । बाहुलकाल्लिः । कुटादित्वाद् ङिद्वद्भावः । वङ्क्रचादित्वात् क्रिन् । रलयोरेकत्वंस्मरणम् । धूलिः । ङीषि धूली च । 'पंशि नाशने' । 'अर्जिदृशिकम्यमिपंशि —' (उ० १. २७) इत्यादिना उः दीर्घश्च । पांशुः । एवमुणादौ तालव्यवान् । धातुवृत्तौ दन्त्यवानुक्तः । अत एव वृन्दावनयमकं —

"कणिकाभिरपां सुखरं विसृजन्ति गुहासमीरणमपांसुखरम्"

इति । रञ्जेः 'भूरञ्जिभ्यां कित्' (उ० ४. २१८) इत्यसुन् । रजः । अदन्तोऽपि । तथाचोत्पलिनी —

"पुष्परेणौ गुणे चैव रजोऽपि रजसा सह"

इति । न द्वयो रज इति सम्बन्धः ॥

चूर्णे क्षोदः

क्षीर० — 'चूर्ण क्षोदे' । 'क्षुदिर् सम्पेषणे' । धूलिप्रायोऽयम् । यच्छाश्वतः —

"चूर्णानि वासयोगाः स्युश्चूर्णो धूलिः सशर्करा" ॥

---

१. 'कयोस्तूप' ग. पाठः. २. 'त्वम्' ख. पाठः. ३. 'ग्याः' क. ग. पाठः.

टीका० — धूलितः किञ्चिदुपचिते क्षोदनेन कृते माषादीनां रजोविशेषे क्षोदद्वयम्। क्षोदसाहचर्यात् चूर्णो ना। 'क्षुदिर् सम्पेषणे'। घञ्। क्षोदः। षडेव समानार्था इत्यपरः॥

समुत्पिञ्जपिञ्जलौ भृशमाकुले॥ ९८॥

क्षीर०—'पिजि हिंसायाम्'। आह च—'समुत्पिञ्जोऽतिसङ्कुलः'॥

टीका० — अत्यन्तव्याकुले सैन्यादौ समुत्पिञ्जद्वयम्। 'तुजि पिजि वलने'। चौरादिकादेरचि समुत्पिञ्जः। पृषोदरादित्वात् पिञ्जलः॥

पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्।

क्षीर० — पतति धूयते पताका। विजयते विजयन्तः। औणादिको झच्। तस्येयं वैजयन्ती। केत्यते संज्ञायतेऽनेन केतनम्। ध्वजति धूयते ध्वजः। पताकादण्डो ध्वज इत्येके। केतुर्नानार्थे॥

टीका० — पताकाचतुष्कं पताकायाम्। '‡शलिपरिपतिभ्यो नित्' इत्याकः। पताका। पटाकाशब्दोऽप्यत्र। विपूर्वाज्जयतेः 'तृभूवसिवहिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च' (उ०३. १३८) इति झच्। अन्तादेशः। पृषोदरादित्वाद् वर्णविपर्ययः। वैजयन्तः। षिदधिकारान्ङीषि वैजयन्ती। विजयन्तानां सम्बन्धिनी वा वैजयन्ती। 'तस्येदम्' (४. ३. १२०) इत्यण्। गेहे केतनमुक्तम्। ध्वजेरच्। ध्वजः॥

सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा॥ ९९॥

क्षीर० — वीरा आशंस्यन्तेऽत्र॥

टीका० — खण्डखण्डि(?) भूतैरश्वहस्त्यादिभिरतिभयङ्करा भूः वीराशंसनम्। 'शन्सु स्तुतौ'। कर्मणि 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति ल्युट्। बहुलमन्यत्रापीति वा युच्॥

---

१. 'ली' ख. पाठः. २. 'क्ष', क. पाठः.

---

‡ इदं मुद्रितोणादौ बलाकादिगणान्तर्गतं दृश्यते।

अहं पूर्वमहं पूर्वमित्यहम्पूर्विका स्त्रियाम् ।

क्षीर० — अहं पूर्वमहं पूर्वमस्यां क्रियायामिति सर्वे यत्र ब्रुवते, सा अहंपूर्विका । स्वार्थे कन् । मत्वर्थीयो वा ठन् ॥

टीका० — अहमग्रे यामि[1] अहमग्रे यामीत्यन्योन्यं यद् योधानां धावितं तत्राहम्पूर्विका । विभक्तिप्रतिरूपकोऽहंशब्दो निपातितः । 'सुप्सुपा' इति योगविभागात् समासः । ततः संज्ञायां कन् । वीप्साया गम्यमानत्वान्न द्विरुक्तिः ॥

आहोपुरुषिका दर्पाद् या स्यात् सम्भावनात्मनि ॥१००॥

क्षीर० — अहो पुरुषोऽहमित्यस्य भावः । मनोज्ञादित्वाद् वुञ् ॥

टीका० — अधिकार्थवचनेनात्मनः शक्तेरप्रतिघाताविष्करणं संभावना, तत्र आहोपुरुषिका । अत्राप्यहोशब्दोऽहंकृद्वाची । पूर्ववत् समासः । मनोज्ञादित्वाद् वुञ् ॥

अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः ।

क्षीर० — अहं शक्तोऽहं शक्त इत्यस्त्यस्यामहमहमिका । ठन् । अहंशब्दो निपातः ॥

टीका० — अन्योन्यं प्रति श्रेष्ठोऽहमित्यभिमानोऽहमहमिका । आर्येयम् ॥

द्रविणं तरःसहोबलशौर्याणि स्थाम शुष्मं च ॥ १०१ ॥
शक्तिः पराक्रमः प्राणः

क्षीर० — द्रवत्यनेनारिर्द्रविणम् । तरत्यनेनापदं तरः । सहतेऽनेन अरिं सहः । असन्तौ । शूरस्य भावः शौर्यम् । तिष्ठन्त्यनेन स्थाम । शुष्यत्यनेनारिः शुष्मम् । शुष्मेत्येके । शकनं शक्तिः । प्राणनं प्राणः ॥

---

१. 'पूर्वमेव स्त्रियामह' ग. पाठः. २. ३. 'भवामि', ४. 'त्वाद् द्वि' ग. पाठः.

टीका० — द्रविणदशकं सामर्थ्ये । 'द्रु गतौ' । 'द्रुदक्षिभ्यामिनन्' (उ० २. ५३) । द्रविणम् । तरतेः सहतेश्च असुनि तरस्सहसी क्लीबे । बलम् उक्तम् । शूरस्य भावः शौर्यम् । तिष्ठतेर्मनिन्, स्थामा । शुषेर्मक्, शुष्मम् । 'शकॢ शक्तौ' । क्तिन् । शक्तिः । क्रमतेर्घञ्, पराक्रमः । प्राण उक्तः ॥

विक्रमस्त्वतिशक्तिता ।

क्षीर० — विक्रमन्तेऽनेन विक्रमः ॥

टीका० — अतिशक्तिता शौर्यातिशयो विक्रमः ॥

वीरपाणं तु यत् पानं वृत्ते भाविनि वा रणे ॥ १०२ ॥

क्षीर० — वीराणां मद्यपानं वीरपाणम् ॥

टीका० — भूते रणे भविष्यति वा यद् योधानां मद्यादिपानं, तद् वीरपाणम् । पातेर्ल्युटि 'वा भावकरणयोः' (८. ४. १०) इति णत्वम् ॥

युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।
मृधमास्कन्दनं सङ्ख्यं समीकं साम्परायिकम् ॥ १०३ ॥
अस्त्रियां समरानीकरणाः कलहविग्रहौ ।
सम्प्रहाराभिसम्पातकलिसंस्फोटसंयुगाः ॥ १०४ ॥
अभ्यामर्दसमाघातसङ्गामाभ्यागमाहवाः ।
समुदायः स्त्रियः संयत्समित्याजिसमिद्युधः ॥ १०५ ॥

क्षीर० — 'युध सम्प्रहारे' । युद्धम् । भावे क्तः । ल्युट्यायोधनम् । जायते जन्यं, 'भव्यगेय —' (३. ४. ६८) इति साधुः । प्रधनन्ति घ्नन्ति प्रधनम् । धनिर्मरणार्थोऽत्र निधनवत् । म्रियतेऽस्मिन् मृधम् । आस्कन्द्यतेऽत्रास्कन्दनम् । संचक्ष्यतेऽस्मिन् सङ्ख्यम् । सम्पूर्वश्चक्षिर्वर्जनार्थः । समीयतेऽस्मिन् समीकम् । 'ई गतौ' । सम्परायो मृत्युः प्रयोजनमस्य साम्परायिकम् । विनयादित्वात् स्वार्थे ठञ्वा । समियर्ति सङ्घटतेऽस्मिन् समरः । न नीयते चाल्यतेऽत्रानीकम् । अनीकमस्त्यस्यर्थे वा ।

---

१. 'समार्थे द्रु' ञ. पाठः. २. 'यन्ते मृ', ३. र्थः । सङ्ख्यं च । स', ४. 'त्र' ग. पाठः.

रणन्तिं दुन्दुभयोऽत्र रणम्। 'वशिरण्योश्च' (वा० ३. ३. ५८) इति वक्तव्यादप्। कल्यते क्षिप्यतेऽत्र कलहः। कलं हीनबलं हन्ति वा। विगृह्णात्यत्र विग्रहः। 'ग्रहवृदृनिश्चि—'(३.३.५८) इत्यप्। सम्प्रहरन्त्यन्योन्यं घ्नन्त्यत्र सम्प्रहारः। अभिसम्पतन्त्यत्र अभिसम्पातः। कल्यतेऽत्र कलिः। संस्फुटन्त्यत्र संस्फोटः। संस्फेट इति तु युक्तः पाठः। 'स्फिट अनादरे'। भरते तु संफेटः। संयुज्यन्तेऽत्र सङ्गता रथयुगा अत्र वा संयुगः। अभ्यामृद्नन्त्यत्र अभ्यामर्दः। समाघ्नन्त्यत्र समाघातः। सङ्गामयन्तेऽस्मिन् सङ्गामः। अभ्यागच्छन्त्यत्र अभ्यागमः। आह्वयन्तेऽत्र आहवः। 'आङि युद्धे' (३. ३. ७३) इत्यप्। 'ह्वः सम्प्रसारणम्' (६. १. ३२)। समुदयन्ते मिलन्त्यत्र समुदायः। संयतन्ते संयच्छन्ति वात्र संयत्। संयन्ति सङ्गच्छन्तेऽत्र समितिः। आ अज्यन्ते क्षिप्यन्तेऽत्राजिः। युध्यन्तेऽस्यां युत्[१]॥

टीका०—युद्धाद्येकत्रिंशद् युद्धे। युद्धाँयोर्धनयोर्भावे क्त्यु[२]टौ। शस्तँजनयोगाज्जन्यम्। यप्प्रकरणे 'अन्येभ्योऽपि दृश्यते'(५. २. १२०) इति यप्। प्रशस्तं धनं सङ्घोऽत्रेति प्रधनम्। दृणातेर्णिचि ल्युट्। प्रविदारणम्। 'शृधुमृधूँ उन्दे'। अधिकरणे घञर्थे कः। मृधम्। 'स्कन्दिर् गतिशोषणयोः'। ल्युट्। आस्कन्दनम्। ख्यातेः 'घञर्थे कविधानम्' (३. ३. ५८) इति कः। सङ्घचम्। 'समँ ष्टम वैक्लव्ये'। 'अळीकादयश्च' (उ० ४. २५) इति ईकन्, समीकम्। दन्त्यवत्। सम्परापूर्वादिणः 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः। ततः संज्ञायां स्वार्थे कन्। सम्परायकः। साम्परायिकपाठे स्वार्थे 'विनयादिभ्यष्ठक्' (५. ४. ३४)। सह मरेण वर्तते समरः। अनीकं सैन्यं, तद्योगादनीकम्। अर्शआद्यच्। रणतेः पचाद्यच्। रणः। समरात्रिकमस्त्रियाम्। कलं हन्तीति कलहः। विग्रहोऽबन्तः। 'अध्यायन्यायोद्यावसंहाराधारावायाश्च' (३. ३. १२२) ईत्यनेन चकारस्यानुक्तसमुच्चयार्थत्वादधिकरणे घञि सम्प्रहारः। अधिकरणे 'हलश्च' (३. ३. १२१) इति घञ्, अभिसम्पातः। कलेः 'इन्' इति इन्।

---

१. 'न्ते आक्षि' ख. पाठः. २. तृ। घटादयः षित इति।' क. ग. घ. ङ. पाठः. ३. 'धा', ४. 'धयो' ख. ग. पाठः. ५. 'ख्रजयो', ६. 'धू शब्दने अ' ङ. छ. पाठः. ७. 'म वै' ख. ग. पाठः. ८. 'ङिति घञ्। अनेन' ङ. छ. पाठः.

कलिः। स्फुटेर्घञ्। संस्फोटः। युगे युग उक्तः। सम्पूर्वः संयुगः। 'मृद क्षोदे'। घञ्। अभ्यामर्दः। हन्तेर्घञ्। 'हनस्तोऽचिण्णलोः' (७. ३. ३२) इति तकारः। आघातः। 'सङ्ग्राम युद्धे'। चुरादिणिच्। 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) इति घः। सङ्ग्रामः। गमेरप्। अभ्यागमः। आहूयन्तेऽत्रेत्याहवः। 'आङि युद्धे' (३. ३. ७३) इत्यप् सम्प्रसारणं च। समूहे समुदाय उक्तः। 'यमु उपरमे'। क्विप्। 'गमः क्वौ' (६. ४. ४०) इत्यनुवृत्तौ 'गमादीनामिति वक्तव्यम्' (६. ४. ४०) इति क्वौ अनुनासिकलोपः। संयत्।

"रवेण भौमो ध्वजवर्तिवीरवेरवेजि संयत्यतुलास्त्रगौरवे।"

इति दण्डिना पुमान् संयत् प्रयुक्तः। समितिः। 'अज गतिक्षेपणयोः'। 'अज्यतिभ्यां च' (उ० ४. १३२) इति इण्। बाहुलकान्न वीभावः। आजिः।

"वाहनाजनि मानासे साराजावनमा ततः।"

इति माघे (सर्ग० १९. श्लो० ३३) पुमानाजिः। सारश्चासावाजिश्चेति साराजिः। तस्मिन् साराजौ। किंभूते, मानासे मानखण्डके। अन्यथा मानासायामिति स्यात्। समिणोऽधिकरणे सम्पदादिक्विप्। समित्। युध्यतेः क्विप्। युत्॥

नियुद्धं बाहुयुद्धे

क्षीर० — नियुतं युद्धं नियुद्धम्॥

टीका० — मल्लादीनां बाहुयुद्धे नियुद्धम्॥

अथ तुमुलं रणसङ्कुले।

क्षीर० — ताम्यन्त्यत्र तुमुलम्। तुः सौत्रो वा॥

टीका० — आकुले रणे तुमुलम्। 'तुमुलो व्याकुलो रण' इति त्रिकाण्डः॥

क्ष्वेडा तु सिंहनादः स्यात्

---

१. 'ल' ब. पाठः.

क्षीर० — 'क्ष्वेड अव्यक्ते शब्दे' इति दुर्गः । सिंहस्येव नदनं भटानां सिंहनादः ॥

टीका० — योधानां परबलभङ्गार्थं झङ्कारवे क्ष्वेडाद्वयम् । विषे क्ष्वेड उक्तः । सिंहानां गर्जितमिव सिंहनादः ॥

करिणां घटना घटा ॥ १०६ ॥

क्षीर० — 'घटादयः षित' इति 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) ॥

टीका० — करिणां घटना सङ्ग्रामभावोक्तं सज्जनं घटा । 'घट चेष्टायाम्' । घटादीनां षित्त्वात् 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) ॥

क्रन्दनं योधसंरावः

क्षीर० — समन्ताद् रवणं संरावः । 'उपसर्गे रुवः' (३. ३. २२)। घञ् ॥

टीका० — योधानामन्योन्यं मया सह युध्यस्वेत्याद्याह्वाने क्रन्दनद्वयम् । क्रन्देर्ल्युट् ॥

बृंहितं करिगर्जितम् ।

क्षीर० — 'बृहि शब्दे' ॥

टीका० — करिणां गर्जिते बृंहितद्वयम् । 'बृह बृहि वृद्धौ' । क्तः ॥

विष्फारो धनुषः स्वानः

क्षीर० — 'स्फुर चलने' ॥

टीका० — धनुश्शब्दे विस्फारः । 'स्फुर संचलने' । घञ् । लघूपधगुणः । 'स्फुरतिस्फुलत्योर्घञि' (१. १. ४७) इति एचः स्थाने आत्वे विस्फारः । दन्त्यवान् । 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' (८. ३. ७६) इति षत्वविकल्पे विष्फार

इत्यपि । णिचि तु एरचि 'चिस्फुरोर्णौ' (६. १. ५४) इत्यात्वविकल्पे पूर्ववत् षत्वविकल्पे च विस्फोरविष्फोरौ च ॥

पटहाडम्बरौ समौ ॥ १०७ ॥

क्षीर० — पटो हन्यते स्म पटहः । आदम्यते आडम्बरः । डमरुवद् दस्य डत्वम् ॥

टीका० — पटहद्वयं **सङ्गामपटहध्वनौ** । पटह उक्तः । आङ्पूर्वाल्लम्बतेः 'ऋच्छेररन्' (उ० ३. १३१) इति बाहुलकोऽरन् । डलयोरेकत्वस्मरणम् । आडम्बरः ॥

प्रसभं[1] तु बलात्कारो हठः

क्षीर० — प्रगता सभात्र प्रसभम्[2] । सभया युक्तायुक्तविचारो लक्ष्यते । 'प्रस प्रसवे वा' । बलादिति निपातो हठार्थः । 'हठ प्लुतिशठत्वयोः' ॥

टीका० — प्रसभत्रयं **बलात्कारे** । 'क्लीबे तु प्रसभं हठः' इति बोपालितः । 'हठ प्लुतिसङ्कोचयोः' । पचाद्यच् । हठः ॥

अथ स्खलितं छलम् ।

क्षीर० — स्खलनं मार्गाच्चलनम् । छयति भिनत्ति छलम् ॥

टीका० — स्खलितद्वयं **युद्धविषये मर्यादायाः स्खलने** । पूर्वं तु नाट्यप्रकरणे[3] धैर्यादेः स्खलने रिङ्गणमुक्तम् ॥

अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ॥ १०८ ॥

क्षीर० — न जने साध्वजन्यम् । उत्पतत्यकस्मादोयात्युत्पातः[4] । ज्वलादित्वाण्णः । उपसृज्यते उपहियते प्रजाऽत्रोपसर्गः ॥

---

१. 'भस्तु ब', २ 'भः । स' ख. पाठः. ३. 'क्रमे धै' क. ख. ग. घ. पाठः. ४. 'दुद्यात्यु' ख. पाठः.

टीका० — अजन्यत्रयमुत्पाते । 'अजन्योपप्लवोत्पाता' इति[1] तु पुंस्काण्डे वोपालितः ॥

मूर्छा तु कश्मलं मोहोऽपि

क्षीर० — कशति वैचित्यात् कश्मलम् ॥

टीका०—मूर्छात्रयं मोहे । 'मुर्छा मोहसमुच्छ्राययोः' । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । टाप् । 'उपधायां च' (८. २. ७८) इति दीर्घः । मूर्छा । कसेः सौत्रात् 'कम्बलादयश्च' इति निपातनात् कलप्रत्ययो मुगागमश्च । कस्मलम् । तालव्यशमिति केचित् । 'कुष निष्कर्षे' । 'कुटिकुषिभ्यां क्मलच्' (उ० ४. १८८) इति वर्तमाने 'कुषेरचोपधायाः'* इति क्मलच् उपधायाश्च अकारः । कष्मलम् । एवमुणादौ मूर्धन्यवत् । 'मुह वैचित्ये' । घञ् । मोहः ॥

अवमर्दस्तु पीडनम् ।

क्षीर० — 'पीड गहने' ॥

टीका० — परचक्रेण देशस्य पीडने अवमर्दद्वयम् । 'मृद क्षोदे' । घञ् । अवमर्दः । पीडयतेर्ल्युटि पीडनम् ॥

अभ्यवस्कन्दनं त्वभ्यासादनं

क्षीर० — छलादाक्रमणमित्यर्थः । साचि[3] च[4] (?) । रात्रौ सौषुप्तिकम्[5] ॥

टीका० — निश्शक्तीकरणाय यः शत्रुभिः प्रहारो दीयते तत्राभ्यवस्कन्दनद्वयम् । 'स्कन्दिर् गतिशोषणयोः' । ल्युट् । अभ्यवस्कन्दनम् । सदेर्णिचि ल्युट् । आसादनं, दन्त्यसम् ॥

---

१. 'ति पुं' ज. पाठः. २. 'दि' ख. पाठः. ३. 'षी च', ४. 'चात्रौ ग. पाठः. ५. 'कः' ॥ क. घ. पाठः.

---

* इदं सूत्रं मुद्रितोणादौ न दृश्यते ।

विजयो जयः ॥ १०९ ॥

क्षीर० — विः स्वार्थे । लोचनविलोचनवत् ॥

टीका० — विजयद्वयं जयक्रियायाम् । एरच् (३. ३. ५६) ॥

वैरशुद्धिः प्रतीकारो वैरनिर्यातनं च सा ।

क्षीर० — प्रतीपकरणं प्रतीकारः । शुद्धिः निर्यातनं शोधनम् । 'यत निकारोपसंस्कारयोः' । जितकाशी जिताहवः ॥

टीका० — वैरशुद्धित्रयं वैरनिर्यातने । क्तिन्नन्तत्वाद् वैरशुद्धिः । स्त्रियां घञि प्रतीकारः । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति पक्षे दीर्घः ॥

प्रद्रावोद्द्रावसन्द्रावसन्दावा विद्रवो द्रवः ॥ ११० ॥
अपक्रमोऽपयानं च

क्षीर० — एतेऽष्टौ पलायनार्थाः । 'प्रे द्रुस्तुस्रुवः' (३. ३. २७)। 'उदि श्रयतियौतिपूद्रुवः' (३. ३. ४९) इति घञ् । 'समि युद्रुदुवः' (३. ३. २३) इति घञ् । अपद्वारेण क्रमणं पलायनम् अपक्रमः ॥

टीका० — प्रद्रावाष्टकं पलायनमात्रे । 'प्रे द्रुस्तुस्रुवः' (३. ३. २७) इति घञ् । प्रद्रावः । 'उदि श्रयतियौतिपूद्रुवः' (३. ३. ४९) इति घञि उद्द्रावः । सन्द्रावसन्दावयोः 'समि युद्रुदुवः' (३. ३. २३) इति घञ् । ऋदोरपि[2] विद्रवद्रवौ । यातेर्ल्युट् । अपयानम् ॥

रणे भङ्गः पराजयः ।

क्षीर० — भङ्गोऽपसरणम् । अन्यत्रोपचारात् ॥

---

१. 'पातोप' ग. घ. पाठः. २. 'पृ । वि' म. पाठः.

टीका० — युद्धभङ्गे पराजयः ॥

पराजितपराभूतौ त्रिषु

क्षीर० — परिभूतोऽभिभूतोऽपि ॥

टीका० — युद्धे जिते पराजितद्वयम् । क्तान्तम् ॥

नष्टतिरोहितौ ॥ १११ ॥

क्षीर० — त्रिष्वित्येव । नश्यति स्म नष्टम् । अदृश्यम् । तिरोधीयते स्म तिरोहितम् । गृहीतादिक्[1] च ॥

टीका० —नष्टद्वयमदृष्टे वस्तुनि । लुक्[2]इत इति यावत् । त्रिष्वित्युभयत्र सम्बध्यते । नश्यतेः क्तः । नष्टः । तिरःपूर्वाद् धाञः क्तः । 'दधातेर्हिः' (७. ४. ४२) इति[3] धातोर्हिरादेशः । अथवा 'हि गतौ' । क्तः । तिरस् अदर्शनं हितो गतः तिरोहितः ॥

प्रमापणं निबर्हणं निकारणं निशारणम् ।
प्रवासनं परासनं निषूदनं निर्हिंसनम् ॥ ११२ ॥

निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ॥ ११३ ॥

निर्वापणं विशसनं मारणं प्रतिघातनम् ।
उदासनं[4] प्रमथनक्रथनोज्जासनानि च ॥ ११४ ॥

आलम्भपिञ्जविशरघातोन्माथवधा अपि ।

क्षीर० — अत्राहिंसार्था अप्युपसर्गवशाद्धिंसार्था ज्ञेयाः । अकर्मकाश्च णिचा सकर्मकाः । प्रमापणम् । 'मीङ् हिंसायाम्' । णिचि 'मीनातिमिनोति—' (६. १. ५०) इत्यात्वम् । निपूर्वाद् बृहेर्बर्हेर्वा निबर्हणम् ।

---

१. 'क् ॥ प्र', २. 'का इति', ३. 'ति हिरा', ४. 'न' ख. पाठः.

निकारणम् । 'कृञ् हिंसायाम्' । निशारणम् । 'शृ हिंसायाम्' । प्रवसतः प्रयुक्तिः प्रवासनम् । एवं निर्वासनम् । 'असु क्षेपणे' । अस्मात् परासनमपासनं च । 'षूद क्षरणे' । अस्मान्निषूदनं जीवाच्चालनम् । नितरां हिंसनं निहिंसनम् । संज्ञपनम् । ज्ञपेः 'मारणतोषण—' इति मित्त्वाङ्स्त्रः । निर्ग्रन्थनम् । 'ग्रथि कौटिल्ये' । निस्तर्हणम् । तृहेर्हिंसार्थान्निष्पूर्वात् स्तृहेर्वा निपूर्वात् । क्षणनम् । 'क्षण हिंसायाम्' । निर्वापणम् । 'पै ओवै शोषणे' । विशसनम् । 'शसु हिंसायाम्' । क्रथनम् । 'क्रथ हिंसायाम्' । उज्जासनम् । 'जसु हिंसायाम्' । आकुलं लम्भनमालम्भः । लभिराङ्पूर्वो हिंसार्थः । 'उपसर्गात् खल्घञोः' (७. १. ६७) इति नुम्[1] । 'पिजि हिंसायाम्' । पिञ्जः । विशरणं हिंसनं विशरः । हननं वधः । 'हनश्च वधः' (३. ३. ७६) इत्यप्[2] वधादेशश्च । पक्षे घञि घातः । 'मथ संक्लेशने' । व्यापादनं निशसनं कदनं निसुम्भनं[3] च ॥

टीका० — प्रमापणादयस्त्रिंशद् मारणे । प्रमाणीनामेयमनुष्टुप् । 'हन्त्यर्थाश्च' इति चुरादिणिच् । 'मीनातिमिनोतिदीङां ल्यपि च' (६. १. ९०) इत्यात्वम् । 'अर्तिह्री —' (७. ३. ३६) इत्यादिना पुक् । 'णेर्विभाषा' (८. ४. ३०) इति णत्वविकल्पः । प्रमापणम् । आलम्भादिपड्वहिः सर्वत्र ल्युट् । निबर्हणमुक्तम् । 'कृञ् हिंसायाम्' । प्रमापणवर्णिचि निकारणविशारणे । 'वस स्नेहच्छेदापहरणेषु' । चुरादिणिचि प्रवासनपरासननिर्वासनोद्वासनानि । 'षूद क्षरणे हिंसायां च' । 'सात्पदाद्योः' (८. ३. १११) इति षत्वप्रतिषेधः । निसूदनम् । 'बृह बृहि हिंसि हिंसायाम्' । निर्हिंसनम् । 'मारणतोषणनिशामनेषु ज्ञा' इति मित्त्वम् । संज्ञपनम् । 'ग्रन्थ हिंसायाम्' । निर्ग्रन्थनम् । 'तृह हिंसायाम्' । निस्तर्हणम् । हन्तेर्निहननम् । 'क्षणु हिंसायाम्' । क्षणनम् । 'वृजी वर्जने' । परिवर्जनम् । डुवपो णिचि निर्वापणम् । 'शसु हिंसा-

---

१. 'म्' । पिञ्जः । पिजिर्हिंसार्थः । वि' ख. पाठः. २. 'पि' ग. पाठः. ३. 'शु' क. पाठः.

याम्' । विशसनम् । मृङो णिचि मारणम् । हन्तेः पूर्ववण्णिचि प्रतिघातनम् । 'मथे विलोडने' । प्रमथनम् । 'श्रथ क्रथ हिंसायाम्' । पूर्ववण्णिचि घटादिमित्त्वे च क्रथनम् । 'जसु हिंसायाम्' । तद्वण्णिचि उज्जासनम् । आङ्पूर्वो लभिर्मारणे[1] । घञ् । 'उपसर्गात् खल्घञोः' (७. १. ६७) इति नित्यत्वाद् वृद्धि बाधित्वा नुम् । आलम्भः । 'पिजि हिंसायाम्' । चुरादिः । एरचि पिञ्जः । शृणातेः ऋदोरपि विशरः । आघातवद् घातः । 'मथे विलोडने' । घञ् । उन्माथः । 'हनश्च वधः' (३. ३. ७६) इति हन्तेः पक्षे अप् वधादेशश्च । वधः ॥

स्यात् पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः ॥ ११५ ॥

अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ।

क्षीर० — देहस्तावत्[2] पञ्चभूतारब्धः । मरणं[3] त्वेतस्य पञ्चभावः, प्रत्येकं स्वांशसङ्क्रमात् । कालो मृत्युदूतः, क्षणत्रुट्यात्मको वा । यदाहुः — 'कालः संहरति प्रजाः' । तस्य धर्मः कालधर्मः संहारः । दिष्टस्य कालस्य जीवितावधेरन्तो दिष्टान्तः । अत्ययोऽन्तः । मरणं मृत्युः । द्वयोः स्त्रीपुंसयोः । निवृत्तं धनमत्र निधनम् । निपूर्वो धनिर्मरणार्थ इति सभ्याः[4] ॥

टीका० — पञ्चतादशकं मरणे । पञ्चानां भूतानां पृथक्ता पञ्चता[5] । कालस्य यमस्य धर्मः, तत्प्रयुक्तत्वात् कालधर्मः । दिष्टस्य कालस्यान्तो दिष्टान्तः । प्रलय उक्तः । एतेः 'एरच्' (३. ३. ५६) । अत्ययः । 'अति अदि बन्धने' । अच् । अन्तः । अमेर्वा तन् । नश्यतेर्घञ् । नाशः । 'भुजिमृङ्भ्यां युक्त्युकौ' (उ० ३. २१) इति त्युक् । मृत्युः द्वयोः । म्रियतेर्युटि मरणम् । निपूर्वाद् दधातेः 'कृपूवृजिमन्दिनिधाङ्भ्यः क्युः' (उ० २. ८३) । निधनम्[6] ॥

---

१. 'णे । उ' ङ. छ. पाठः. २. 'न्मह्याभू', ३. णत्वेनास्य पञ्चता । प्र', ४. 'युगाद्यात्म' क. पाठः. ५. 'भ्याः' ङ. पाठः. ६. 'ञ्चभू' ङ. ख. पाठः. ७. 'नोऽस्त्रियाम्' क. ख. ञ. पाठः.

* परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः ॥ ११६ ॥

मृतप्रमीतौ त्रिष्वेते

क्षीर० — परागता असवोऽस्य परासुः । संतिष्ठते स्म संस्थितः । सम्पूर्वस्तिष्ठतिर्मरणे वर्तते । सप्तैते वाच्यलिङ्गाः ॥

टीका० — परासुसप्तकं मृते । परागता असवोऽस्येति परासुः । प्राप्तं पञ्चत्वं पृथगात्मता येन स प्राप्तपञ्चत्वः । पराप्रपूर्वादिणः क्तः । परेतप्रेतौ । सम्पूर्वस्तिष्ठतिर्मरणे । क्तः । संस्थितः । मृङः क्तः । मृतः । 'मीङ् हिंसायाम्' । प्रमीतः । परास्वादयस्त्रिषु ॥

चिता चित्या चितिः स्त्रियः ।

क्षीर० — चीयते स्म चिता । चेतव्या चित्या । 'चित्याग्निचित्ये च' (३. १. १३२) इति साधुः । चीयते चितिः । एते प्रेतदाहार्थेऽग्न्याधारे वर्तन्ते ॥

टीका० — चितात्रयं चितायाम् । चिञो बहुलवचनाद् 'अञ्जिवृसिभ्यः क्तः' (उ०३. ८९) । टाप् । चिता । 'निष्ठा' (३. २. १०२) इति वा क्तः । 'चित्याग्निचित्ये च' (३. १. १३२) इत्यनेन निपातिता चित्या । अधिकरणे क्तिनि चितिः ॥

कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेबरम् ॥ ११७ ॥

क्षीर० — कस्य शिरसो बन्धोऽत्र कबन्धः । केन बन्धो वा । क्रियायुक्तं नृत्यत् । अपगतो मूर्धास्य अपमूर्धं यत् कलेबरम् । कुण्डोऽपि ॥

टीका० — शिरःशून्यं सक्रियं शरीरं कबन्धः । कं शिरः बध्यतेऽस्मिन्निति[२] कबन्धः । अधिकरणे घञ् ॥

श्मशानं स्यात् पितृवनं

क्षीर० — शवानां शयनं श्मशानम् । पृषोदरादित्वाच्[३] शवशब्दस्य श्मादेशः शयनस्य शानं च । प्रेतवनं करवीरं च ॥

---

१. 'जि' क. ख. पाठः. २. 'ति अ' पाठः. ३. 'दिः । प्रे' ग. पाठः.

---

* इतः प्राक् 'प्रलयोऽस्त्री दीर्घनिद्रा हिंसा संस्था प्रमीलनम्' इत्यर्धमधिकं क्षीरस्वामीयकोशेषु दृश्यते ।

टीका० — श्मशानद्वयं श्मशाने । शवस्य शयनं श्मशानम् । पृषोदरादिः । तालव्यं च । 'वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः' (८. ४. ४) इति नियमितत्वादत्र न णत्वं, पितृवनम् ॥

कुणपः शवमस्त्रियाम् ।

क्षीर० — कुणं शब्दं पाति कुणपः । धनञ्जयाख्यस्य वायोः शवेऽसम्भवात् । शवति यात्यस्माज्जीवः शवः ॥

टीका० — कुणपद्वयं शवे । क्वणेः शब्दार्थाद् दण्डकात् 'क्वणेः सम्प्रसारणं च' (उ० ३. १४३) इति कर्पन्, वकारस्य सम्प्रसारणमुकारः । कुणपः । 'शव गतौ' । तालव्यादिः । पचाद्यच् । शवः ॥

प्रग्रहोपग्रहौ वन्द्यां

क्षीर० — प्रगृह्यते बध्यते प्रग्रहः । वन्द्यते याच्यते वन्दी हठहृता स्त्री । बलवतो हस्ते क्षिप्तो राजपुत्रादिश्च । यदाहुः — 'वन्दी स्यात् पणबन्धस्थः' ॥

टीका० — प्रग्रहद्वयं वन्द्याम् । 'ग्रहवृदृनिश्चिगमश्च' (३. ३. ९८) इत्यपि प्रग्रहोपग्रहौ । वन्देः 'इन्' (उ० ४. ११९) इति इन् । ङीषि वन्दी ॥

कारा स्याद् बन्धनालये ॥ ११८ ॥

क्षीर० — कीर्यते क्षिप्यतेऽस्यां कारा । भिदादिः । गुसिश्च ॥

टीका० — काराद्वयं काहरेति ख्याते । भिदादिगणसूत्रेण 'कारा बन्धने' इत्यनेन करोतेरङुपधादीर्घत्वाभ्यां कारा निपातिता ॥

पुंसि भूम्न्यसवः प्राणाश्चैवं

क्षीर० — अस्यन्तेऽसवः । स्वभावाद् बहुत्वे पुंल्लिङ्गाः । प्राणित्यमीभिः प्राणाः । एवंशब्दात् पुंसि भूम्नि च । 'प्राणो नाम वायुरि'त्येकत्वमजीवार्थत्वात् ॥

---

१. 'पृ' । क. ख. ग. पाठः. २. 'वार्यते' ग. पाठः.

टीका० — असुद्वयं **प्राणेषु** । 'असु क्षेपणे' । स्वरुवद् उः । असुशब्दो दन्त्यवान् । प्राणा अपि पुंसि बहुत्वे चेति एवंशब्दार्थः । कथं तर्हि 'प्राणो नाम महान् वायुर्यदोर्ध्वमतिक्रामती'ति न्यासः । स एकत्वविवक्षायां साधुः । पञ्चानां वायूनां च यदा प्राणशब्देनाभिधानं, तदा बहुत्वमेव । अत एव एकत्वविवक्षायां —

"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः"

इति प्रयोगः ॥

जीवोऽसुधारणम् ।

क्षीर० — **जीवः**[1] **प्राणधारणम् । जीवापि ॥**

टीका० — **प्राणधारणक्रियायां** जीवद्वयम् । जवितेः 'हलश्च' (३. ३. १२१) इति घञ् । जीवः ॥

आयुर्जीवितकालो ना

क्षीर० — **आयात्यायुः**[2] । जीवनावधिः । उसन्तः क्लीबे । छन्दस्युदन्तोऽपि ॥

टीका० — आयुर्द्वयमायुषि । 'एतेर्णिच्च' (उ० २. ११८) इति उसिः । णित्त्वाद् वृद्धिः आयुः । जीवितकालो ना ॥

जीवातुर्जीवनौषधम् ॥ ११९ ॥

क्षीर० — **जीवत्यनेन जीवातुः । जीवनौ**[3]**यौषधं जीवरक्षोपायः । यथा** —

"जीवातवे विसृज शूद्रमुनौ कृपाणम्" ।

जीवितमौषधं चेत्युपाध्यायः ॥

इति क्षत्रियवर्गः ॥

---

१. 'वनं जी' ख. पाठः. २. 'य', ३. 'नौष' क. पाठः.

टीका० — म्रियमाणसञ्जीवनौषधौ जीवातुद्वयम्। 'जीवेरातुः' (उ० १. ८२) इत्यातुः। 'जीवातुः पुन्नपुंसकमि'ति रभसः॥

इति वन्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे क्षत्रियवर्गः।

अथ वैश्यवर्गः।

ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः।

क्षीर० — ऊर्वोर्[1]भवा ऊरव्याः। 'शरीरावयवाद् यत्' (५. १. ६)। यच्छ्रुतिः — 'ऊरू तदस्य यद्वैश्यः'। अरणीयोऽर्यः। 'अर्यः स्वामिवैश्ययोः' (३. १. १०३) इति साधुः। विशोऽपत्यं जातिर्वैश्यः। 'गर्गादिभ्यो यञ्' (४. १. १०५)। भूमिं स्पृशति कृष्यादिना भूमिस्पृक्। विशतीति विट्॥

टीका० — ऊरव्यषट्कं वैश्ये। ब्रह्मण ऊर्वोर्भवा ऊरव्याः। 'शरीरावयवाद् यत्[2]' (५. १. ६) इति यत्। 'ओर्गुणः' (६. ४. १४६)। 'वान्तो यि प्रत्यये' (६. १. ७९) इत्यवादेशः। ऊर्वोर्जाता ऊरुजाः। 'ऋ गतौ'। 'अर्यः स्वामिवैश्ययोः' (३. १. १०३) इति यत्। अर्यः। विश एव वैश्याः। स्वार्थे ष्यञ्। क्षेत्रसंस्काराय नित्यं भूमिं स्पृशन्तीति भूमिस्पृशः। विशेः क्विप्। विट् शान्तः॥

आजीवो जीविका वार्ता वृत्तिर्वर्तनवेतने॥ १॥

क्षीर० — आजीवत्यनेनेति करणे भावे वा साधुः[3]। जीवनं जीविका। 'रोगाख्यायां —' (३. ३. १०८) इत्यत्र धातुमात्राद् भावे ण्वुल् वक्तव्यः। कृष्यादिस्तूपचारात्। वर्तनं वृत्तिरस्त्यस्यां वार्ता। 'प्रज्ञाश्रद्धार्चा —' (५. २. १०१) इति णः। वर्तन्तेऽनया वृत्तिः। वेति[4] खादत्यनेन वेतनम्॥

टीका० — आजीवषट्कं जीविकायाम्। 'अकर्तरि च —' (३. ३.

---

१. 'रो' ख. पाठः. २. 'त्।' म. पाठः. ३. 'जीवने' क. ग. घ. पाठः. ४. 'च्यः', ५. 'ति न खा' ख पाठः.

१९) इति घञि आजीवः। जीवयतीति जीविका। ण्वुल्[1]। वृत्तिः प्राणधारणा, तद्योगात् 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५. २. १०१)। वार्ता। क्तिनि वृत्तिः। करणे ल्युट्। वर्तनजीवने॥

स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः।

क्षीर०—कर्षणात्[2] कृषिः। 'इक् कृष्यादिभ्यः' (वा० ३. ३. १०८)। पशुपालस्य कर्म पाशुपाल्यम्। वणिजः कर्म वाणिज्यम्। ब्राह्मणादित्वात् ष्यञ्। 'दूतवणिग्भ्यां च' (५. १. १२६) इति वक्तव्याद् वणिज्यापि वा॥

टीका०—कृष्यादयस्त्रयः प्रत्येकं वैश्यानां वृत्तयः। 'इक् कृष्यादिभ्यः' (वा० ३. ३. १०८) इति इक्। कृषिः। पशून् गोमहिष्यादीन् पालयतीति पशुपालः। 'कर्मण्यण्' (३. २. १)। ततः कर्मणि ष्यञ्। वणिज्येत्यपीत्यन्यः॥

क्षीर०—

"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा।
सत्यानृताभ्यामथवा न श्ववृत्त्या कथञ्चन॥"
(मनु० अ० ४. श्लो० ४)

इति ये षड् वृत्तिभेदाः, तानाह—

सेवा श्ववृत्तिः

शुन इव वृत्तिः। परपिण्डोपजीवित्वादवमेत्यर्थः॥

टीका०—सेवाद्वयं शूद्रवृत्तौ। षेवृ सेवार्थो दण्डकः। 'गुरोश्च हलः' (३. ३. १०३) इत्यः। सेवा। सा च दैन्यादिना अतिनिकृष्टतया शुन इव वृत्तिः श्ववृत्तिरुच्यते। केवलं कृष्यादिरेव वृत्तिः। सेवा (श्व? च) वृत्तिरिति पाठे श्ववृत्तिशब्दस्यासङ्ग्रहः स्यात्। स चेष्यते। तथाच नाममाला—'कर्षणयाचितसेवानृतमृतश्ववृत्त्याख्याः'॥

अनृतं कृषिः

क्षीर०—न ऋतमनृतं पापिष्ठत्वात्। प्रमृतमिति तु सभ्यः पाठः॥

---

१. 'ल्। वृद्धिः। वृ' घ. ङ. पाठः. २. 'णं कृ' ख. पाठः.

टीका० — अनृतद्वयं कृष्याम् । सत्यमृतं, नञा अनृतम् ॥

उञ्छसिलं त्वृतम् ॥ २ ॥

क्षीर० — **उञ्छो धान्यकणोच्चयः । सिलं धान्यमञ्जर्यार्जनम् । समस्तं व्यस्तं विपर्यस्तं चैतत् । ऋतधर्मत्वात् सत्यम् ॥**

टीका० — उञ्छत्रयं सिञ्चोह[1] इति ख्याते । 'उछि उञ्छे' । घञ् । उञ्छः । 'शिल सिल उञ्छे' । इगुपधलक्षणः कः । शिलम् ।

"लूनकेदारशेषं तु शिलं सिलमिति स्मृतम् ।
उञ्छभक्षं च यच्चान्यन्निष्परिग्रहमाहृतम् ॥"

इति नियमाख्यमभिधानम् ।

"प्रतिग्रहाच्छिलं श्रेयस्ततोऽप्युञ्छः प्रशस्यते"

इति । उञ्छशिलमिति समाहारद्वन्द्वः । तत्र शाल्यादिनिपतितपरित्यक्तमञ्जरीणामादानं शिलम् । एकैकशः कपोतवत् कणानां ग्रहणमुञ्छः । अन्ये तु अल्पभेदादेकत्वं मन्यन्ते । तथाच प्रयोगः—

"शक्या न चेदुञ्छसिलेन वृत्तिः फलेन मूलेन च वारिणा च"

इति । सत्ये ऋतमुक्तम् ॥

द्वे याचितायाचितयोर्यथासङ्ख्यं मृतामृते ।

क्षीर० — **मृतं निर्जीवमिव । अमृतम् अविनश्वरम् ॥**

टीका० —यथाक्रमं याचिते मृतम्, अयाचितेऽमृतम् । द्वयं साधितम् । याचितं याचितलक्षणवृत्तिः । मरणसमदुःखतया मृतमित्युच्यते ॥

सत्यानृतं वणिग्भावः

क्षीर० —**किञ्चित् सत्यं किंचिच्चासत्यम् । अत्र मनुः—**

"ऋतमुञ्छसिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेनापि खलु जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत् ॥"
(अ० ४. श्लो० ५. ६)

---

१. 'ञ्छोत्र इ' ग. पाठः.

टीका० — सत्यानृतद्वयं **वाणिज्ये**। सत्यसहितमनृतं सत्यानृतम्।

"वाणिज्यं[1] सत्यानृतमाख्याता योषिद् वणिज्या"

इति वोपालितः॥

स्यादृणं पर्युदञ्चनम्॥ ३॥

उद्धारः

क्षीर० — **अर्यते स्म ऋणम्**। 'ऋणमाधमर्ण्ये' (८. २. ६०) **इति साधुः। परित[2] उदञ्चनम् उत्तमर्णादुद्धारत्वेन ग्रहणम्॥**

टीका० — ऋणादित्रयमृणे। 'ऋणमाधमर्ण्ये' (८. २. ६०) इति निष्ठातो नः। अञ्चतेः कर्मणि ल्युट्। पर्युदञ्चनम्। उद्ध्रियते गृह्यत इत्युद्धारः॥

अर्थप्रयोगस्तु कुसीदं वृद्धिजीविका।

क्षीर० — **अर्थस्य[3] प्रयोगः कलान्तरेणादानम्**। **कुत्सितं सीदन्त्यत्र कुसीदम्॥**

टीका० — अर्थप्रयोगत्रयं **वृद्धिजीविकायाम्**। 'कुस श्लेषणे'। 'कुसेरूलोम्भोमे(दे)तौः कित्' (उ० ४. १०८) इति ईदः। कुसीदं दन्त्यसमिति काचिदुणादिवृत्तिः। वृद्ध्या जीविका वृद्धिजीविका॥

याच्ञयासं याचितकं निमयादापमित्यकम्॥ ४॥

क्षीर० — **'अपमित्ययाचिताभ्यां कक्कनौ'** (४. ४. २१)। **मुनिस्तु—**

"निमयः परिवर्तः स्यादुद्धारोऽप्यापमित्यकम्"॥

टीका० — याच्ञाप्राप्ते वस्तुनि **जाइवार्थो[4]** इति ख्याते याचितकम्। 'अपमित्ययाचिताभ्यां कक्कनौ' (४. ४. २१) इति कन्। **निमयात् परिवर्तनाद्वाप्ते वस्तुनि** आपमित्यकम्। 'मेङ् प्रणिदाने'। अपपूर्वाद् 'उदीचां माङो व्यतीं-

---

१. 'ज्य वाणिज्यं स' अ. पाठः. २. 'र्युद', ३. 'र्थप्र', ४. 'ण दानात्। कु' क.पाठः, ५. 'दाः' अ. पाठः ६. 'त्ता' ङ. पाठः, ७. 'ति' ख. पाठः,

हारे' (३. ४. १९) इति क्त्वाप्रत्ययः । क्त्वो ल्यप् । 'मयतेरिदन्यतरस्याम्' (६ ४. ७०) इति इत्त्वम् । 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१) इति तुक् । 'अपमित्ययाचिताभ्यां कक्कनौ' (४. ४. २१) इति कक् । 'किति च' (७. २. ११८) इत्यादिवृद्धिः ॥

उत्तमर्णाधमर्णौ द्वौ प्रयोक्तृग्राहकौ क्रमात् ।

क्षीर० — उत्तम ऋणेन उत्तमर्णः प्रयोक्ता । अधम ऋणेन अधमर्णः ग्राहकः । 'सुप्सुपे'ति समासः ॥

टीका० — ऋणदातर्युत्तमर्णः । उपचयहेतुतया उत्तममृणमस्येति समासः । ऋणग्रहीतरि अधमर्णः । अपचयहेतुतया अधममृणमस्येति समासः ॥

कुसीदिको वार्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥

क्षीर० — कुसीदं गृह्णातीति कुसीदिकः । 'कुसीददशैकादशात् ष्ठन्ष्ठचौ' (४. ४. ३१) । वृद्धिं गर्ह्यां प्रयच्छति वार्धुषिकः । 'प्रयच्छति गर्ह्यम्' (४. ४. ३०) इति ठक् वृद्धेर्वृधुषिभावश्च । लक्ष्यादिदन्तोऽपि । यन्मनुः —

"श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः" ।

(अ० ४. श्लो० २२४)

वृद्धिमाजीवति वृद्ध्याजीवः । द्वैगुणिकश्च । वृद्धिर्लाभः कलान्तरम् ॥

टीका० — वृद्ध्याजीविके कुसीदिकचतुष्कम् । 'कुसीददशकादशाट्टन्ठचौ' (४. ४. ३१) इति ठन् । कुसीदिकः । 'वृद्धेर्वृधुषिभावश्च वक्तव्यः' (वा० ४. ४. ३०) इति ठक् । वार्धुषिकः । वार्धुषिरिति नैरुक्तोऽत्र ककारलोपइति टाकाकृतः ॥

क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः।

क्षीर०—कर्षति कृषिकः। औणादिक इकः। कृषक इत्येके। कर्षति क्ष्मां कर्षकः। शिल्पिनि कार्षिकोऽपि। कृषिरस्त्यस्य कृषीवलः। 'रजःकृष्यासुतिपर्षदो वलच्' (५. २. ११२)। 'वले' (६. ३. ११८) इति दीर्घः॥

टीका०—क्षेत्राजीवचतुष्कं कृषके। ण्वुलि कर्षकः। 'कृषेर्वृद्धिश्चो-दीचाम्' (उ० २. ४०) इति कुन् वृद्धिश्च। कार्षकः। अवृद्धिपक्षे कृषकः। 'रजःकृष्यासुतिपर्षदो वलच्' (५. २. ११२)। 'वले' (६. ३. ११८) इति दीर्घत्वम्। कृषीवलः॥

क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम्॥६॥

क्षीर०—व्रीहीणां भवनं क्षेत्रं व्रैहेयम्। 'व्रीहिशाल्योर्ढक्' (५. २. २)॥

टीका०—व्रीहयो यवाद्याः, तत्क्षेत्रे व्रैहेयम्। 'व्रीहिशाल्योर्ढक्' (५. २. २)। शालिभवने क्षेत्रे शालेयम्। व्रैहेयवद् ढक्॥

यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि तत्।

क्षीर०—यवानां भवनं क्षेत्रं यव्यम्। 'यवयवकषष्टिकाद्यत्' (५. २. ३)। यवकोऽल्पेयवः। 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५. १. ९०)। उपाध्यायो यवादिभवने हितमिति पाठं परिकल्प्यायस्तवान् चोद्यं करिष्यामीति, अशुद्धं पठामीति॥

टीका०—यवादिभवने क्षेत्रे यव्यादिकम्। 'यवयवकषष्टिकाद्यर्त्' (५. २. ३)॥

तिल्यतैलीनवन्माषोमाणुभङ्गाद् द्विरूपता॥७॥

क्षीर०—तिलानां भवनं क्षेत्रं तिल्यं तैलीनम्। 'विभाषा तिलमाषोमाभङ्गाणुभ्यः' (५. २. ४) इति यत्खञौ। एवं माषादीनां द्विरूपता।

---

१. 'कः। कार्षको' ङ. पाठः. २. 'पि' ख. ङ. पाठः. ३. 'त्यशुभं चोद्यं करिष्यामीत्यशुद्धं ठमिति॥' ग. घ, 'त्यशुद्धं पाठमिति' ख. ङ. पाठः. ४. 'दिति यत्' ग. पाठः.

माष्यं माषीणम् । उम्यमौमीनम् । उमा अतसी । अणव्यमाणवीनम् । भङ्ग्यं भाङ्गीनम् ॥

टीका० — तिलादिभवने क्षेत्रे तिल्यं तैलीनं च । यथा तिलक्षेत्रे तिल्यं तैलीनं च, तद्वन्माष्यं माषीणं च । उम्यमौमीनम् । अणव्यम् आणवीनम् । भङ्ग्यं भाङ्गीनम् । 'विभाषा तिलमाषोमाभङ्गाणुभ्यः' (५. २. ४) इति यत् । पक्षे खञ् ॥

मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्षमम् ।

क्षीर० — मुद्गानां कोद्रवाणां च भवनं क्षेत्रम् । 'धान्यानां भवने क्षेत्रे खञ्' (५. २. १) । आदिशब्दान्मासूरीणादि । शेषाणि व्रीह्यादिभ्योऽन्यानि । शाकक्षेत्रे द्वयं शाकशाकटं शाकशाकिनं, 'भवने क्षेत्रे शाकटशाकिनौ वक्तव्यौ'[1] (वा० ५. २. २९) इति वक्तव्यात् ॥

टीका० — व्रीह्यादिभङ्गान्तं यदुक्तं, तच्छेषम् । मुद्गकोद्रवादिधान्यभवने क्षेत्रे मौद्गीनकौद्रवीणादि । 'धान्यानां भवने क्षेत्रे खञ्' (५. २. १) इति खञ् । आदिना कौळत्थीनादयः[2] ॥

बीजाकृतं तृणकृष्टं

क्षीर० — अबीजं सबीजं सम्पन्नं बीजाकृतम् । 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (५. ४. ५८) इति डाच् । आदावुप्तं पश्चात् कृष्टं क्षेत्रमुप्तकृष्टम् । 'पूर्वकाल —'(२. १. ४९) इति समासः ॥

टीका० — पूर्वमुप्तं पश्चात् कृष्टं यत् क्षेत्रं, तत्र बीजाकृतद्वयम् । 'कृञो द्वितीयतृतीयशम्बबीजात् कृषौ' (५. ४. ५८) इति डाच् । बीजाकृतम् ॥

सीत्यं कृष्टं च हल्यवत् ॥ ८ ॥

क्षीर० — सीतया हललेखया समितं सङ्गतं सीत्यम् । 'नौवयोधर्म —' (४. ४. ९१) इति सीतया समिते यत् । हलेन कृष्टं हल्यम् । 'मतजनहलात् करणजल्पकर्षेषु' (४. ४. ९७) इति यत् ॥

टीका० — सीत्यत्रयं कृष्टभूमौ । 'नौवयोधर्मविषमूलमूलसीता—' (४. ४. ९१) इत्यादिना यत् । सीत्यम् । कृषेः क्तः । कृष्टम् । 'मतजनहलात् करणजल्पकर्षेषु' (४. ४. ९७) इति यत् । हल्यम् ॥

---

१. 'व्यात् ॥' ख. पाठः. २. 'स्थी' ज. पाठः.

त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि तस्मिन्।

क्षीर०—त्रिगुणं कृष्टं क्षेत्रं त्रिगुणाकृतम्। 'सङ्ख्यायाश्च गुणान्तायाः' (५. ४. ५९) इति डाच्। त्रिहल्यं त्रिसीत्यमपि प्राग्वत्। 'नौवयोधर्म—' (४. ४. ९१) इत्यादिना 'मतजन—' (४. ४. ९७) इत्यादिना च यत्। रथसीताहलेभ्यो यद्विधौ तदन्तविधिः॥

टीका०—वारत्रयं कृष्टे त्रिगुणाकृतचतुष्कम्। आर्येयम्। 'सङ्ख्यायाश्च गुणान्तायाः' (५. ४. ५९) इति डाच्। त्रिगुणाकृतम्। बीजाकृतवत् तृतीयाकृतम्। 'रथसीताहलेभ्यो यद्विधौ तदन्तविधिरिष्यत' इति वचनाद् हल्यवत् त्रिहल्यत्रिसीत्ये॥

द्विगुणाकृते तु सर्वं पूर्वं शम्बाकृतमपीह॥ ९॥

क्षीर०—सर्वं पूर्वं डाच् यच्च। द्वितीयाकृतं द्विहल्यं द्विसीत्यम् शम्बाकृतं हि संम्याक् कृष्ट्वा तिर्यक् कृष्टमाहुः॥

टीका०—द्विगुणाकृते वारद्वयं कृष्टे सर्वं समानम्। तद्यथा—द्विगुणाकृतं द्वितीयाकृतं द्विहल्यं द्विसीत्यम्। अतिरिक्तं च सम्बाकृतमपीह। सम्बारिमिति यत्र प्रसिद्धिः। एवमत्र पञ्च नामानि। सम्बाकृतं दन्त्यादि॥

द्रोणाढकादिवापादौ द्रौणिकाढकिकादयः।

क्षीर०—द्रोणस्य वापः क्षेत्रं द्रौणिकम्। उप्यते अस्मिन्निति वापः। 'तस्य वापः' (५. १. ४५) इति ठक्। आदिशब्दात् प्रस्थादिभ्यः 'सम्भवत्यवहरति पचति' (५. १. ५२) इति प्रास्थिकादयः॥

टीका०—उप्यतेऽस्मिन्निति वापः क्षेत्रम्। यथाक्रमं द्रोणस्य वापे क्षेत्रे द्रौणिकः, आढकस्य वापे आढकिकः। 'तस्य वापः' (५. १. ४५) इति ठक्। आदिना प्रास्थिकादि॥

खारीवापस्तु खारीकः

---

१. 'शम्बरीकृष्टं ति' ख., 'शम्याकृष्टं ति' क. पाठः.

क्षीर० — 'खार्या ईकन्' (५. १. ३३) ॥

टीका० — खारीवापे क्षेत्रे खारीको दीर्घमध्यः । 'खार्या ईकन्' (५. १. ३३) इति ईकन् ॥

उत्तमर्णादयस्त्रिषु ॥ १० ॥

क्षीर० — वाच्यलिङ्गत्वात् ॥

टीका० — उत्तमर्णादयः खारीकान्तास्त्रिषु ॥

पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रम्

क्षीर० — उप्यतेऽस्मिन् वप्रम् । के जले दार्यते केदारः । क्षीयते धान्यैरुष्यतेऽत्र, हलैर्हिंस्यते वा क्षेत्रम् । 'क्षि निवासे', 'क्षीप् हिंसायां' वा ॥

टीका० — वप्रत्रयं क्षेत्रे । वप्र उक्तः । के जले दरणमस्येति केदारः । क्षेः ष्ट्रन् । क्षेत्रम् ॥

अस्य तु ।

कैदारकं स्यात् कैदार्यं क्षैत्रं कैदारिकं गणे ॥ ११ ॥

क्षीर० — अस्य क्षेत्रस्य समूहार्थे एते स्युः । 'केदाराद्यञ्च' (४. २. ४०) इति यञ् वुञ् च । 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञ् । क्षेत्राद् 'अचित्तहस्ति —' (४. २. ४७) इति ठकि प्राप्ते भिक्षादित्वादण् ॥

टीका० — क्षेत्रस्य समूहे कैदारकचतुष्कम् । 'केदाराद्यञ्च' (४. २. ४०) इति यञ् । चकाराद् वुञ् । कैदारककैदार्ये । 'भिक्षादिभ्योऽण्' (४. २. ३८) । क्षैत्रम् । केदारानुवृत्तौ 'ठञ् कवचिनश्च' (४. २. ४१) इति ठञि कैदारिकम् ॥

लोष्टानि लोष्टवः पुंसि

क्षीर० — लुष्यते लुषति वा लोष्टम्। लोष्टुश्च मृत्खण्डः ॥

टीका० — मृत्तिकाखण्डे लोष्टद्वयम्। 'लोष्टपलितौ'(उ० ३. ९२) इत्यनेन लूञः क्तपुग्गुणा निपात्यन्ते। 'लिश अल्पीभावे'। तुप्रत्ययेन लेष्टुरिति चान्द्राः। 'लेष्टुः खण्डेऽपि लोष्टः स्याद्' इति पुंस्काण्डे वोपालितः ॥

कोटिशो लोष्टभेदनः।

क्षीर० — कोटिभिः कोणैः श्यति भिनत्ति कोटिशः ॥

टीका०— कोटिशद्वयं कोडणा[2] इति ख्याते। कोटिरग्रभागः, तद्योगाल् लोमादिशः। 'लोष्टघ्नः कोटीश' इति रत्नकोशे दीर्घमध्यः ॥

प्राजनं तोदनं तोत्रं

क्षीर० — प्राज्यते प्रेर्यतेऽनेन प्राजनम्। 'वा यौ' (२. ४. ५७) इति पक्षे अजेर्घातोर्वी। प्रवयणं च। तुद्यतेऽनेन तोत्रम्। प्रेषणं च ॥

टीका० — प्राजनत्रयं पाणाटीति ख्यातायाम्। अजेर्ल्युट्। प्राजनम्। वीभावपक्षे प्रवयणं चेति वृत्तिः। तुदेर्ल्युट्ष्ट्रनौ तोदनतोत्रे ॥

खनित्रमवदारणम् ॥ १२ ॥

क्षीर० — खन्यतेऽनेन खनित्रं कुदालादि ॥

टीका० — खनित्रद्वयं खनित्रे। अरित्रवत् खनेः खनित्रम् ॥

दात्रं लवित्रम्

क्षीर० — द्यति लुनाति चानेन[3]। 'दाम्नी —' (३. २. १८२) इति ष्ट्रन्। 'अर्तिलूधूसूखन —' (३. २. १८४) इत्यादिना इत्रः ॥

टीका० — दात्रद्वयं दात्रे। 'दाप् लवने'। ष्ट्रन्। दात्रम्। अरित्रवल्लूञा लवित्रम् ॥

---

१. 'तुष्टुप्र' ख. पाठः. २. 'को' ब. पाठः. ३. 'वा' क. ग. पाठः.

आबन्धो योत्रं योक्त्रम्

क्षीर० — आबध्यते यूयते युज्यते चानेनेति । चर्मरज्जुः ॥

टीका० —आबन्धत्रयं योत्रे[1] । करणे घञ्ञा आबन्धः । यौतेर्युजेश्च ष्ट्रन् । योत्रयोक्त्रे ॥

अथो हलम् ।

क्षीर० — इतो हलप्रकरणमारब्धमित्यर्थः । अतो हलमित्येके पठन्ति ॥

निरीषे कुटकं

निष्क्रान्ता ईषा अस्मान्निरीषम् । कुटति कुटकं, यस्मिन् फालो बध्यते ॥

फालः कृषकः

फलति विशीर्यते भूमिरनेनेति फालः । कृषति क्ष्मां कृषकः । 'ष्वुन् शिल्पिसंज्ञयोः—' (उ० २. ३५) । हलादयः पञ्चैकार्था इत्येके । कृशिकः फलं च ॥

टीका० — फलपञ्चकं हले । 'फलं लाभे फलेऽस्त्राज्ञे..... व्युष्टौ हेतु-समुत्थे स्यादि'ति पवर्गादावजयः । फलशब्द उक्तः । ईषाया निर्गतं निरीषम् । कुट एव कुटकः साधितः । 'ञिफला विशरणे' । णिजन्तादच् । फालः । 'वृश्चिकृषोः किकन्' (उ० २. ४२) इति किकन् । कृषिकः । क्वचित् कृषक इत्यपि[2] पाठः[3] ।

"उदित्रं योक्त्रमाबन्धः फालः कृषक उच्यते ।
ईषा लाङ्गलदण्डस्तु निरीषं कुटकं हलम् ॥"

इति वृष्काः । केचित्तु इहापि ऊष्मादि पठित्वा हलादित्रयं लाङ्गलमुण्डके, फालद्वयं फाले वर्णयन्ति ॥

---

१. 'क्रे' ञ. पाठः. २. 'पि वा पा' ख. पाठः. ३. 'ठः । केचित्तु उ' क्रः पाठः. 'म् । इति वृष्काः । इ' ग. घ., 'म् । इति भागुरिः भृषकाः इ' ञ. पाठः.

लाङ्गलं हलम् ॥ १३ ॥

गोदारणं च सीरं[1]

क्षीर० — लङ्गति लाङ्गलम् । हलति विलिखति हलम् । गौर्भूर्दार्यतेऽनेनेति गोदारणम् । सीयते बध्यते सीरः ॥

टीका० — लाङ्गलचतुष्कं लाङ्गले । 'हल विलेखने' । पचाद्यच् । गां भूमिं दारयतीति गोदारणम् । नन्द्यादि । 'षिञ् बन्धने' । 'शुसिचिमीनां दीर्घश्च' (उ० २. २७) इति क्रन् । सीरम् ॥

अथ शम्या स्त्री युगकीलकः ।

क्षीर० — शाम्यति शम्या ॥

टीका० — शम्याद्वयं युगकीले शमिल इति ख्याते । शाम्यतेर्घन्यादियत् । शम्या ॥

ईषा लाङ्गलदण्डः स्यात्

क्षीर० — ईषति ईषा । 'ईष उञ्छे' ॥

टीका० — ईषाद्वयमीषे । 'ईष गतिहिंसादर्शनेषु'‡ । 'गुरोश्च हलः' (३. ३. १०३) इत्यः । ईषा दीर्घादिर्मूर्धन्यषा ।

"प्रभुशङ्करयोरीशः स्त्रियां लाङ्गलदण्डके"

इति तालव्यान्ते रभसः ॥

सीता लाङ्गलपद्धतिः ॥ १४ ॥

क्षीर० — स्यति भुवं सीता हललेखा ॥

टीका० — सीताद्वयं लाङ्गलरेखायाम् ।

"सीता लाङ्गलरेखा स्याद् व्योमगङ्गा च जानकी"

इति दन्त्यादौ रभसः ।

---

१. 'द' क. ख. ग. पाठः.

‡ 'ईष गतिहिंसादर्शनेषु' इति मुद्रितधातुपाठः ।

"शीता नभस्सरिति लाङ्गलपद्धतौ च
शीता दशाननरिपोः सहधर्मिणी च ।
शीतं स्मृतं हिमगुणे च तदन्विते च
शीतोऽलसे च बहुवारतरौ च दृष्टः ॥"

इति तालव्यादौ धरणिः ॥

पुंसि मेथिः खलेदारु न्यस्तं यत् पशुबन्धने ।

क्षीर०— मीयते क्षिप्यते मेथिः । मेध्यते[1] सङ्गच्छते[2]ऽस्मिन् वा । खलेवाली च । खलं[3] तु खलधानकम् । खलेदार्विति 'हलदन्तात्—' (६. ३. ९) इत्यलुक् । पशुबन्धने पशुबन्धनिमित्तम् ॥

टीका०— खले धान्यमर्दनस्थाने पशुबन्धनार्थं मध्ये निहिते दारुणि मेधिः । 'मेधृ सङ्गमे च' । 'इन्' (उ० ४. ११९) इति इन् ॥

आशुव्रीहिः पादलः स्यात्

क्षीर०— अश्यते अश्नुते वा आशुः । शीघ्रपाको वा । यद् भुग्नः— 'आश्वाख्या शालिशीघ्रयोः' । व्रीणाति व्रीहिः षष्टिकादिधान्यविशेषः । 'व्री हरणे' । यतः,

"व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः ।
अणवः प्रियङ्गुकोद्रवमयुष्टकाः शालिकाढक्यः ।
किञ्च कलायकुलत्थौ शणश्च सप्तदश धान्यानि" ॥

टीका०— आशुत्रयम् आशुधान्ये । शब्दत्रयं साधितम् । 'पादलोडीभिराशु च' इति तन्त्रान्तरम् ॥

शितशूकयवौ समौ ॥ १५ ॥

१, २. 'न्ते', ३. 'लं ख' ख. पाठः. ४. 'षा' ग. पाठः.

क्षीर० — शितस्तीक्ष्णः शूकः किञ्जल्कस्य शितशूकः। यूयते यवः॥

टीका० — शितशूकद्वयं यवे। यौतेरच्। यवः॥

तोक्मस्तु तत्र हरिते

क्षीर० — तत्र नीले यवे। तुज्यते तोक्मः। 'तुजि हिंसायाम्'॥

टीका० — हरिते अपक्के यवे तोक्मः॥

कलायस्तु सतीनकः।

हरेणुखण्डिकौ चास्मिन्

क्षीर० — कलामतिसारम् अयते कलायः। कं लाति वा। सीदन्त्यनेन सतीनकः। सातीनकोऽपि। ह्रियते हरेणुः। खण्ड्यते खण्डिकः॥

टीका० — कलायचतुष्कं कलाये। कं वातं लातीति कलायः। कृञः करेणुवद् हरेणुः। खण्डयोगात् खण्डिकः। 'पृखण्डिभ्यां ठन्'।

"कलायस्त्रिपुटः प्रोक्तः सतीनो वर्तुलो मतः।
हरेणुरङ्कटा ज्ञेया"

इति व्याडिः॥

कोरदूषस्तु कोद्रवः॥ १६॥

क्षीर० — कोरं भक्तं दूषयति कोरदूषः, कदन्नत्वात्। कोनाम्भसा उप्यते क्लिद्यते कोद्रवः। उदालकोऽपि॥

टीका० — कोरदूषद्वयं कोद्रवे। कोरं रुधिरं दूषयतीति कोरदूषः॥

मँङ्गल्यको मसूरः

क्षीर० — 'मसी परिणामे'॥

---

१. 'जिहि', २. 'थः॥' ग. पाठः. ३. 'सेऽपि' ख. पाठः. ४. 'मा' ग. घ. ङ. पाठः.

"शीता नभस्सरिति लाङ्गलपद्धतौ च
शीता दशाननरिपोः सहधर्मिणी च ।
शीतं स्मृतं हिमगुणे च तदन्विते च
शीतोऽस्रे च बहुवारतरौ च दृष्टः ॥"

इति तालव्यादौ धरणिः ॥

पुंसि मेथिः खलेदारु न्यस्तं यत् पशुबन्धने ।

क्षीर०—मीयते क्षिप्यते मेथिः । मेध्यते[1] सङ्गच्छते[2]ऽस्मिन् वा । खलेवाली च । खलं[3] तु खलधानकम् । खलेदार्विति 'हलदन्तात्—' (६. ३. ९) इत्यलुक् । पशुबन्धने पशुबन्धननिमित्तम् ॥

टीका०—खले धान्यमर्दनस्थाने पशुबन्धनार्थं मध्ये निहिते दारुणि मेथिः । 'मेधृ सङ्गमे च' । 'इन्' (उ० ४. ११९) इति इन् ॥

आशुव्रीहिः पाटलः स्यात्

क्षीर०—अश्यते अश्नुते वा आशुः । शीघ्रपाको वा । यद् भुग्नः—'आश्वाख्या शालिशीघ्रयोः' । व्रीणाति व्रीहिः षष्टिकादिधान्यविशेषः । 'व्री हरणे' । यतः,

"व्रीहिर्यवो मसूरो गोधूमो मुद्गमाषतिलचणकाः ।
अणवः प्रियङ्गुकोद्रवमयुष्टकाः शालिकाढक्यः ।
किञ्च कलायकुलत्थौ शणश्च सप्तदश धान्यानि" ॥

टीका०—आशुत्रयम् आशुधान्ये । शब्दत्रयं साधितम् । 'पादलोडीभिराशु च' इति तन्त्रान्तरम् ॥

शितशूकयवौ समौ ॥ १५ ॥

१, २. 'न्ते', ३. 'लं ख' ख. पाठः. ४. 'पा' ग. पाठः.

क्षीर० — शितस्तीक्ष्णः शूकः किंशारुरस्य शितशूकः। यूयते यवः॥

टीका० — शितशूकद्वयं यवे। यौतेरच्। यवः॥

तोक्मस्तु तत्र हरिते

क्षीर० — तत्र नीले यवे। तुज्यते तोक्मः। 'तुजि हिंसायाम्'॥

टीका० — हरिते अपक्वे यवे तोक्मः॥

कलाय्यस्तु सतीनकः।

हरेणुखण्डिकौ चास्मिन्

क्षीर० — कलामतिसारम् अयते कलायः। कं लाति वा। सीदन्त्यनेन सतीनकः। मातीनकोऽपि। ह्रियते हरेणुः। खण्ड्यते खण्डिकः॥

टीका० — कलायचतुष्कं कलाये। कं वातं लातीति कलायः। कृञः करेणुवद् हरेणुः। खण्डयोगात् खण्डिकः। 'पृखण्डिभ्यां ठन्'।

"कलायस्त्रिपुटः प्रोक्तः सतीनो वर्तुलो मतः।
हरेणुरङ्कटा ज्ञेया"

इति व्याडिः॥

कोरदूषस्तु कोद्रवः॥ १६॥

क्षीर० — कोरं भक्तं दूषयति कोरदूषः, कदन्नत्वात्। केनाम्भसा उद्यते क्लिद्यते कोद्रवः। उद्दालकोऽपि॥

टीका० — कोरदूषद्वयं कोद्रवे। कोरं रुधिरं दूषयतीति कोरदूषः॥

मङ्गल्यको मसूरः

क्षीर० — 'मसी परिणामे'॥

---

१. 'जिहिं', २. 'थः॥' ग. पाठः. ३. 'नेऽपि' ग. पाठः. ४. 'मा' ग. घ. ङ. पाठः-

टीका० — मङ्क्षत्यकद्वयं **मसूरे**। 'मसेश्च' (उ० १. ४६) इति उरन्। मसुरो ह्रस्वमध्य इति प्रथमपादीयोणादिवृत्तिः। ततो 'मसेरूरन्' (उ० ५. ३) इत्यनेन तत्पञ्चमपादीयेन दीर्घमध्योऽपि साधितः। 'मसूरो मसुरश्चापी'ति द्विरूपकोशः॥

अथ मकुष्ठकमयुष्ठकौ।

वनमुद्गे

क्षीर०—**मङ्क्षयतेऽनेन मकुष्ठकः॥**

टीका० — मकुष्ठकत्रयमृषिमुद्गे **काठाइडा** इति ख्याते। मयुष्ठके द्वितीयोऽन्तःस्थः॥

सर्षपे तु द्वौ तुन्तुभकदम्बकौ॥ १७॥

क्षीर०—सरति सर्षपः। तुदति तुन्तुभः। कुत्सितमम्बते कदम्बकः॥

टीका० — सर्षपत्रयं **सर्षपे**। 'सर्तेरपः षुक् च' (उ० ३. १४१) इत्यपः षुगागमश्च धातोः। सर्षपो दन्त्यादिमूर्धन्यमध्यः।

"सर्षपः स्यात् सरिषपः कटुस्नेहश्च तुन्तुभः"

इति त्रिकाण्डशेषः॥

सिद्धार्थस्त्वेष धवलः

क्षीर० — **सिद्धप्रयोजनो रक्षोघ्नत्वात्। श्वेतसर्षपः॥**

टीका० — **सितसर्षपे** सिद्धार्थः॥

गोधूमः सुमनः समौ।

क्षीर० —**गुध्यति परिवेष्टयति गोधूमः, गां धुनोति वा। सुष्ठु मन्यते सुमनोऽकारान्तः॥**

टीका० — गोधूमद्वयं **गोधूमे**। 'गुध परिवेष्टने'। 'गुधेरूमः' (उ० ५. २) इति ऊमः। सुमनोऽदन्तः॥

स्याद् यावकस्तु कुल्मासः

क्षीर०—यूयतेऽम्भसा यावकः। कोलति कुलेन मस्यति परिणमते वा कुल्मासः, अर्धस्विन्नो यवादिः। धान्यविशेष इत्येके॥

टीका०—यावकद्वयं मापपत्रायतपत्रे राजमाषे। कुलस्थे इत्यन्ये। यवको बोखधान्यमिति रक्षितः। कुलं मस्यतीति कुल्मासः। 'मस परिणामे'। 'कर्मण्यण्' (३. २. १)। पृषोदरादित्वात् कुलशब्दाकारलोपः। एवं धातुपारायणे दन्त्यसः। कुत्सितो माषः कुल्माषः। पृषोदरादिरित्यन्यः।

"कुल्माषं काञ्जिके क्लीबं यवके तु पुमानसौ"

इति मूर्धन्ये रुद्रः॥

चणको हरिमन्थकः॥ १८॥

क्षीर०—चणते दीर्यते चणकः। हरिभिर्मथ्यते हरिमन्थकः॥

टीका०—चणकद्वयं चणके। 'चन च, नोच्यते' इत्यस्माद् धातोरौणादिककुना धातुप्रदीपादौ चनकः साधितः। चणकस्तु चिन्त्यः। हरिमन्थके स्वार्थिकः कः॥

द्वौ तिले तिलपेजश्च तिलपिञ्जश्च निष्फले।

क्षीर०—'तिलान्निष्फलात् पिञ्जपेजौ वक्तव्यौ' (वा० ४. २. ३६)। 'जतिलः स्याद् वनतिलः'॥

टीका०—निष्फले तिले तिलपेजद्वयम्। 'तिलान्निष्फलात् पिञ्जपेजौ वक्तव्यौ' (वा० ४. २. ३६) इति पिञ्जपेजौ॥

क्षवः क्षुताभिजननो राजिका कृष्णिकासुरी॥ १९॥

क्षीर०—क्षौत्यनेन क्षवः। क्षुतमभिजनयति क्षुताभिजननः। कृ-

---

१. 'अ' घ. ङ. च पाठः.

ष्णसर्षपोऽयं राजसर्षपाख्यः । राजते राजिका । कृष्णा वर्णेन, कर्षति विलिखति वा कृष्णिका । अस्यते असुरस्त्रीव वा आसुरी ॥

टीका०— क्षवपञ्चकं राजिकायाम् । क्षुवतेरपि क्षवः । क्षुधामभिजनयतीति क्षुधाभिजननः । नन्द्यादिः । 'असुरी राजिकायां स्याद्' इति रभसः ॥

स्त्रियौ कङ्गुप्रियङ्गू द्वे

क्षीर०— कुत्सितं कृत्वा अङ्ग्यते कङ्गुः । कङ्कुः कुङ्गुश्चेत्येके । प्रीणाति प्रियङ्गुः ॥

टीका०— कङ्गुद्वयं कामण इति ख्यातायाम् । कङ्कुः कङ्गुश्चेति द्विरूपकोशः ॥

अतसी स्यादुमा क्षुमा ।

क्षीर०— न तस्यते अतसी । अवते उमा । 'उङ् शब्दे' । क्षौत्यनया भुक्तया क्षुमा ॥

टीका०— अतसीत्रयमिनीति ख्यातायाम् । 'अत सातत्यगमने' । 'अत्यमिचमि—' (उ० ३. ११७) इत्यादिना असच् । गौरादिः ॥

मातुलानी तु भङ्गायां

क्षीर०— न तोल्यते मातुलानी । भङ्ग्यते भङ्गा । शणोऽपि ॥

टीका०— मातुलानीद्वयं कश्मीरेषु भङ्गा इति[1] ख्यातायाम् । एतत्फलं कलायपरिमाणम् । द्वयं साधितम् ॥

व्रीहिभेदस्त्वणुः पुमान् ॥ २० ॥

क्षीर०— अणुरल्पकणत्वात् । अणति पर्दत्यनेनेति वा । तुवरी त्वरके । वल्लो निष्पावे । श्यामः श्यामाके च ॥

---

१. 'लेव ख्या' क. ग. पाठः.

टीका० — कङ्कुतो मनागुपचितो व्रीहिविशेषोऽणुशब्देनैव केदारादिदेशे ख्यातोऽर्णुः । अणेर्धातोः 'धान्ये नित्' (उ० १. ९) इति उः ॥

किंशारुः सस्यशूकं स्यात्

क्षीर० — कुत्सितं शृणाति किंशारुः । श्यति शूकम् ॥

टीका० — किंशारुद्वयं सस्यशूके । 'किंजरयोः श्रिणः' (उ० १. ४) इत्युण् ॥

कणिशं सस्यमञ्जरी ।

क्षीर० — कणाः सन्त्यस्य कणिशम् । धान्येयवादि शिलं, सिलं च ॥

टीका० — अभिनवधान्यादिशीर्षे कणिशद्वयम् । कणिशं तालव्यशम् ॥

धान्यं व्रीहिः स्तम्बकरिः

क्षीर० — धन्यतेऽर्थ्यते धान्यम् । स्तम्बं करोति स्तम्बकरिः । 'स्तम्बशकृतोरिन्' (३. २. २४) । सीत्यं च ।

"कुसूलो वलकः कोष्ठागारं धान्यादिकोष्ठकः" ॥

टीका० — धार्न्यत्रयं धान्ये । 'दधातेर्यङ् नुट् च' (उ० ५. ४८) इति यक् नुडागमश्च प्रत्ययस्य । धान्यम् । स्तम्बं गुत्सं करोतीति स्तम्बकरिः । 'स्तम्बशकृतोरिन्' (३. ३. २४) ॥

स्तम्बो गुच्छस्तृणादिनः ॥ २१ ॥

क्षीर० — तृणादेर्यः स्तम्बो नालं स गुड्यतेऽनेन गुच्छः । यं प्रति स्तम्बोऽप्रसिद्धः, तं प्रत्यन्यथा विध्यनुवादौ कार्यौ । एवं सर्वत्रोन्नेयम् ॥

---

१. 'णुः । क्वचिन्नेत्यन्यः । अ' ग. पाठः. २, 'न्यं' क. ग. पाठः. ३. 'स्य', ४. 'लः सवकः', ५. 'कम्' ख. पाठः, 'त' ग. पाठः. ६. 'न्यादित्र' क. ग. पाठः. ७. 'योज्यौ ।' ख. पाठः,

टीका० — तृणस्य गुत्से स्तम्बः । आदिना धान्यस्य । द्वयं साधितम् ।

"हस्तेन्यूनाधिकं यस्य प्रमाणं न ततः परम् ।
नाभिमात्रश्च विस्तारो गुत्सः स इति कथ्यते ॥
पत्राणि येषामाकाशे सारं भूमौ तु वर्तते ।
तेऽपि गुत्सा इति प्रोक्ता यथा स्युर्मूलकादयः ॥
एकस्मादेव मूलात्तु लतापुञ्जाद् विनिर्गतः ।
एकोऽपिच प्ररोहैस्तु बहुभिः स्तम्ब उच्यते ॥"

इति निगमाख्यमभिधानम् ॥

नाडी नालं च काण्डोऽस्य

क्षीर० — अस्य गुच्छस्य यः कण्डत्यनेनेति काण्डः, सा नडति नाडी । 'णल गन्धे' ॥

टीका० — अस्य तृणादिनः काण्डे नाडीद्वयं, साधितम् ॥

पलालोऽस्त्री स निष्फलः ।

क्षीर० — स काण्डः । पलति पलालः ॥

टीका० — स एव तृणादिकाण्डो गृहीतधान्यः पलालाख्यः ॥

कडङ्गरो बुसं क्लीबे

क्षीर० — कडत्यावृणोति कड् अङ्गं रूपमस्य कडङ्गरः । बुस्यते उत्सृज्यते बुसं तृणादिक्षोदः ॥

टीका० — कडङ्गरद्वयं पातानत इति ख्याते । 'बुस उत्सर्गे' । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) । बुसो दन्त्यस इति धातुप्रदीपः । 'बुषेवेषतुषारकाषा' इति मूर्धन्यषभेदः ॥

धान्यत्वाचि पुमांस्तुषः ॥ २२ ॥

क्षीर० — तुष्यत्यनेनाग्निस्तुषः ॥

टीका० — धान्यत्वाचि तुषः । 'तुष तुष्टौ' । इगुपधलक्षणः कः ॥

शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे .

---

१. 'स्तं न्यू' क. पाठः.

क्षीर० — श्यति शूकम्। श्लक्ष्णं च तीक्ष्णाग्रं च तत्। सस्यादेरन्यत्र वृश्चिकादिकण्टकोऽपि शूक इति किंशारोः पृथङ्निर्देशः। शूकधान्यशमीधान्यभेदार्थं वा पुनरुक्तम्। धान्यतीक्ष्णाग्र इत्येके॥

टीका० — सामान्येन श्लक्ष्णे सूक्ष्मे तीक्ष्णाग्रे शूकः। 'शूकोऽनुग्रहशुक्रयोरि'ति तालव्यादावजयः॥

शमी शिम्बा

क्षीर० — शाम्यत्यस्यां शमी। शिनोति शिम्बा। शिम्बिरित्यपि॥[1]

टीका० — शमीद्वयं शिम्बडिकायाम्[2]। शमी उक्तः॥

त्रिषूत्तरे।

क्षीर० — रिद्धाद्याश्चत्वारो वाच्यलिङ्गाः॥

टीका० — ऋद्धादयो बहुलीकृतान्तास्त्रिषु॥

रिद्धमावसितं धान्यं[3]

क्षीर० — रिद्धं सिद्धं राधेः। ऋद्धं[4] सुसम्पन्नम् इत्येके, ऋधेर्वा। आवसितं रक्षार्थमाच्छादितम्। 'वस आच्छादने'। आ अवसितं[5] निष्पन्नमित्येके॥

टीका० — ऋद्धे सम्पन्ने आवसितम्। आङ्वपूर्वात् 'षो अन्तकर्मणि' इत्यस्मात् क्तः। (न स्योत तत् स्थितमवकीर्णे श्रुतम्?)। ऋद्धमावसितमिति नाममालायां दीर्घादिः।

"अवसानं गते ज्ञाते ऋद्धेऽप्यवसितं त्रिषु"[6]

---

१. 'बिः शिबिरि', २. 'चि' ख. पाठः. ३. 'न्यं स रि', ४. 'रि' क. पाठः. ५. 'वसि' क. ख. पाठः. ६. 'न्द्र' ख., 'न्द्रु' ग. पाठः.

इति ह्रस्वादौ रभसः ॥

पूतं तु बहुलीकृतम् ॥ २३ ॥

क्षीर० — पूयते स्म पूतं निर्बुसीकृतम् । बहु लाति बहुलं सारम् । मार्जनीशोधनमित्येके ॥

टीका० — पूतद्वयं बहुलीकृतधान्ये । पूतमुक्तम् ॥

माषादयः शमीधान्ये

क्षीर० — वर्तन्त इति शेषः । आदिशब्दान्मुद्गमसूरादयः ॥

टीका० — शमीसहिते धान्ये शमीधान्यम् ।

"मुद्गो माषो राजमाषः कुलत्थश्चणकस्तिलः ।
काकाण्डश्चरवश्चेति शमीधान्यगणः स्मृतः ॥"

इति रत्नकोषः ॥

शूकधान्ये यवादयः ।

क्षीर० — आदिशब्दाद् गोधूमादयः ॥

टीका० — शूकसहिते धान्ये शूकधान्यम् । ते यवगोधूमादयः ॥

शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी ॥ २४ ॥

क्षीर० — शाल्यते शालिः । कल्यते कलमः । आदिशब्दाद् राजशाल्याद्याः जलजाः । 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५. १. ९०) । आदिशब्दात् कटजाद्याः स्थलजाः । अमी इति पुल्लिङ्गनिर्देशान्माषाद्याः शाल्यन्ताः पुंसि ॥

टीका० — कलमाद्याः शूकधान्यविशेषाः शालिशब्दवाच्याः । प्रथमेनादिना रक्तशाल्यादेर्ग्रहणम् । द्वितीयेन कलमादिभ्योऽपकृष्टानां ग्रहणम् । अपकर्षादेव षष्टिकस्य पृथक्करणम् । 'शाङ् श्लाघायाम्' । 'इन्' (उ० ४. ११९)

---

१. 'म् । ओतः श्निः । मा' ग. पाठः. २ 'लुत्थश्च' ठ. पाठः. ३. 'दयः ज' ख. पाठः, ४. 'ला' ख. पाठः.

इति इन् । लत्वम् । शालिः । 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' (५. १. ९०) इति कन्नन्तो निपातितः षष्टिकः । माषयवशालिषष्टिकाः पुंसि ॥

तृणधान्यानि नीवाराः

क्षीर० — **नियतैर्व्रियन्ते**[1] **नीवाराः, मुन्यन्नत्वात् । 'नौ वृ धान्ये । (३. ३. ४८) इति घञ् । बहुवचनाच्छ्यामाकादयोऽपि ॥**

टीका० — नीवारादयस्तृणधान्यानीत्युच्यन्ते । आदिना श्यामाकादिग्रहणम् । 'नौ वृ धान्ये' (३. ३. ४८) इति घञ् । नीवारः ओडि[2]ति ख्यातः ॥

स्त्री गवेधुर्[3]गवेधु[4]का ।

क्षीर० — **गवे अम्भसि धीयते । गवेधुर्नाम मुन्यन्नम्[5] । गवेधुरित्येके ॥**

टीका० — गवेधुद्वयं **गवेधुक** इति ख्याते । घुणुञ्चीति चास्याः प्रसिद्धिः । पुंसि च । 'गवेधु(र्नं ? र्ना) गवेधुक' इति रत्नकोषः ॥

अयोग्रं मुसलोऽस्त्री स्याद्

क्षीर० — **अयोऽग्रेऽस्य अयोग्रम् । अयोदि[6]रित्येके पेठुः । मुस्यते खण्ड्यतेऽनेनेति मुसलम् ॥**

टीका० — अयोग्रद्वयं **मुसले** । अयो लोहोऽग्रे मुखेऽस्येति अयोग्रम् । मुसलिनि मुसलो व्युत्पादितँः । मूर्धन्योऽपि दृश्यत इति वर्णदेशना ॥

उडूखलमुल्[7]खलम् ॥ २५ ॥

क्षीर० — **ऊर्ध्वं[8] खं लाति । उद्गणोढलवत् पृषोदरादित्वादु[9]भयम् ।**

टीका०—उडूखलद्वयमुल्[10]खले । ऊर्ध्वं खमस्येत्युडूखलम् । पृषोदरादित्वादूर्ध्वस्य उडूभावः, खस्य च खलः । एवमयं टवर्गतृतीयवान् । अतो डलयोरैक्यादँ उल्खलमित्यपि । तस्मात् तवर्गतृतीयोऽपपाठः ॥

---

१. 'ते त्रि' ङ. पाठः. २. 'दी' ग. पाठः. ३, ४. 'धु' क. पाठः. ५. 'म् । अ'ख. ग. पाठः. ६. 'जि' क., 'न्दि' ख. पाठः. ७. 'तः । मुषलइत्यपि ॥' ठ. पाठः. ८. 'र्ध्वं खं ला' ख. ङ. पाठः. ९. 'द् द्वयम्' क. पाठः १०. 'न् पदे उल्खलपाठो युज्यते । त' ज. पाठः.

प्रस्फोटनं शूर्पमस्त्री

क्षीर० — प्रस्फोट्यते असारं बहिः क्रियतेऽनेनेति प्रस्फोटनम् । शीयते शीर्यते वानेन शूर्पम् । 'शूर्प माने' वा ॥

टीका० — प्रस्फोटनद्वयं कुलुके । स्फुटतेर्ल्युट् । 'श्यः सम्प्रसारणमूश्च' इति वर्तमाने 'सुशृभ्यां निच्च' (उ० ३. २६) इति पप्रत्ययः, ऊकारश्चान्तादेशः । शूर्पम् ॥

चालनी तितउः पुमान् ।

क्षीर० — चाल्यतेऽनेन । चालनमिति कात्यः ।

"क्षुद्रच्छिद्रसमोपेतं चालनं तितउ स्मृतम्" ।

तनोति सारं तितउः । 'तनोतेर्डउः सन्वच्च' (उ० ५. ५२) । परि-(वन ? पव)नं च ॥

टीका० — चालनी । 'चालनं तितउ प्रोक्तम्' इति तु रत्नकोषः । अतः पुमानिति मतान्तरमाश्रित्योक्तम् । अपपाठ इति केचित् । 'तनोतेर्डउः सन्वच्च' (उ० ५. ५२) इति डउप्रत्ययः सन्वद्भावश्च । डउ इति विसन्धिनिर्देशात् संहिताया अभावः । अन्यथा लाघवाद् डोरित्येव ब्रूयात् । तितउः ॥

स्यूतप्रसेवौ

क्षीर० — समानावित्येव । सीव्यते स्म स्यूतः । वस्त्राद्यावपनम् । प्रसीव्यते प्रसेवः ॥

टीका० — स्योनद्वयं धौतच्छटे । सीव्यत इति स्योनः । 'सिवु तन्तुसन्ताने' । बहुलवचनान्नः । ऊठ् गुणश्च । स्योनः । स्यूत इति पाठे क्तः । 'स्योनस्यूतप्रसेवका' इति रभसः । कर्मणि घञ् । प्रसेवः ॥

कण्डोलपिटौ

क्षीर० — कण्ड्यते कण्डोलः । पट्यते पिटः वंशदलादिमयं भाण्डम् । पिटकोऽपि ॥

---

१. 'वकः' । क. ख. पाठः. २. 'ज्य' ख. पाठः.

टीका० — कण्डोलद्वयं कण्डोलके। 'काडि रक्षणे'। $ 'कविकल्लिकण्डिगडिगण्डिकटिपटिभ्य ओलच्' (उ० १. ६९)। कण्डोलः। 'पिट शब्दे'। इगुपधलक्षणः कः। पिटः॥

कटकिलिञ्जकौ॥ २६॥

समानौ

क्षीर० — कटत्यावृणोति कटः। किल्यते क्षिप्यतेऽस्मिन् किलिञ्जकः। वीरणनडादिमयं कुणोलाख्यम्॥

टीका० — येन मरावो बध्यते, तत्र कटद्वयम्। गजावयवे कटः उक्तः॥

रसवत्यां तु पाकस्थानमहानसे।

क्षीर० — रस आस्वादोऽस्त्यस्यां रसवती। महदनोऽस्य महानसम्। अनसा उपकरणं लक्ष्यते। 'अनोऽश्मायस्सरसां जातिसंज्ञयोः' (५. ४. ९४) इति[1] समासान्तष्टच्प्रत्ययः॥

टीका० — रसवतीत्रयं महानसे[2]। रसः संस्क्रियमाणोऽस्यामस्तीति मतुपि रसवती। महच्चानश्चेति महानसम्। 'सन्महत्—' (२. १. ६१) इत्यादिना कर्मधारयः। 'अनोऽश्मायस्सरसां जातिसंज्ञयोः' (५. ४. ९४) इति समासान्तोऽच्॥

पौरोगवस्तदध्यक्षः

क्षीर० — पुरो गौर्मांसं[3] जलं वास्याः पुरोगुः, तस्या रसवत्या अयं पौरोगवः॥

टीका० — रसवत्यध्यक्षे पौरोगवः॥

सूपकारास्तु वल्लवाः॥ २७॥

---

१. 'ति टच्' क., 'समासान्तोऽच्प्र' ख. पाठः. २. 'रसनगृहे। र' ज. पाठः. ३. 'गोमत् स्थलं' क. ग., 'गोमान् स्थल' ख. घ. पाठः.

$ 'कपिगडि.....' इति मुद्रितोणादिपाठः।

क्षीर० — सूपं कुर्वन्तीत्युपलक्षणं मांसपाकादेः । वल्लिः सौत्रः प्रीत्यर्थः ॥

आरालिका आन्धसिकाः सूदा औदनिका गुणाः ।

क्षीर० —अरालम् अन्ध ओदनं च पण्यमेषाम् । सूदयन्ति तण्डुलान् सूदाः । गुणयन्ति गुणाः । रक्तकराश्च[1] ॥

टीका०— सूपकारसप्तकं सूपकारे । सूपं व्यञ्जनं करोतीति सूपकारः । कर्मण्यण् । वर्णोऽधिकारः । तद्योगाद् वर्णवः । वप्रकरणे 'अन्येभ्योऽपि दृश्यन्त इति वक्तव्यम्' (वा० ५. २. १०९) इति वः । अरालं कुटिलं चरतीत्यारालिकः । अन्धो भक्तं तत्साधनं शिल्पमस्येति आन्धसिकः । 'शिल्पम्' (४. ४. ५५) इति ठक् । एवमौदनिकः । 'सूद क्षरणे' । दन्त्यादिः । पचादिः । सूदः । गुण उक्तः ॥

आपूपिकः कान्दविको भक्ष्यकारः

क्षीर०— अपूपाः कन्दुश्च पण्यमस्य । 'इसुसुक्तान्तात् कः' (७. ३. ५१) इति कान्दुक इति न्याय्यम् । खरविशदमभ्यवहार्यं भक्ष्यम् ॥

टीका० — छन्दवारेति ख्याते आपूपिकत्रयम् । 'तदस्य पण्यम्' (४. ४. ५१) इति ठकि आपूपिकः । कन्दुः स्वेदनी, तत्र संस्कृतपिष्टादिकमप्युपचारात् कन्दुः, स पण्यमस्येति कान्दविकः । भक्षं करोतीति भक्षकारः । भक्षशब्दो यकारान्त इति प्रमादपाठः ॥

इमे त्रिषु ॥ २८ ॥

क्षीर० — पौरोगवाद्या वाच्यलिङ्गाः ॥

टीका० — पौरोगवाद्या भक्षकारान्तास्त्रिषु ॥

अश्मन्तमुद्धानमधिश्रयणी चुल्लिरान्तिका ।

---

१. 'रक्तकारा' ख. पाठः.

क्षीर० — अश्नुतेऽश्मन्तम्। उद्धन्यतेऽत्रोद्धानम्। अधिश्रीयतेऽनया अधिश्रयणी। 'श्रीञ् पाके'। 'अन्त्यधिश्रयणी भवेदि'ति माला॥

टीका० — अश्मन्तपञ्चकं चुल्ल्याम्। अश्मनोऽप्यन्तमत्रेति अश्मन्तकम्। शकन्ध्वादिरिति गोवर्धनः। उत्पूर्वाद्धाञो ल्युट्। उद्धानम्। 'ध्मा शब्दाग्निसंयोगयोरि'ति उद्ध्मानमिति कश्चित्। 'श्रीञ् पाके'। अध्न्यादिः। ल्युट्। अधिश्रयणी। 'चुल्ल भावकरणे'। 'इन्' (उ० ४. ११९) इति इन्। चुल्लिः। पक्षे ङीष्। समीपे अन्तिक उक्तः। ततष्टाप्॥

अङ्गारधानिकाङ्गारशकट्यपि हसन्त्यपि॥ २९॥

हसन्यपि

क्षीर० — अङ्गारा धीयन्ते अस्याम् अङ्गारधानी। मग्नाग्निः। हसत्यङ्गारैर्हसन्ती, हसन्यपि॥

टीका० — अङ्गारधानिकाचतुष्कम् अङ्गारशकटिकायाम्। माङ्गलिका माङ्गलशकटिकेति यामाहुः। स्वेदायाङ्गारो धीयतेऽस्यामिति अङ्गारधानी। ल्युट्। स्वार्थे कः। हसन्ती शत्रन्ता। ल्युटि हसनी॥

अथ न स्त्री स्यादङ्गारः

क्षीर० — अङ्क्यते अङ्गारः। लिङ्गार्थे विधिः॥

अलातमुल्मुकम्।

क्षीर० — अलन्ति वारयन्ति एतदलातम्। न लान्ति वा। उल्कां मुञ्चत्युल्मुकम् अर्धदग्धं काष्ठम्। उलति वा। उलिः सौत्रः॥

टीका० — ईषद्दग्धकाष्ठादिखण्डे साग्नौ निरग्नौ चाङ्गारत्रयम्। 'अङ्गारचुम्बितमिव व्यथमानमास्ते' इति साग्नौ प्रयोगः। 'कलङ्कस्तत्रत्यो व्रजति मलिनाङ्गारतुलनामि'ति तु निरग्नौ प्रयोगः। 'अगि रगि लगि गत्यर्थाः'। मन्दार-

---

१. 'नी च।' ख. पाठः. २. 'कादिच' ग. पाठः. ३. 'ज्ञा' ग. पाठः. ४, ५. 'ति' क, पाठः. ६. 'म्। उल्कां' ख. पाठः. ७. 'अ' ग. पाठः.

वदारन् । अङ्गारः । 'उच समवाये' । 'उल्मुकदर्विहोमि—' (उ० ३. ८४) इति मुकप्रत्ययो गुणाभावो लत्वं च चकारस्य निपात्यते ॥

क्लीबेऽम्बरीषं भ्राष्ट्रो वा

क्षीर० — अम्ब्यतेऽर्थ्यतेऽम्बरीषम् । भृज्ज्यतेऽस्मिन् भ्राष्ट्रः । अस्त्र्यम्बरीषमित्येके पठन्ति ॥

टीका० — यत्र कलायचणकादिकं भृज्ज्यवे, तत्राम्बरीषद्वयम् । 'अस्जो पाके' । 'अम्बरीषः' (उ० ४. २७) इत्यनेन ईषन् अम्बर इत्ययं चादेशः । 'भ्राष्ट्रोऽम्बरीष उक्त' इति पुंस्काण्डे वोपालितः । 'अस्जगामिहनिनमिवि*शां वृद्धिश्च' (उ० ४. १६१) इति ष्ट्रन् वृद्धिश्च । भ्राष्ट्रम् ॥

कन्दुर्ना स्वेदनी स्त्रियाम् ॥ ३० ॥

क्षीर०— वेत्येव । विकल्पेन कन्दुर्ना पुमान् । पक्षे स्त्री । कन्दत्येनां कन्दुः । स्वेदयति स्वेदनी ॥

टीका०— अथोमुखीकृत(क ? घ)टकपालप्राये लोहादिमये पाकपात्रे कन्दुद्वयम् । 'स्कन्देः सलोपश्च' (उ० १. १४) इति कुः । कन्दुः । ल्युटि स्वेदनी ॥

अलञ्जरः स्यान्मणिकः

क्षीर० — अलं जीर्यत्यलञ्जरः महाकुम्भः । मणत्यम्भसा ध्रियमाणो मणिकः ॥

टीका० — अलञ्जरद्वयं जाडीति ख्याते । मणिरेव मणिकः । स्वार्थिकोऽत्र कः ॥

---

१. 'मृ' ख. ग. ङ. च. पाठः. २ 'कप्रा', ३. 'जी' ख., 'जला । म' ग. पाठः. ४. 'घ्रि' ख. पाठः. ५. 'आलञ्चूर' ङ. च. ङ. पाठः. ६. 'धी' ख. ग. पाठः.

---

* 'विश्यशाम्' इति मुद्रितोणादिपाठः ।

कर्कर्यालूर्गलन्तिका।

क्षीर० — किरत्यम्बु कर्करी। आलोत्यालूः। 'अड उद्यमने'। अस्मादालूर्वा। गलत्यम्भोऽस्या गलन्तिका वा॥

टीका० — कर्करीत्रयं भावाडिआ इति ख्याते। 'ऋ गतौ'। 'त्रो रश्च लः' (उ० १. ९) इति बाहुलकाद् लुण्लत्वे। आलुः। 'गड सेचने'। 'हृवसी'-त्यादिना झच्। स च षि(त्वा?)त्। ङीष्। गलन्तिका॥

पिठरः स्थाल्युखा कुण्डं

क्षीर० — पिठति पिठरः पिठरी च। 'पिठ अवयवे'। पिठेरमिति सभ्याः। तिष्ठत्यस्यां स्थाली। स्थालं कुम्भी च। (उ?ओ)खत्युखा। कु(ड्य?ण्ड्य)ते पच्यतेऽस्मिन्निति कुण्डं कुण्डी च॥

टीका० — पिठरचतुष्कं भाण्डीति ख्यातायाम्। पचतेः 'पचिवचिभ्यामिच्चोपधायाः' इत्यरः ठश्चान्तादेशः। पिठरः। 'स्थाचतिमृजेरालज्वालजालीयरः' (उ० १. १२१) इति आलः। स्थाली। 'उख णखे'-त्यादौ इगुपधलक्षणः कः। उखा। कुण्ड उक्तः॥

कलशस्तु त्रिषु द्वयोः॥ ३१॥

घटः कुटनिपौ

क्षीर० — कं लाति कलयति वा कलशः। घटते घटः। कुटति कौत्यम्भसा वा कुटः। निपिबन्त्यस्मान्निपः॥

टीका० — कलशचतुष्कं कलशे। 'सकलशे कलशे वनमालिके'ति कप्फिणाभ्युदये यमकम्। 'सुक्षेत्रमिव सकलशालिकं स्नानागारमि'त्याश्चर्यमञ्जरी च। 'कलशः कलसोऽपि च' इति तु रभसः। घटेरचि घटः। स्त्रियां घटी। कुटेः कः। कुटः। निपिबन्त्यनेनेति निपः। 'घञर्थे कविधानम्' (वा० ३. ३. ९८) इति कः॥

---

१. 'अ' क. ख. पाठः. २. 'ल' क. ग. ङ. पाठः. ३. 'दारूपूर्वा', ग., 'दारू ढूर्वा' ङ. पाठः. ४. 'का। चालयतीत्यर्थः। पि' क. ग. ङ. पाठः. ५. 'भाडि' ङ. छ. पाठः. ६. 'न्त्य' ख. ङ. पाठः. ७. 'स्या' ग. पाठः.

अस्त्री शरावो वर्धमानकः ।

क्षीर० — शीर्यमाणमवति शरावः । वर्धते मृत्पिण्डाद् वर्ध्यते छिद्यते वा चक्राद् वर्धमानकः । शालाजिरोऽपि ॥

टीका० — शरावद्वयं शरावे । 'शृणातेराव' इत्यावः । शरावैः । 'अस्त्री सराव' इति तु विदग्धाः । 'ताच्छील्यवयोवचनशक्तिषु चानश्' (३. २. १२९) । स्वार्थे कन् । वर्धमानकः ॥

ऋचीकं पिष्टपचनं

क्षीर० — अर्च्यते पाकोत्कर्षादृचीकम् । ऋजीषमिति तान्त्रिकाः । 'ऋज भृजि भर्जने' । पिष्टकृतं भक्ष्यं पच्यतेऽस्मिन् पिष्टपचनम् ॥

टीका० — तेलावणीति ख्याताया ऋजीषद्वयम् । 'अर्ज षर्ज अर्जने' । 'अर्जेः किद् ऋज च' (उ० ४. २८) इति ईषन् ऋजादेशश्च धातोः । ऋजीषम् । मूर्धन्यषम् ॥

कंसोऽस्त्री पानभाजनम् ॥ ३२ ॥

क्षीर० — काम्यतेऽस्मात् कंसः । चषको मल्लिका पारी च ॥

टीका० — कंसद्वयं पानभाजने । रजतमयादावपि । 'कमेः सः' इति सः । कंसः ॥

कुतूः कृत्तेः स्नेहपात्रं

क्षीर० — कुत्सितं तन्यते कुतूः । कृत्तेश्चर्मणः ॥

टीका० — कृत्तेश्चर्मणः स्नेहपात्रे कुडुआ इति ख्याते कुतूः । सैवेति निर्देशात् स्त्रियाम् ॥

सैवाल्पा कुतुपः पुमान् ।

क्षीर० — ह्रस्वा कुतूः कुतुपः । 'कुत्वा डुपच्' (५. ३. ८९) ॥

---

१. 'जी' ग. पाठः. २. 'को' ख. पाठः. ३. 'वः । शरावोऽस्त्री निरसरावरणेइ' क. च. छ., 'वः रावेणेइ' ख. ग. ट. पाठः. ४. 'काः । ऋषीकमित्येके । ऋ' ख. पाठः. ५. 'जेर्ऋजश्च इ' क. ख. पाठः.

टीका० — अल्पा कुतूः कुतुपः । 'कुत्वा डुपच्' (५. ३. ८९) इति कुतूशब्दाड् डुपच् ॥

सर्वमावपनं भाण्डं पात्रामत्रे[1] च भाजनम् ॥ ३३ ॥

क्षीर०— आ उप्यते आधेयमस्मिन्नावपनम्। भण्डत्याधेयं भाण्डम्। 'भडि परिभाषणे'। पात्याधेयं पीयतेऽस्माद्वा पात्रम्। अमत्याधेयमत्रामत्रम्। भज्यतेऽस्मिन्नाधेयं भाजनम्। भाण्डावपने पृथगाहुः। यन्मुनिः —

"उष्ट्रिकादि[3] तु यद् भाण्डं सर्वमावपनं विदुः"॥

टीका० — सर्वमावपनं वस्तुस्थापकं गोणीप्रसेवैकादिका कलशस्थाल्यादिकश्च भाण्डादिचतुष्कवाच्याः । आङ्पूर्वो वपिर्न्यसने । 'भडि परिभाषणे' । पचाद्यच् । पृषोदरादित्वाद् दीर्घः। भाण्डम् । पातेः ष्ट्रन् । पात्रम् । अमत्रं ह्रस्वादि । भजेर्ण्यन्ताल् ल्युट् । भाजनम् ॥

दर्वी कम्विः खजाका च

क्षीर० — दृणाति पाक्यं दर्वी । काम्यते कम्विः । खजति मथ्नाति खजाका ॥

टीका०— दर्वित्रयं दार्वीति[5] ख्यातायाम् । 'दृ विदारणे'। 'वृदृभ्यां विन्'[7] (उ० ४. ५४)। दर्विः । 'उल्मुकदर्विहोमिनः' (उ० ३. ८४) इत्यनेन वा विप्रत्ययान्ता दर्विर्निपात्यते। कमेर्बाहुलकाद् विन्। कम्विः। 'खज मन्थे'। 'खजेराकः' (उ० ४. १३) इत्याकः । टाप्। खजाका ॥

स्यात्तन्दूर्दारुहस्तकः[9]।

क्षीर० — ततं दुनोति खण्डयति तन्दूः, तनोति वा । तण्डूरिति सभ्यः पाठः। दारुमयी हस्तप्रतिकृतिः दारुहस्तकः । दर्वीभेदोऽयम् ॥

---

१. 'त्रं' ङ. पाठः. २. 'त्यते आधे' ख. पाठः. ३. 'दिमयं भा' ग. पाठः. ४. 'वका क' ख. ङ. ञ., 'चादिककरक' ठ. पाठः. ५. 'सं।' क. पाठः. ६. 'दर्व्याम्' ठ. पाठः, 'दार्वीति' ख. पाठः. ७. 'दृवीभ्यां' ख. ट. पाठः. ८. 'भा। दा' ग. पाठः.

टीका० — तर्डूद्वयं परिवेषणोपयुक्तायाम् । '*त्रो डुक् च' (उ० १. ९२) इति ऊः धातोर्डुगागमश्च । तर्डूः स्त्रियाम् । दारुणो हस्त इव दारुहस्तकः । 'इवे प्रतिकृतौ' (५. ३. ९६) इति कन् ॥

अस्त्री शाकं हरितकं शिग्रुः

क्षीर० — श्यति देहं, शक्यतेऽनेन भोक्तुं वा शाकम् । हरितकं नीलत्वात् । शिनोति शिग्रुः ह्यर्थे, शौभाञ्जनं हरितकविशेषश्चेति ॥

टीका० — शाकत्रयं शाके । शाकशिग्रुशब्दावुक्तौ । हरितात् स्वार्थे कन् । हरितकम् ॥

अस्य तु नाडिका ॥ ३४ ॥

कदम्बश्च कलम्बश्च

क्षीर० — अस्य शाकस्य नाडी । कदति के लम्बति वा कदम्बः । शाकविशेषे इत्येके । प्राकृते दस्य डत्वात् कडम्ब इत्याहुः । कलम्बो वा ॥

टीका० — शाकनालिकायां कडम्बद्वयम् । नाला उक्ता । कनि नालिका । कडेर्बाहुलकः अम्बच् । कडम्बकलम्बौ ॥

वेषवार उपस्करः ।

क्षीर० — वेषं व्याप्तिं वृणीते वेषवारः । कासमर्दसुरसादिः । येन मांसाद्युपस्क्रियतेऽसावुपस्करः । 'समवाये च' (६. १. १३८) इति सुट् ॥

टीका०— वेशवारद्वयं सर्षपादौ हिङ्गुजीरकाम्लवेतसादौ च । वर्णदेशनायां तु दन्त्यो वेसवारः । उपस्करोति व्यञ्जनमिति उपस्करः । पचादिः ॥

तद्भेदानाह—

तिन्तृँडीकं च चुक्रं च वृक्षाम्लम्

---

१. 'सौभञ्जनं हरितवि', २. 'लि', ३. 'ली'ख. पाठः. ४. 'डस्य सत्त्वा' ग. पाठः. ५. 'माहुः' ख. पाठः. ६. 'ते स उप', ७. 'त्रि' क. ख. पाठः.

---

* 'त्रो दुट् च' इति मुद्रितोणादिपाठः ।

क्षीर० — तिन्तृंडीशैलजं तिन्तृंडीकम्। चुक्रम्। 'चुक्र व्यथने'। वृक्षस्याम्लमम्लवेतसमाहुः॥

टीका० — महाद इति ख्याते तिन्तृडीकद्वयम्। 'चक तृप्तौ'। 'चकिरम्योरुच्चोपधायाः' (उ० २. १६) इति रक्। चुक्रम्॥

अथ वेल्लजम्॥ ३५॥

मरिचं कोलकं कृष्णमूषणं धार्मपत्तनम्।

क्षीर० — वेल्ले वेल्लातटे जायते वेल्लजम्। वेल्लाख्यः शाखीत्येके। म्रियते मरिचम्। सौक्ष्म्यात् कोलकम्। 'कुल बाल्ये'। कृष्णं वर्णेन, कर्षति तैक्ष्ण्याद्वा। ऊषति रुजत्यूषणम्। धर्मपत्तने भवं धार्मपत्तनम्। आह च —

"मरिचं वलितं श्यामं वेल्लजं कृष्णमूषणम्।
यवनेष्टं शरं वृन्तं कोलकं धार्मपत्तनम्"॥

टीका० — वेल्लजषट्कं मरिचे।

"मरीचं कोलकं धार्मपत्तनं मरिचं समम्"

इति रभसः। कृष्णमुक्तम्। उषणं दीर्घादि चास्ति॥

जीरको जरणोऽजाजिः कणा

क्षीर० — जीर्यतेऽनेनान्नं जीरको जरणश्च। अजं स्वाभाविकं मन्दाग्नित्वमजति अजाजिः, स्त्री। कणाः सन्त्यस्यां कणा। अर्शआदित्वाद्[5]च्॥

टीका० — जीरकचतुष्कं जीरके। 'स्त्र्यजाजिर्जीरणोऽजाजी' इति वोपालितः। कणा उक्ता॥

कृष्णे तु जीरके॥ ३६॥

सुषवी कारवी पृथ्वी पृथुः कालोपकुञ्चिका।

क्षीर० — कृष्णा तु पिप्पलीत्येके पेटुः। सुष्ठु सुवति प्रेरयति दोषान्

१., २. 'न्त्रि' क. ख. पाठः. ३. 'म् 'त्रि', ४. 'न। ऊ', ख. पाठः. ५. 'भ्योऽच्' ङ. पाठः.

सुषवी । कारोरियं कारवी[1] । काला वर्णेन । उपकुञ्चयत्यल्पीकरोति दोषान् उपकुञ्चिका । आह च —

"उत्कुञ्चिकोपकुञ्ची च कालिका चोपकालिका ।
सुषवी कुञ्चिका कुञ्ची पृथ्वीका कृष्णजीरकः" ॥

टीका० — कृष्णजीरके सुशवीषट्कम् । सुशवी तालव्यमध्या । अपरं साधितम् ॥

आर्द्रकं शृङ्गिबेरं स्याद्

क्षीर० — आर्द्रात् 'संज्ञायां कन्' (५. ३. ७५) । शृङ्गोपलक्षितं बेरं देहोऽस्य शृङ्गिबेरम् । आह च —

"महौषधं शृङ्गिबेरं कटुभद्रं तथार्द्रकम्" ॥

टीका० — आर्द्रकद्वयमार्द्रके । आर्द्रायां नक्षत्रे जातमार्द्रकम् । कनि 'केऽणः' (७. ४. १३) इति ह्रस्वत्वम् । शृङ्गमिव बेरं वपुरस्येति शृङ्गबेरम् ॥

अथच्छत्रा वितुन्नकम् ॥ ३७ ॥

क्षीर० — छत्राभा[2] छत्रा, छादयति दोषान् वा । वितुदति मन्दाग्नित्वं[3] वितुन्नकम् ॥

कुस्तुम्बुरु च धान्याकम्

कुत्सितं तुम्बति कुस्तुम्बुरु । 'तुबि लुबि अर्दने' । पारस्करादित्वात् सुट् । धान्यमकति धान्याकम् । अल्लुका धान्यकं च ॥

टीका० — छत्राचतुष्कं धान्याके[4] । छत्रा उक्ता । विपूर्वात् तुदेः क्तः । स्वार्थे कन् । वितुन्नकम् । कुत्सितं तुम्बुरु कुस्तुम्बुरु । 'कुस्तुम्बुरूणि जातिः' (१. १. १४३) इति सुट् निपात्यते । धान्यात् स्वार्थे कनि धान्याकम् । धान्यकमपीति हेमचन्द्रः ॥

---

१. 'बी । बृहत्कारणात् का' क, 'बी .....त्करणात् का' ग. पाठः. २. 'त्राभपत्रा' छादयति दोषान् वा छत्रा । बि' ग. घ. पाठः. ३. 'भित्वाद् वि' ख. पाठः. ४. 'श्यामाके' ग. पाठः.

अथ शुण्ठी महौषधम्।

स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम्॥ ३८॥

क्षीर० — शुण्ठति शुष्यति शुण्ठी[1]। नगराख्ये देशे भवं **नागरम्**। **विश्वभेषजम्** अनेकदोषजित्। विश्वं विश्वा च, भीमवत्॥

टीका० — शुण्ठीपञ्चकं शुण्ठ्याम्। 'शुठि शोषणे'। पचाद्यच्[2] गौरादी। **स्त्रीनपुंसकयोर्विश्वम्**। देवभेदे पुमानुक्तः॥

आरनालकसौवीरकुल्माषाभिषुतानि तु।
अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्जिकम्॥ ३९॥

क्षीर० — अरनालो भक्तं, तज्जमारनालम्। सुवीरेषु प्रायभवं **सौवीरम्**। '**षुञ्**[3] अभिषवे', अस्माद्वा पृथक् कुल्माषाख्या नास्ति। अस्ति चेद् भीमवत् स्यात्। कुल्माषैर्यवादिभिरर्थस्विन्नैरभिषूयते परिवास्यते स्म **कुल्माषाभिषुतम्**। अवन्तिषु सूयते **अवन्तिसोमम्**। कुञ्जं लाति[4], तथा कुत्सितं जलमस्त्यस्य वा **कुञ्जलम्**। काञ्चयति दीपयत्यग्निं **काञ्जिकं**, बध्नाति दोषान् वा काञ्च्यां पुरि भवं वा। आह च —

"काञ्जिकं काञ्जिकं वीरं कुल्माषाभिषुतं तथा।
अवन्तिसोमं धान्याम्लमारनालं महारसम्॥
सौवीरकं सुवीराम्लं तथा चुक्रं तुषोदकम्"॥

टीका० — आरनालाष्टकं **काञ्जिके**। सौवीरं दन्त्यसम्। यवके कुल्माष उक्तः। दन्त्योऽपि कुल्माषः। स च यवविकारवाचीति वर्णदेशना। अभिषुतं मूर्धन्यषम्। अवन्तिसोमेतिच्छेदः। केन जलेन अञ्जिका अभिव्यक्तिरस्येति काञ्जिकम्॥

सहस्रवेधि जतुकं बाल्हिकं हिङ्गु रामठम्।

क्षीर० — सहस्रं बहु विध्यति **सहस्रवेधि**[6]। जायते **जतुकम्**। **बाल्हिकरामठौ** उदग्देशौ। हिनोति **हिङ्गु**। अत्युग्रं भूतनाशनं गूढगन्धं च॥

---

१. 'म्। शुष्यति शुण्ठी शती। न', २. 'दिः। गौरादिः। स्त्री' ग. पाठः. ३. 'षुञोऽभिषवार्थाद्वा' क. पाठः. ४. लातीति कु' ख. पाठः. ५. 'म्निं बध्नाति दोषान् वा काञ्जिकम्। का' ग. ङ. पाठः. ६. 'धि। बा' ख. पाठः.

टीका० — सहस्रवेधिपञ्चकं हिङ्गुनि । ताच्छीलिकणिनौ सहस्रवेधी । जतुकं चवर्गादि प्रागुक्तम् । बाल्हीकोऽप्युक्तः । न स्त्री हिङ्गुरित्यन्यतन्त्रम् । रमठदेशे भवो रामठः ॥

तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥ ४० ॥

क्षीर० — तस्य हिङ्गोः पत्री । कारोरियं कारवी संस्कर्त्री । बाष्पं स्रवति बाष्पिका । कवर्याकृतिः कबरी । करवीति पाठभेदः ॥

टीका० — हिङ्गुतरुपत्र्यां कारवीपञ्चकम् ॥

निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी ।

क्षीर० — निशाख्या रात्रिपर्याया, नानार्थे रजनीत्वात् । काञ्चनवर्णा काञ्चनी । हरिं पीतं वर्णं द्राति हरिद्रा । वरो वर्णोऽस्त्यस्या वरवर्णिनी । आह च—

"हरिद्रा पीतिका पिण्डा रजनी रजना निशा ।
गौरी वर्णवती पीता हरिता वरवर्णिनी" ॥

टीका० — निशाह्वापञ्चकं हरिद्रायाम् । निशाह्वा रात्रिपर्यायाभिधाना । 'कचि दीप्तौ' । ल्युट् । पृषोदरादित्वाद् दीर्घत्वम् । काञ्चनी । पीत उक्तः । टापि पीता । वरः श्रेष्ठो वर्णः पीतः । तद्योगाद् वरवर्णिनी ॥

सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ॥ ४१ ॥

क्षीर० — लुनाति जाड्यं लवणम् । नन्द्यादित्वाल्ल्युः, णत्वं च । अक्ष्णोति व्याप्नोति अक्षीवम् । उश्यते वशिरम् । 'वश कान्तौ' ॥

टीका० — समुद्रवेलाभवे कडकञ्चेति ख्याते लवणे अक्षीवद्वयम् । अक्षीवं ह्रस्वादि ॥

सैन्धवोऽस्त्री शीताशिवं माणिमन्थं च सिन्धुजे ।

क्षीर० — सिन्धुनद्युपलक्षितं सैन्धवम् । तत्र भवः । 'कच्छादिभ्यश्च' (४. २. १३३) इत्यण् । शीतं शिनोति शीताशिवम्, उष्णवीर्यत्वात् । आह च—

"माणिमन्थं च सिन्धूत्थं नादेयं सिन्धुजं शिवम् ।
शुद्धं शीताशिवं च ॥"

अन्यदेव वस्त्रकम् ॥

---

१. 'ल्हि' ग. पाठः. २. 'रित पी', ३. 'त' ख. पाठः. ४. 'दिदी', ५. 'दिल्युः' ग. पाठः. ६. 'तृ । वस्त्रं तु रौमके । सि' ङ. पाठः.

टीका० — सिन्धुदेशभवे लवणे सैन्धवत्रयम्। शैलवदणि सैन्धवः, अस्त्री। सितं शुभ्रं शुभं कल्याणमिति कर्मधारयः। मणिमन्थपर्वते भवो माणिमन्थः॥

रौमके वस्नकं

क्षीर०—रुमायामाकरे भवं वस्नकं नाम लवणम्। 'रौमके वसुकं वस्वि'ति च माला॥

टीका०—लुमा नाम समहारिदेशे लवणाकरः, तत्र प्राविष्टं दार्वपि चिराल्लवणं स्यात्। तद्भवे लवणे रौमकद्वयम्॥

पाक्यं विडं च कृतके द्वयम्॥ ४२॥

क्षीर०—पाके साधु पाक्यं पक्तव्यं वा कल्कराख्यम्। विडति भिनत्ति मलान् विडम्। कृतकलवणस्य द्वे नामनी। पाक्यविडलवणयोर्भेदेऽपि कृतकत्वादैक्यम्। व्यर्थे पाक्यं, विडलवणं यवक्षारः क्षारश्चेति॥

टीका०—लवणमृत्तिकां सिक्त्वा निष्पादिते लवणे पाक्यम्। पचतेर्ण्यत्॥

सौवर्चलेऽक्षुरुचके

क्षीर०—सुवर्चलाकरभवं सौवर्चलं, सुवर्चस्येदं सौवर्चम् अग्निदीपनं लाति वा। 'वर्च दीप्तौ'। अच्। अक्ष्णोति व्याप्नोत्यक्षुं। अक्षमित्येके। रोचतेऽनेन रुचकम्। हृद्यगन्धं च॥

टीका०—सौवर्चलत्रयं सौवर्चले। अक्षद्वयं साधितम्॥

तिलकं तत्र मेचके।

क्षीर०—तिलति स्निह्यति तिलकम् तत्र तस्मिन् मेचके कृष्णे लवणे वर्तते। पूर्वं तु मधुवर्णम्। अगन्धं कृष्णवर्णं तिलकमित्येके। यद्वैद्याः—

---

१. 'वस्नकं रौमके रु' ग. पाठः. २. 'बि' ग. ङ. पाठः. ३. 'बि' ग. पाठः. ४. 'क्षुः रो' क. ग. पाठः. ५. 'ष्णे ब' ख. पाठः. ६. 'ष्णलवणं नि' ग. पाठः.

"कृष्णे सौवर्चलगुणा लवणे गन्धवर्जिते" ॥

टीका० — कृष्णे सौवर्चले तिलकं, साधितम् ॥

मत्स्यण्डी फाणितं खण्डविकारे

क्षीर० — मदं स्यन्दयते[1] मत्स्यण्डी सामान्यशर्करा । मत्स्यानमति[2] मत्स्यान्दीति वा । मत्स्याण्डीति वैद्याः । यद्धन्वन्तरिः—

"शर्करोक्ता तु मीनाण्डी श्वेता मत्स्याण्डिका सिता ।"

"मत्स्यण्डिकाखण्डसिताः क्रमेण गुणवत्तराः"

इति तु वाहटः । फण्यते द्रवत्वात् फाणितम् । खण्ड्यते इक्षोतः । क्षौद्रकं त्विक्षुरसविकारः खण्डवत् ॥

टीका० — इक्षुविशेषस्य रसपाके खण्डयोग्ये या सारभूता गुडिकाकारा जायते सा मत्स्यण्डी खण्डशालूकम् । अर्धावर्तितं फाणितम् । (अनः खण्डविकारौ[3] ?) ॥

शर्करा सिता ॥ ४३ ॥

क्षीर० — शीर्यते शर्करा । सीयते सिता, खण्डशर्कराख्या ॥

टीका० — शर्कराद्वयं शर्करायाम् । शर्करोक्ता ।

"शर्करायां सिता शुक्ले बद्धे चावसिते त्रिषु"

इति दन्त्यान्ते रभसः ॥

कूर्चिका क्षीरविकृतिः स्याद्

क्षीर० — कूर्चस्[4]तन्मस्तु, तदस्त्यस्यां कूर्चिका । कुचति कुँचिकेत्येके[5] । किलाटिकाख्या ॥

टीका० — कथितक्षीरविकारे खिरिस इति ख्याते कूर्चिका ।

---

१. 'न्दते', २. 'ति भजति मत्स्यण्डी' क. ग. ङ. पाठः. ३. 'रे' ज. पाठः. ४. 'चोऽस्य' ख., 'चस्तमस्तद' ग., 'चस्तद' क. पाठः. ५. 'कूचिके' ख., 'कुचील्ये' क. पाठः.

"दध्ना सह पयः पङ्कं यत् तत् स्याद् दधिकूर्चिका।
तक्रेण पङ्कं यत् क्षीरं सा भवेत् तक्रकूर्चिका" ॥

रसाला तु मार्जिता।

क्षीर० — रसमलति रसाला। मार्ज्यते मार्जिता दधिसितामरिचादिकृतं लेह्यम्। यत् सूदशास्त्रम् —

"अर्धाढकं सुचिरपर्युषितस्य दध्नः
खण्डस्य षोडशपलानि शशिप्रभस्य।
सर्पिः पलं मधु पलं मरिचं द्विकर्षं
शुण्ठ्याः पलार्धमपि वार्धपलं चतुर्णाम् ॥
श्लक्ष्णे पटे ललनया मृदुपाणियुक्ता
कर्पूरधूलिसुरभीकृतभाण्डसंस्था।
एषा वृकोदरकृता सरसा रसाला
यास्वादिता भगवता मधुसूदनेन" ॥

टीका० — रसालाद्वयं शिखरिण्याम्।

"स चान्तर्जातकाजाजीसगुडाद्रकनागरम्।
रसाला स्यात्[1] शिखरिणी सैघृतं[2] सरसं दधि ॥"

इति रत्नमाला। आम्रे रसाल उक्तः। ततष्टाप्। मृजोऽङि 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यत' इति वृद्धौ मार्जा। ततस्तत्करोतीति णिजन्तात् क्तः। मार्जिता ॥

स्यात् तेमनं तु निष्ठानं

क्षीर० — तिम्यत्यार्द्रीभवत्यनेन तेमनम् उपसेचनं कौपना[3]ख्यम्। नितिष्ठत्यन्नमनेन निष्ठानम्। व्यञ्जनं च। सूपादय उपचारात् ॥

टीका० — त्रिमण इति ख्याते तेमनद्वयम्। 'तिम ष्टिम आर्द्रभावे'। ल्युट्। तेमनम्। तिष्ठतेर्ल्युट्। निष्ठानम् ॥

---

१. 'चा' क. ग. ङ. पाठः. २. 'संस्कृतं' क. पाठः. ३. 'केवना' ख. पाठः.

त्रिलिङ्गा वासितावधेः ॥ ४४ ॥

क्षीर० — इतः प्रभृति वासितान्ता वाच्यलिङ्गाः ॥

टीका० — अतः परं वासितावधेः प्राग् वाच्यलिङ्गाः ॥

शूलाकृतं भटित्रं च शूल्यम्

क्षीर० — 'शूलात् पाके' (५. ४. ६५) इति डाच् । भटत्यनेन भटित्रम् । 'भट भृतौ' । शूले संस्कृतं शूल्यम् । 'शूलोखाद्यत्' (४. २. १७) । भरूटकं भृष्टं[1] च ।

"संस्कृतं सर्पिषा दग्धा सार्पिष्कं दाधिकं क्रमात् ।
उदलावणिकं तत् स्याद् यत् सिद्धं लवणाम्भसा" ॥

टीका० — शूलाकृतत्रयं भडित इति ख्याते तेमनविशेषे । शूलाकृतम् । 'शूलात् पाके' (५. ४. ६५) इति डाच् । 'भट भृतौ' । 'अशित्रादिभ्य इत्रोत्रौ' (उ०४. १७४) इति इत्रः । भटित्रम् । 'शूलोखाद् यत्' (४. २. १७) इति यत् । शूल्यं मांसम् । शूल्यो मत्स्यः । शूल्या वार्त्ताकुः ॥

उख्यं तु पैठरम् ।

क्षीर० — उखायां स्थाल्यां संस्कृतम् उख्यम् । पिठरे संस्कृतं पैठरम् । 'संस्कृतं भक्षाः' (४. २. १६) इत्यण् ॥

टीका० — स्थाल्यां संस्कृते उख्यद्वयम् । शूल्यवदुख्यम् । 'संस्कृतं —' (४. २. १६) इत्यण् । पैठरम् ॥

प्रणीतमुपसम्पन्नं

क्षीर० — रूपरसादिनिष्पन्नमन्नं प्रणीयते स्म प्रणीतम् ॥

टीका० — पाकरूपरसादिभिः सम्पन्ने व्यञ्जने प्रणीतद्वयम् । नयतेः पदेश्च क्तः ॥

---

१. 'भृष्टं च' च. पाठः.

प्रयस्तं स्यात् सुसंस्कृतम् ॥ ४५॥

क्षीर० — परिव्ययपाकादिना प्रयत्ननिष्पन्नमन्नं प्रयस्तम्। संस्कृतम्। अनित्ये साधुः। प्रयतमिति केचित्। यदुक्तं—'प्रयतं संस्कृते पूते'॥

टीका० —तैलपरिव्ययादियोगेन सुष्ठु संस्कृते व्यञ्जनादौ प्रयस्तम्। 'यसु प्रयत्ने'। क्तः॥

स्यात् पिच्छिलं तु विजिलं

क्षीर० — पिच्छा आचामोऽस्य पिच्छिलम्। पिच्छादित्वादिलच्। विजते चलति विजिलम्। विज्यमिति वैद्याः। 'स्यात् पिच्छिलं तु विजलमि'त्येके॥

टीका० — पिच्छिलद्वयं पिच्छिले। पिच्छादीलचि पिच्छिलम्। 'ओविजी भयचलनयोः'। 'कुटादिभ्यः कित्' इति इलच्। स च कित्। विजिलम्॥

संमृष्टं शोधितं समे।

क्षीर० — वालमक्षिकादिरहितं सम्मृष्टम्। 'मृजू शुद्धौ'॥

टीका० — अपनीतकेशमक्षिकाद्यवकरे सम्मृष्टद्वयम्। मृजेः शुध्यतेश्च क्तः। सम्मृष्टं शोधितम्॥

चिक्कणं मसृणं स्निग्धे

क्षीर० — चिगित्यव्यक्तं कणति चिक्कणम्। मस्यति मसृणम्॥

टीका० — चिक्कणत्रयं चिक्कणे। 'चिती संज्ञाने'। 'चितः कः कणच्' (उ० ४. १७७) इति कणच्, तकारस्य ककारः। चिक्कणम्। 'ऋण गतौ दीप्तौ च'। सम्पूर्वात् कः। पृषोदरादित्वाद् वर्णविपर्ययः। मसृणम्॥

तुल्ये भावितवासिते ॥ ४६ ॥

---

१. 'धुः ॥ स्यात्' क. ग. ङ. पाठः. २. 'द्य' क., 'ज्यद्याम' घ. प :. ३. 'थ्य' क. ट. पाठः. ४. 'क्तः ॥' क. ख. ट. पाठः. ५. 'मसृण' ठ. पाठः. ६. 'णमिति धातुप्रदीपः। ऋ' क. ख. ग. घ. ङ. पाठः.

क्षीर० — भाव्यते मिश्रीक्रियते स्म भावितम् । 'भुवोऽवकल्कने' । णिच् । वास्यते द्रव्यान्तरेण मिल्यते धूपपुष्पादिना वाधिवास्यते वासितम् । यन्मुनिः — 'धूपितं वासितं विदुः' ॥

टीका० — व्याघ्रांङ्गारादिना धूपिते तेमनादौ भावितद्वयं, मनुष्यवर्गे साधितम् ॥

आपक्वं पौलिरभ्यूषः

क्षीर० — ईषद्भृष्टं कलायादि आपक्वं खलभर्जिताख्यम् । * पुलति वर्धते पौलिः । 'पुल महत्त्वे' । ऊषो रुजार्थादभ्यूषः । उषो दाहार्थादभ्योष इत्येके ॥

टीका० — पाकावस्थे यवशीर्षादौ अग्निना ईषद्दग्धे हाँदुस इति ख्याते आपक्वत्रयम् । ओलभेति चास्य प्रसिद्धिः । पचेः क्तः । 'पचो वः' (८.२.५२) । आपक्वम् । 'ऊष रुजायाम्' । घञर्थे कः । अभ्यूषः ।

"भृष्टयवो धानाः स्त्री तोक्मो हरितो यवोऽभ्युषः पक्वः ।"

इति रत्नकोषार्यादौ ह्रस्वमध्यश्च । पौलिर्ना ॥

लाजाः पुम्भूम्नि चाक्षताः ।

क्षीर० — लज्यन्ते लाजाः । 'लज भर्जने' । न क्षण्यन्ते अक्षताः । चादूँ भिन्नक्रमात् ते पुंसि बहुत्वे च । 'अक्षता यवाः' इति पुराणम् । तन्मते पुंबहुत्वार्थो विधिः ॥

टीका० — लाजद्वयं लाजेषु । 'लाज लाजि भर्जने' । पचादिः । लाजाः । न क्षता अक्षताः । दारा इव लाजाः । 'लाजाः स्त्रियामि'ति वार्तः ।

---

१. 'घ्रया' च. पाठः. २. 'बलवार्जि' क. ग. पाठः. ३. 'भा' ग. पाठः. ४. 'तृ तें' ख. पाठः. ५. 'यं भी इति ख्यातायाम् । लाज' क. ख. ग. घ. पाठः.

---

* पुलतेः क्षीरस्वामिपक्षे तुदादित्वमपि । तथाच पुलधातौ क्षीरतरङ्गिणी—"पोलति..... तुदादौ पुलति" इति ।

"लाजाः पुंसि बहुत्वे वा स्त्रियां लाजापि चाक्षतम्"
इति संसारावर्ते एकवचनान्तापि ॥

पृथुकः स्याच्चिपिटकः

क्षीर० — आर्द्रभृष्टं सस्यं तद्विपाकात् पृथु भवति, चिपिटीभवति च । नीलधान्यं वा भृष्टमुलूखलक्षोदाच्चिपिटीभूतं तण्डुलम् ॥

टीका० — पृथुकद्वयं चिड इति ख्याते । निशब्दाद् 'इनच्पिट-च्चिकचि च' (५. २. ३३) इति पिटच्प्रत्ययश्चिरादेशश्च नेः । 'चिपिटस्तु चिपुटः स्यादि'[1]ति उकारमध्योऽपि ॥

धाना भृष्टयवे स्त्रियः ॥ ४७ ॥

क्षीर० — धीयन्ते धानाः । भृष्टयव इति जात्याख्यायामेकत्वम् । धानाश्चूर्णिताः[2] सक्तवः स्युः । 'वस्तिः स्यादंसशष्कुली' । धूस्तीरिति[3] द्रमिडाः ॥

टीका० — भृष्टयवे धाना नित्यबहुवचनान्ताः । 'धापृवस्यज्यतिभ्यो नः' (उ० ३. ६) ॥

पूपोऽपूपः पिष्टकः स्यात्

क्षीर० — पुनाति पूपः । न पूयतेऽपूपः पिष्टातकमयो मण्डकाख्यः । 'पूयी विशरणे' । अद्भिरुप्यत इति नैरुक्ताः । 'पिष्टाच्च' (४. ३. १४६), 'संज्ञायां कन्' (४. ३. १४७) । मुनिस्तु—

"अपूपः पिष्टपूपः स्यात् पूपा भक्ष्याः प्रकीर्तिताः" ॥

टीका० — पूपत्रयं पिष्टके । पिष्टानां तण्डुलानां विकारः पिष्टकः । 'पिष्टाच्च' (४. ३. १४६) इत्यनुवृत्तौ 'संज्ञायां कन्' (४. ३. १४७) इति कन् ॥

करम्भो दधिसक्तवः ।

---

१ 'ति रभसकोषार्थ उ' क. ख. ग. घ. ङ., 'ति रत्नकोषार्थ उ' ज. पाठः. २. 'र्णस' क. ग. पाठः. ३. 'भ्रस्तिरि' ख. पाठः.

क्षीर० — केन रभ्यते†(मी?मि)ल्यते कार्यते वा करम्भः । दध्युपसिक्ताः सक्तवः ॥

टीका० — दध्युपसिक्ताः सक्तवः करम्भः, भान्तः । तथाच —

"साम्भः कुम्भं करम्भं नवमथितघटीकर्करीं शर्करीं च"

इति बाणानुप्रासः । यस्तु पकारान्तः, स मिश्रसामान्यवाची । करंकुकोककल-हंसकाम्बविक' इति विदग्धमुखमण्डनम् (?) ॥

भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ॥४८॥

क्षीर० — भस्यते भक्ष्यते भिस्सा । भ्यसेः सम्प्रसारणं वा । 'ब्राह्मणभिस्से'ति भाष्यम् । भज्यते भक्तम् । अनित्यनेनान्धः, सान्तम् । अद्यतेऽन्नम् । उनत्ति क्लिद्यत्योदनम् । भृशं दीव्यत्यनेन दीदिविः । स इति विशेषणात् पुंसि ॥

टीका० — भिस्साषट्कं भक्ते । भिस्सा दन्त्यसा । 'अदेर्नुम् धश्च' (उ० ४. २०७) इत्यसुन् नुं धान्तादेशश्च । अन्धः । 'अन्नाण्णः' (४. ४. ८५) इति निपातनादन्नम् । 'पन अन च व्यवहारे' । 'कृवृदृवसिद्रुपन्य-निस्वपिभ्यो नित्' (उ० ३. ९) इति वा अनेर्नः । 'उन्देर्नलोपश्च' (उ० २. ७९) इति युच् । ओदनम् । 'दिवो द्वे दीर्घश्चाभ्यासस्य' (उ० ४. ९६) इति क्विन् । 'लोपो व्योर्वलि' (६. १. ६६) इति वलोपः । ओदन-शब्दो दीदिविसहितोऽस्त्री, न तु सदीदिविशब्दः ॥

भिस्सटा दग्धिका

क्षीर० — कुत्सिता भिस्सा भिस्सटा । यथा — ओदनभिस्सटा । लक्ष्यानुरोधाट्टः । यथा — स्वर्गग्रामटिका, वधूटिका ॥

टीका० — दाडीति ख्यातायां भिस्सटाद्वयम् ॥

---

१. 'तं' ङ. छ. पाठः. २. 'विः ॥' छ. पाठः.

---

† 'मिल श्लेषणे' इति मिलधातोः क्रिय्यतेरिव सकर्मकत्वात् कर्मणि लट् । मेल्यत इति वा पाठ्यम् । मिल्यते कार्यते इति रभेरर्थद्वयं यत्र, 'परिरभत' इत्यादौ मेलनार्थस्य 'तन्तुना पटमारभते' इत्यादौ करणार्थस्य च दर्शनात् ।

सर्वरसाग्रे मण्डमस्त्रियाम् ।

क्षीर० — सर्वरसानां द्रवद्रव्याणामग्रं मुखं, मण्डयति मण्डः ॥

टीका० — सर्वेषां रसानां घृतौदनादीनामग्ररसे मण्डः । 'मडि भूषायाम्' । अच् ॥

मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥

क्षीर० — मस्यति परिणमते मासरः । आचम्यते आचामः । निस्राव्यते निस्रावः ॥

टीका० — भक्तमण्डे मासरत्रयम् । 'चमु अदने' । आङ्पूर्वात् कर्मणि घञ् । आचामः । मूत्रं निस्रावयतीति निस्रावः ॥

यवागूरुष्णिका श्राणा विलेपी तरला च सा ।

क्षीर० — यूयते पिष्टादिना यवा । आगूयतीत्यागूः । संज्ञितौ उष्णा उष्णिका । 'ब्राह्मणकोष्णिके संज्ञायाम्' (५. २. ७१) । श्रायते श्राणा । 'श्रा पाके' । विलिम्पति विलेपी । तरला लेह्यत्वाच्चपला ।

"अभ्यङ्क्षणाभ्यञ्जने तैलं कृसरोऽत्र तिलौदनः" ॥

टीका० — यवागूपञ्चकं यवाग्वाम् । वैद्यके तु विलेपनादिर्यवागूविशेष इत्युक्तम् । यौतेः 'सृयुवचिभ्योऽन्युजागूजक्नुचः' (उ० ३. ८१) इत्यागूच् । यवागूः । 'ब्राह्मणकोष्णिके संज्ञायाम्' (५. २. ७१) इति कना निपातितत्वादुष्णिका । 'श्रा पाके' । क्तः । 'संयोगादेरातो धातोर्यण्वतः' (८. २. ४३) इति निष्ठातो नः । श्राणा, तालव्यादिः । विलेपी पचादिः, गौरादिः । तरलशब्द उक्तः ॥

गव्यं त्विषु गवां सर्वं

---

१. 'का' ग. ङ. पाठः. २. 'म् इति कन् प्रत्ययमानिपात्यते । श्रा' ख. पाठः. ३. 'उक्षणा' क. ख. पाठः. ४. 'लो' ग. पाठः.

क्षीर० — गोरिदं गवि भवमित्यादिषु[1] सर्वेष्वर्थेषु गव्यं क्षीरादि 'सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत्' (वा० ४. १. ८५) ॥

टीका० — गोर्विकारोऽवयवो वा गव्यम् । तत्र भवे[2] इत्यादयर्थे 'सर्वत्र गोरजादिप्रसङ्गे यद् वक्तव्यः' (वा० ४. १. ८५) इति यत् । अवयवार्थे 'उगवादिभ्यो यत्' (५. १. २) ॥

गोविड् गोमयमस्त्रियाम् ॥ ५० ॥

क्षीर० — गोर्विष्ठा गोविट् । 'गोश्च पुरीषे' (४. ३. १४५) । मयट् ॥

टीका० — गोविड्द्वयं गोमये । गोविट् षान्ता स्त्रीलिङ्गा च । 'गोश्च पुरीषे' (४. ३. १४५) इति मयट् ॥

तद्विशुष्कं करीषोऽस्त्री

क्षीर० — करोत्यग्निं करीषं शुष्कं गोमयम् ॥

टीका० — गोमये विशुष्के करीषः । 'कॄ विक्षेपे' । 'कृतृभ्यामीषन्' (उ० ४. २६) ॥

दुग्धं क्षीरं पयः समम् ।

क्षीर० — दुह्यते दुग्धम् । घस्यते क्षीरम् । 'घसेः किच्च' (उ० ४. ३४) इतीरन् । 'गमहनजनघन—' (६. ४. ९८) इत्युपधालोपः । 'खरि च' (८. ४. ५५) इति चर्त्वम् । 'शासिवसिघसीनां च' (८. ३. ६०) इति षत्वम् । पीयते पयते वा सरसत्वात्[3] पयः । असुन् । समामिति पयसो नपुंसकत्वार्थम् ॥

टीका० — दुग्धत्रयं दुग्धे । दुहेः क्तः । दुग्धम् । पय उक्तम् ॥

---

१. 'दिध्व' ख. ग. ङ. पाठः. २. 'वाद्य' क. ख. पाठः. ३. 'रसवत्त्वात्' क. पाठः

पयस्यमाज्यदध्यादि

क्षीर०—पयसो विकारः पयस्यम्। 'गोपयसोर्यत्' (४. ३. १६०)। आदिशब्दान्नवनीतादि॥

टीका०—आज्यदधितक्रादि पयस्याख्यम्। गव्यवद् यत्॥

द्रप्सं दधि घनेतरत्॥ ५१॥

क्षीर०—द्रप्यति द्रप्सम्। घनादन्यद्, अघनमित्यर्थः। यन्माला—'द्रप्सं दध्यघनं तथा'। एतच्च द्रप्सं 'शरमि'ति भागुरिपाठः। सरमिति बुद्ध्वा मालाकारो भ्रान्तः। 'केचिन्नैस्तु नाशिता' इति * अयमपि मालापाठेन विप्रलब्धः। यदाह[3] भुग्नः—'बाणद्रप्सौ शरौ' इति। इत्थं सामर्थ्यं[4]—तरत् उपरि प्लवमानं घनं दधि द्रप्सम्॥

टीका०—घनेतरद् अघनं दधि द्रप्सं द्रगड इति ख्यातम्॥

घृतमाज्यं हविः सर्पिः

क्षीर०—जिघर्ति घृतम्। 'अञ्जिसिवृभ्यः क्तः' (उ० ३. ८९) आ अञ्जनीयम् आज्यम्। 'आङ्पूर्वादज्जेः संज्ञायाम्—' (वा० ३. १ १०९)। क्यप्। हूयते हविः, हविष्यं च। सर्पति सर्पिः। इसन्तौ॥

टीका०—घृतचतुष्कं घृते। 'घृ क्षरणदीप्त्योः'। 'अञ्जिवृषिभ्यः क्तः' (उ० ३. ८९)। घृतम्। 'आङ्पूर्वादज्जेः संज्ञायाम्—' (वा० ३. १. १०९)। क्यप्। आज्यम्। 'अर्चिशुचिहुसृ[5]च्छर्दिच्छादिभ्य इसिः' (उ० २. १०८)। हविः, सर्पिश्च। तद्दिवसीयाद् दध्नो दुग्धाद् वा समुद्भूतं घृतम्॥

नवनीतं नवोद्धृतम्।

क्षीर०—दध्नो मथितान्नवं तत्कालं नीतमुद्धृतं नवनीतं घृतयोनिः॥

---

१. 'त्॥ घ' क घ. पाठः. २. 'तेन ना', ३. 'हुः वा' ख. पाठः. ४. 'समर्थ्यं तत्' क. पाठः. ५. 'र्थान्तरम्। उ' ख. पाठः.

---

* अयमपि भागुरिपाठोऽपि। मालापाठेन विप्रलब्धः, मालापाठविसम्भेण पाठकैर्नाशित इति तात्पर्यम्।

टीका० — नाग्निस्पृष्टं नवनीतम् । नवाद् दध्यादेर्नीतं प्राप्तम् ॥

तत् तु हैयङ्गवीनं यद् ह्योगोदोहसमुद्भवम् ॥ ५२ ॥

क्षीर० — ह्योगोदोहस्य विकारो हैयङ्गवीनम् । 'हैयङ्गवीनं संज्ञायाम्' (५. २. २३) इति साधुः । कात्यो नवनीतमित्याह ॥

टीका० — ह्यो गतदिनं, तद्गोदोहभवं घृतं हैयङ्गवीनम् । 'हैयङ्गवीनं संज्ञायाम्' (५. २. २३) इति खञ् निपातितः । ह्योगोदोहशब्दस्य ह्यियङ्गवादेशः । तस्य च विकारे खञ् ॥

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

क्षीर० — मन्थदण्डेनाहतम् । कलश्यां घर्घर्यां भवं कालशेयम् । 'दृतिकुक्षिकलशि—' (४. ३. ५६) इति ढञ् । न रिष्यति न निहन्त्यरिष्टं, सर्वरोगजित्त्वात् ॥

टीका० — सामान्यगोरसे दण्डाहतचतुष्कम् । मन्थानदण्डेन हृतं दण्डाहतम् । कलश्यां भवं कालशेयं, तालव्यशम् । आहेयवद् ढञ् । अरिष्टमुक्तम् ॥

क्षीर० — तद्विशेषानाह—

तक्रं ह्युदश्वित्मथितं पादाम्बर्धाम्बु निर्जलम् ॥ ५३ ॥

तश्चति द्रुतं गच्छति तक्रं, चतुर्भागाम्बु । उदकेन श्वयत्युदश्वित्, अर्धाम्बु । दध्नो मथनमात्रसाध्यं मथितं, निर्जलम् ।

"द्विगुणाम्बु श्वेतरसमर्धोदकमुदश्वितम् ।
तक्रं त्रिभागहीनं तु केवलं मथितं स्मृतम् ॥"

इति धन्वन्तरिः ॥

टीका० — यथाक्रमं पादाम्बु घोलं तक्राख्यम्, अर्धाम्बु उदश्वित्, निर्जलं तु मथिताख्यम्। 'तञ्चँ सङ्कोचने'। 'स्फायितञ्चि—' (उ० २. १३) इत्यादिना रक्। न्यङ्क्वादिकुत्वम्। तक्रम्। बहूदकत्वाद् उदकेन[1] श्वयति वर्धत इत्युदश्वित्। 'टुओश्वि गतिवृद्ध्योः'। क्विप्। तुक् च। 'उदकस्योदः संज्ञायाम्' (६. ३. ५७) इत्युदकस्योदभावः। 'उदश्वितोऽन्यतरस्याम्' (४. २. १९) इति निषा तनान्न सम्प्रसारणम्। 'मथे विलोडने'। क्तः। मथितम्॥

मण्डं दधिभवं मस्तु

क्षीर० — दध्नो मण्डं द्रवो भागः। मस्यति परिणमते मस्तु॥

टीका० — दध्नो मण्डे मस्तु। 'मस परि(माणे?णामे)'। सेतुवत् तुन्॥

पीयूषोऽभिनवं पयः।

क्षीर० — पीयते पीयूषः। 'नवप्रसूतगवीक्षीरं कथितं सत् पीयूषमिति सज्जनः॥

टीका० — गोप्रसवा[2]नन्तरे सप्तरात्रपर्यन्ते दुग्धे(पेष्टे[3]षम्। 'अथ पेष्टपिष्टनवं?) सप्तदिनावधी'ति शब्दार्णवः॥

अशनाया बुभुक्षा क्षुद्

क्षीर०—अशनेच्छा अशनाया। 'अशनायोदन्य—' (७. ४. ३४) इति साधुः। भोक्तुमिच्छा बुभुक्षा। 'क्षुध बुभुक्षायाम्'। क्विपि[5] क्षुत्। रुचिश्च॥

टीका० — अशनायात्रयं बुभुक्षायाम्। अशनशब्दादिच्छायां क्यच्। 'अ प्रत्ययात्' (३. ३. १०२) इत्यः। 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' (७. ४. ३४) इत्यात्वम्। अशनाया। भुजेः सन्। बुभुक्षा। क्षुधेः क्विप्। क्षुत्॥

ग्रासस्तु कबलार्थकः॥ ५४॥

---

१. 'ञ्चि गतौ। स्फा' ग. पाठः. २. 'न व' क. ग. पाठः. ३. 'वान्त', ४. 'षष्टम्। अथ पेपष्टपि' क. ख. पाठः. ५. 'प्' क. ख. पाठः.

क्षीर० — ग्रस्यते ग्रासः । के तालुनि वलते कबलः ॥

टीका० — ग्रासद्वयं कवले । 'ग्रसु ग्लसु अदने' । कर्मणि घञ् । ग्रासः । केन तोयेन वलनमस्येति कवलः ॥

सपीतिः स्त्री तुल्यपानं

क्षीर० — सहपानं सपीतिः ॥

टीका० — तुल्यपाने सहपाने सपीतिः[1] । समाना पीतिः, स्त्रीलिङ्गा । 'समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु' (६. ३. ८४) इति सभावः । छान्दसा अपि लोके प्रयुज्यन्ते, 'दिवसावसानताम्यत्तामरसमधुसपीतिप्रीते धुतपक्षैराजिवीजि-[2]तरजसि राजहंसयूथे' इति बाणप्रयोगात् । स्त्रिया योषिता सह पीतिरिति नादरणीयम् ॥

सग्धिः[3] स्त्री सहभोजनम् ।

क्षीर० — सहादनं[4] सग्धिः । क्तिन् । 'बहुलं छन्दसि' (२. ४. ३९) इति घस्लृ । 'घसिभसोर्हलि च' (६. ४. १००) इत्युपधालोपः । 'झलो झलि' (८. २. २६) इति सलोपः । 'झषस्तथोर्धोऽधः' (८. २. ४०) । 'झलां जश झशि' (८. ४. ५३) ॥

टीका० — सहभोजने सग्धिः । समाना ग्धिः सग्धिः । अदेः क्तिन् । 'बहुलं छन्दसि' (२. ४. ३९) इति घस्लादेशः । 'घसिभसोर्हलि च' (६. ४. १००) इत्युपधालोपः । 'झलो झलि' (९. २. २६) इति सकारलोपः । ततस्तकारस्य धत्वं, जश्त्वं च । पूर्ववत् सभवः ॥

उदन्या तु पिपासा तृट् तर्षः

क्षीर० — उदकेच्छोदन्या । 'अशनायोदन्य—' (७. ४. ३४) इति साधुः । तर्षणं तृट् तर्षश्च । 'स्तितृषा पिपासायाम्' । तृष्णा नानार्थे ॥

---

१. 'तिः स्त्री' क. ख. पाठः. २. 'ग्र' ङ. पाठः. ३. 'जग्धिः स', ४. 'ने क्तिन्' घ. पाठः.

टीका० — उदन्याचतुष्कं **पिपासायाम्** । उदकशब्दात् क्यच् । 'अशनाय—' (७. ४. ३४) इत्यादिनोदन्भावः । उदन्या । पातुमिच्छा पिपासा । 'धितृषा पिपासायाम्' । भावे क्विप्' । तृट् धान्ता । घञि तर्षः ॥

जग्धिस्तु भोजनम् ॥ ५५ ॥

जेमनं लेप[1] आहारो निघसो न्याद इत्यपि ।

क्षीर० — अदनं जग्धिः । 'अदो जग्धिर्ल्यप् ति किति' (२. ४. ३६) । जमेर्जेमनमाहुः । जमनं जवनं वा । यद् भुग्नः[2] — 'जमनं भोजनं क्वचित्' । न्यदनं निघसः । 'नौ ण च' (३. ३. ६०) इत्यप्[3] । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । णे न्यादः । प्रत्यवसानमभ्यवहारश्च ॥

टीका० — जग्धिसप्तकं **भोजने** । अदेः क्तिन्जग्ध्यादेशौ । जग्धिः । भुजेर्ल्युटि भोजनम् । 'चमु छमु जमु झमु अदने' इत्यत्र जिमिरप्यूह्यः । जेमनम् । लिपेरच् । लेपः । हरतेर्घञि आहारः । 'नौ ण च' (३. ३. ६०) इति चकाराद् निपूर्वादेरप् । 'घञपोश्च' (२. ४. ३८) इति घस्लादेशः । निघसः । 'नौ ण चे'त्यनेनैव णप्रत्ययेन अदेर्न्यादः ॥

सौहित्यं तर्पणं तृप्तिः

क्षीर० — सुहितस्य भावः सौहित्यम् ॥

टीका० — सौहित्यत्रयं **तृप्तौ** । सुहितस्तृप्तः । तद्भावः सौहित्यम् । तृपेर्ल्युट् । तर्पणम् । क्तिनि तृप्तिः ॥

फेला भुक्तसमुज्झितम् ॥ ५६ ॥

क्षीर० — फलति विशीर्यते फेला । 'फेल्ल चलने' अस्माद्वा ॥

टीका० — पूर्वं भुक्तं पश्चात् समुज्झितं भुक्तसमुज्झितम् । तत्र फेला ॥

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

क्षीर० — काम्यते कामम् । पर्याप्तिः पर्याप्तम् । इष्यते इष्टम् । ईप्सितमनतिक्रम्य यथेप्सितम् । प्रायः क्रियाविशेषणान्येतानि । अत

---

१. 'ह' क. ख. पाठः. २. 'गर्गः— ज' ख. पाठः. ३. 'प् । णप्रत्ययश्च । अप् । ष' घ. पाठः.

एव अव्ययत्वे[1] एषां श्रीभोजो भ्रान्तः । यच्छाश्वतः — 'कामे निकामे कामाख्या' ॥

टीका० — कामषट्कं **यथेष्टे** । 'कमेर्णिङ्' (३. १. ३०) इति णिङन्तात् कमेरच् । कामं प्रकामं निकामं च । क्रियाविशेषणतया चैते क्लीबलिङ्गाः । आप्नोतेः क्तः । पर्याप्तम् । 'इषु इच्छायाम्' । क्तः । इष्टम् । ईप्सितस्यानतिक्रमो यथेप्सितम् । क्लीबाव्ययम् ॥

गोपे गोपालगोसङ्ख्यगोधुगाभीरवल्लवाः ॥ ५७ ॥

क्षीर० — **गाः पाति गोपैः[3] । गाः पालयति गोपालः । गाः सङ्ख्याति गोसङ्ख्यः । गां दोग्धि गोधुक् । आ[4] अभित ईरयत्याभीरः । वल्लति गाः वल्लवः । वल्लिः सौत्रो वा ॥**

टीका० — गोपषट्कं **गोपे** । गां पातीति गोपः । 'आतोऽनुपसर्गे कः' (३. २. ३) । कर्मण्यणि गोपालः । गां सङ्ख्यष्टे गोसङ्ख्यः । 'समि ख्यः' (३. २. ७) इति कः । 'चक्षिङः ख्याञ्' (२. ४. ५४) इति ख्याञादेशः । गां दोग्धीति क्विप् । गोधुक्, हान्तः । आ भियं राति समन्ताद् भीतिं ददात्याभीरः, कप्रत्ययान्तः । गोमहिष्यादिकं[5] वल्लमानाः संवृण्वन्तो वान्ति गच्छन्तीति वल्लवाः । 'बद स्थैर्ये' । क्विप् । बत् स्थैर्यम् । लुनातेरच् । लवः । बदो लवा बल्लवा इति सनातनः ॥

गोमहिष्यादिकं पादबन्धनं

क्षीर० — **पादे बन्धनमस्य पादबन्धनम् । आदिशब्दात्[6] खरादि । जीववद् धनमित्येके पेठुः ॥**

टीका० — गोमहिष्यादिकं धनं यादवाख्यम् । यदूनामिदं यादवम् । ते ह्येवंधना अभवन्[7] ।

"क्षोभमाशु हृदयं नयदूनां रागवृत्तिमकरोन्न यदूनाम् ।"

(स० १०. श्लो० ९०)

इति माघः ॥

---

१. 'त्वेन श्रुतेरेषां', २. 'पः । पा' ग. ङ. पाठः. ३. 'गा' क. पाठः. ४. 'कं धनं' ख. पाठः. ५. 'त् स्कान्धिकादिवन्धन' क. ग. ङ. पाठः. ६. 'न् ॥ गवी' ङ. पाठः.

द्वौ गवीश्वरे ।

गोमान् गोमी

क्षीर० — गावः सन्त्यस्य गोमी । 'ज्योत्स्नातमिस्रा —' (५. २. ११४) इत्यादिना साधुः ॥

टीका० — गवीश्वरत्रयं गोस्वामिनि । गोमान् मत्वन्तः । 'ज्योत्स्नातमिस्रा —' (५. २. ११४) इत्यादौ गोमी निपातितः ॥

गोकुलं तु गोधनं स्याद् गवां व्रजः[1]॥ ५८ ॥

क्षीर० — व्रजत्यस्मिन् व्रजो गोसम्बन्धी समूहः । 'गोचरसञ्चर —' (३. ३. ११९) इति साधुः[2]। धनं च ॥

टीका० — गवां व्रजे संहतौ गोकुलद्वयम् । धनशब्द उक्तः[3] समूहवाची ॥

त्रिष्वाशितङ्गवीनं तद् गावो यत्राशिताः पुरा ।

क्षीर० — आशिता भोजिता गावो यत्र आशितङ्गवीनम् । 'अषडक्षाशितङ्ग —' (५. ४. ७) इति स्वार्थे खः । 'आसितङ्गवीनमि'ति प्राच्यानां भ्रमः । यत्रान्वाख्यत् — 'गावो यत्रोषिताः पुरे'ति ॥

उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥

अनड्वान् सौरभेयो गौः

क्षीर० — उक्षत्युक्षा । भन्दते भद्रः । बलिं वृणुते बलीवर्दः । ऋषति गच्छति ऋषभः । अनो वहत्यनड्वान् । वहेः क्विप्, अनसो डश्च । सुरभेरपत्यं सौरभेयः । गच्छति गौः । अवान्तरभेदोऽस्य न विवक्षितः । शकरशाकरौ बाडवेयः शाङ्करश्च ॥

---

१. 'जे', २. 'धुः । गोध' क. ग. पाठः. ३. 'क्तः । कुलं स' ठ. पाठः.

टीका० — उक्षनवकं **बलीवर्दे** । 'श्वन्नुक्षन्पा'दिसूत्रे उक्षा नान्तो निपातितः । भद्रवृषावुक्तौ । 'ऋषिवृषिभ्यां कित्' (उ० ३. १२३) इत्यभचि ऋषभवृषभौ । 'अनसि वहेः क्विप्, अनसो ड श्वे'ति अनउपपदाद् वहतेः क्विप्, सकारस्य च डः । सम्प्रसारणम् । 'सावनडुहः' (७. १. ८२) इति नुम् । 'चतुरनडुहोरामुदात्तः' (७. १. ९८) इत्यामागमः । अनड्वान् । 'इतश्चानिञः' (४. १. १२२) इति ढकि सौरभेयः । गच्छतीति गौः । 'गमेर्डोः' (उ० २. ७०) इति डोप्रत्ययः । तत्रानडुहादित्रयं स्त्रियां च । 'अनडुहः स्त्रियां वेति वक्तव्यम्' (वा० ७. १. ९८) इत्याम्विकल्पेन अनड्वाही अनडुही च । गौरादिपाठान्ङीष् । 'टिड्ढाणञ्—' (४. १. १५) इत्यादिना ङीप् । सौरभेयी । गौरित्यत्र तु विशेषणे परं विशेषो न रूपे ॥

उक्ष्णां संहतिरौक्षकम् ।

क्षीर० — 'गोत्रोक्षोष्ट्र—' (४. २. ३९) इति वुञ् ॥

टीका० — **वलीवर्दानां संहतौ** औक्षकम् । राजकवद् वुञ् ॥

गव्या गोत्रा गवां

क्षीर० — संहतिरित्येव । 'खलगोरथात्' (४. २. ५०) इति यः । 'इनित्रकट्यचश्च' (४. २. ५१) इति त्रः ॥

टीका० — **गवां संहतौ** गव्याद्वयम् । 'खलगोरथात्' (४. २. ५०) इति यत् । गव्या । 'इनित्रकट्यचश्च' (४. २. ५१) इति त्रः । गोत्रा ॥

वत्सधेन्वोर्वात्सकधैनुकम् ॥ ६० ॥

क्षीर० — वत्सानां समूहो वात्सकम् । 'गोत्रोक्ष—' (४. २. ३९) इति वुञ् । धेनूनां समूहो धैनुकम् । 'अचित्तहस्तिधेनोष्ठक्' (४. २. ४७) ॥

टीका० — **यथाक्रमं वत्ससंहतौ** वात्सकम् । राजकवद् वुञ् । **धेनुसंहतौ** धैनुकम् । हास्तिकवत् ठक् । 'इसुसुक्तान्तात् कः' (७. ३. ५१) इति ठस्य कः ॥

---

१. 'ति कः' क. ख. ग. घ. पाठः.

उक्षा महान् महोक्षः स्यात्

क्षीर० — महांश्चासावुक्षा च महोक्षः। 'अचतुर —' (५. ४. ७७) इत्यादिना साधुः। एवं वृद्धोक्षजातोक्षौ। मालात्र —

"महोक्षः स्यादुक्षतरः स्कान्धिकः स्कन्धवाहकः।
षोडन् षड्दशनोऽथ स्यात् कूटो भग्नविषाणकः" ॥

टीका० — अतिमहति बलीवर्दे महोक्षः। 'अचतुर —' (५. ४. ७७) इत्यादिना समासान्तोऽच् ॥

वृद्धोक्षस्तु जरद्गवः।

क्षीर० — जरंश्चासौ गौश्च जरद्गवः। 'गोरतद्धितलुकि' (५. ४. ९२) इति टच् ॥

टीका० — वृद्धोक्षद्वयं वृद्धवृषे। पूर्ववत् समासान्ताचि वृद्धोक्षः। 'गोरतद्धितलुकि' (५. ४. ९२) इति समासान्तोऽच्। जरद्गवः ॥

उत्पन्न उक्षा जातोक्षः

क्षीर० — प्रसूतमात्रो जातोक्षः ॥

टीका० — उत्पन्न उक्षा सम्प्राप्तबलीवर्दभावः, तत्र जातोक्षः। अचतुरादिना समासान्तोऽच् ॥

सद्यो जातस्तु तर्णकः ॥ ६१ ॥

क्षीर० — तृणोत्यत्ति केवलं तर्णकः ॥

शकृत्करिस्तु वत्सः स्यात्

क्षीर० — शकृत् करोति शकृत्करिः। स्तम्बशकृतोर्व्रीहिवत्सयो[1]रुपसङ्ख्यानाद् इन्। वसति वत्सः ॥

---

१. 'तोरिन्। व्रीहि' क. ख. ग. घ. पाठः.

दम्यवत्सतरौ समौ ॥

क्षीर० — दमार्हो दम्यः । वत्सत्वं तनुत्वमस्य वत्सतरः । 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' (५. ३. ९१) इति ष्टरच् । तनुत्वं द्वितीयवयःप्राप्तिः ॥

टीका० — हृष्टबाल्ये **दाम्बोडे**ति ख्याते दम्यद्वयम् । 'पोरदुपधात्' (३. १. ९८) इति यति दम्यः । 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' (५. ३. ९१) इति ष्टरचि वत्सतरः ॥

आर्षभ्यः षण्डतायोग्यः

क्षीर० — अण्डाकर्षणोचितः । **षण्ड इत्येके** । अत एव ऋषभस्य प्रकृतिरार्षभ्यः । 'ऋषभोपानहोर्ज्यः' (५. १. १४) ॥

टीका० — **षण्डतायोग्यो भविष्यत्षण्डो** वत्स आर्षभ्याख्यः । 'ऋषभोपानहोर्ज्यः' (५. १. १४) ॥

षण्डो गोपतिरिट्चरः ॥ ६२ ॥

क्षीर० — सन्यते उत्सृज्यते षण्डः । एषणमिट्, इषा चरति इट्चरः स्वेच्छाचारी । इत्वर इत्येके पेठुः ॥

टीका० — षण्डत्रयं **षण्डे** । 'षणु दाने' । 'त्रमन्ताड्डः'(उ० १. ११९) । षण्डः । '(षा ? सा)ण्डेत्रिवत्सः सोमक्रयणः' इति वेदपाठात् साण्डो गोपतिरिट्चर इति[२] युज्यते पाठ इति[३] देवेश्वरः । 'गोपतिनपुंसकयोः शण्डः' इति नामानुशासनम् । एषणम् इट्, तया चरतीत्यच् । इट्चरः ॥

स्कन्धदेशस्त्वस्य वहः

क्षीर० — वहन्त्यनेन वहः । 'गोचर—' (३. ३. ११९) इति साधुः ॥

---

१. 'ण्डं त्रिवत्सं सो' छ. ज. पाठः. २. 'ति उच्ययु', ३. 'ति वारणसेवो दे' क. ख. ग. घ. ङ. च. पाठः.

टीका० — स्कन्धप्रदेशे वहः । 'गोचरसञ्चर—' (३. ३. ११९) इत्यादिना घः ॥

सास्ना तु गलकम्बलः ।

क्षीर० — सस्ति स्वपिति वा व्याप्रियमाणत्वात्[1], सीयमानत्वात्[2] सीयते वा सास्ना। 'षस स्वप्ने', 'षोऽन्तकर्मणि' ॥

टीका० — सास्नाद्वयं गलकम्बले। 'रास्नासास्ना —'(उ० ३. १९) इत्यादिना सास्ना द्विदन्त्यसा निपातिता ॥

स्यान्नस्तितस्तु नस्योतः

क्षीर० — नासिकाया नस्तः। 'नस् नासिकाया यत्तस्क्षुद्रेषु' (वा० ६. १. ६३) इति नस्। नस्तः क्रियते स्म नस्तितः । 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चे'ति णिजन्तान्निष्ठा। नासायां कृतच्छिद्रो गौरित्यर्थः। नासिकायां भवे नस्ये नासाकृते रन्ध्रे रज्ज्वादिना ओतो गुम्फितो नस्योतः ॥

टीका० — नस्तितद्वयं नासारज्जुयुक्ते वलीवर्दे । नस्ता नासिकावयवविशेषः। 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चे'ति णिचि कर्मणि क्तः। नस्तितः। नस्यया ऊतः स्यूतो नस्योतः ॥

पष्ठवाड् युगपार्श्वगः ॥ ६३ ॥

क्षीर०— पञ्चमं षष्ठं वा वर्षं वहति पष्ठवाड् युवा गौः। 'वहश्च' (३. २. ६४) इति ण्विः। युगस्य स्कन्धकाष्ठस्य पार्श्वं गच्छति युगपार्श्वगः । हलवोढेत्यर्थः । दमनाय योजित इत्येके, लक्षणेन विलक्षणेनापि। ग्रन्थकृता वहंलिहाद्या नोक्ताः ॥

टीका० — शिक्षार्थं युगवाहितृषपार्श्वे भ्राम्यमाणे दम्ये पष्ठवाड्द्वयम् । पष्ठमग्रगामिनं वहतीति 'वहश्च' (३. २. ६४) इति ण्विः । पष्ठवाट् ॥

---

१. 'प्रा' क. पाठः. २. 'यते' क. ग. घ. ङ. पाठः.

युगादीनां तु वोढारो युग्यप्रासङ्गयशाकटाः।

क्षीर०—युगं प्रासङ्गं शकटं च वहति। 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत्। 'शकटादण्' (४. ४. ८०)॥

टीका०—युगप्रासङ्गशकटानां वोढृषु युग्यत्रयम्। जूमाळेति ख्यातो युगः। दमनार्थमदम्यानां स्कन्धे यद् वक्रं काष्ठमासज्यते, स प्रासङ्गः। 'तद् वहति रथयुगप्रासङ्गम्' (४. ४. ७६) इति यत्। 'शकटादण्' (४. ४. ८०) इत्यण्। शाकटः॥

खनन्ति तेन तद् वोढास्येदं हालिकसैरिकौ॥ ६४॥

क्षीर०—हलेन खनति। 'तेन दीव्यति—' (४. ४. २) इति ठक्। हलं वहति हलस्येदं चेति 'हलसीराट्ठक्' (४. ४. ८१, ४. ३. १२४)॥

टीका०—तेन खनतीत्याद्यर्थत्रये हालिकसैरिकौ। अयमर्थः—लाङ्गलेन खनतः लाङ्गलं वहतः लाङ्गलस्येश्वरस्य च, तथा सीरेण खनतः सीरं वहतः सीरस्येश्वरस्य च यथाक्रमं नामद्वयम्। तत्र तेन खनतीत्यर्थे 'तेन दीव्यति खनति जयति जितम्' (४. ४. २) इति ठक्, तद्वहत्यर्थे तस्येदमित्यर्थे च॥

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः।

क्षीर०—धुरं वहति। 'धुरो यड्ढौ' (४. ४. ७७)। 'खः सर्वधुरात्' (४. ४. ७८) इति योगविभागात् खः। धुरं धारयति धुरंधरः। कथञ्चित् संज्ञात्वात् खच्। धूर्धरोऽप्युक्षा स्यात्॥

टीका०—धूर्वहपञ्चकं सामान्येन यो धुरं वहति तत्र। वहतेः पचाद्यच्। धूर्वहः। 'धुरो यड्ढौ' (४. ४. ७७) इति यत्। 'न भकुर्छुराम्' (८. २. ७९) इति प्रतिषेधाद् 'हलि च' (८. २. ७७) इति न दीर्घः। धुर्यः। खः सर्वधुरात्' (४. ४. ७८) इत्यत्र ख इति योगविभागात् खः। धुरीणः। 'वाचंयमपुरन्दरौ च' (६. ३. ६९) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद् धुरंधर इति न्यासकारः। पृषोदरादित्वाद् धूर्धरोऽपीत्यन्यः॥

उभावेकधुरीणैकधुरावेकधुरावहे ॥ ६५ ॥

क्षीर०—'एकधुराल्लुक् च' (४. ४. ७९) इति खः लुक् च। लुक्पक्षे 'ऋक्पूरब्धूः—' (५. ४. ७४) इत्यच् समासान्तः ॥

टीका०—एकस्यैव रथस्य लाङ्गलस्य वा यो धुरं वहति तत्र एकधुरीणत्रिकम्। एका चासौ धूश्चेति एकधुरा। 'ऋक्पूरब्धूःपथामानक्षे' (५. ४. ७४) इति समासान्तोकारप्रत्ययः। स्त्रीत्वाट्टाप्। तां वहतीत्यर्थे 'एकधुराल्लुक् च' (४. ४. ७९) इति खः लुक् च। लुक्पक्षे 'लुक् तद्धितलुकि' (१. २. ४९) इति स्त्रीप्रत्ययनिवृत्तिः। वहेः पचाद्यच्। एकधुरावहः ॥

स तु सर्वधुरीणो[1] यो भद्रः सर्वधुरावहः[2]।

क्षीर०—'खः सर्वधुरात्' (४. ४. ७८) ॥

टीका०—यः सर्वधुरां रथसम्बन्धिनीं लाङ्गलसम्बन्धिनीं च वहति स सर्वधुरीणः। 'खः सर्वधुरात्' (४. ४. ७८) इति खः ॥

माहेयी सौरभेयी गौरुस्रा माहा[3] च शृङ्गिणी ॥ ६६ ॥

अर्जुन्यघ्न्या रोहिणी

क्षीर०—मह्यते पूज्यते माहा, तस्या अपत्यं माहेयी। सुरभ्या अपत्यं सौरभेयी। वसति क्षीरमस्यामुस्रा। शृङ्गिण्यादयः सामान्यं हित्वा विशेषे वर्तन्ते। अर्जुनी हि शुक्लगवी। न हन्त्यघ्न्या। 'अघ्न्यादयश्च' (उ० ४. ११३) इति साधुः। रोहिणी शबला। अनड्वाही गौरनड्वही च। प्रशस्ता गौर्गोमतल्लिका[4]। सुरभिर्नानार्थे ॥

टीका०—माहेयीनवकं स्त्रीगवि। मह्या भूमेरपत्यं माहेयी। 'स्त्रीभ्यो ढक्' (४. १. १२०)। एवं सौरभेयी। गोशब्द उक्तः। किरणे उस्र उक्तः।

---

१. 'न्तोऽच्। स्त्री' क. ख. घ. च. छ. ज. झ. ञ. ट ठ., 'नतः अः। स्त्री' ङ. पाठः. २. 'णः स्याद् यो हि स' ख. पाठः. ३. 'ता' ग. पाठः. ४. 'का ॥ स्या' क. पाठः,

ततष्टाप्। माहारोहिणीशब्दावुक्तौ। शृङ्गयोगात् शृङ्गिणी। अर्जुन उक्तः। स्त्रियामर्जुनी। न हन्यत इत्यघ्न्या। 'अघ्न्यादयश्च' (उ० ४. ११३) इति यक्। टाप्॥

स्यादुत्तमा गोषु नैचिकी।

क्षीर०—नीचैश्वराति नैचिकी। ठक्। 'अव्ययानां भमात्रे टिलोपो वक्तव्यः' (वा० ६. ४. १४४)। इतो गवाधिकारः प्रागुष्ट्रात्॥

टीका०—उत्तमायां गवि नैचिकी। 'निचिकं तु शिरोदेशः' इति रभसः। 'अण्प्रकरणे ज्योत्स्नादिभ्य उपसङ्ख्यानम्' (वा० ५. २. १०३) इति ज्योत्स्नाद्याणि नैचिकी। 'गौरुत्तमा तु निचिकी'ति नाममालायां संज्ञापूर्वकत्वान्न वृद्धिः॥

वर्णादिभेदात् संज्ञाः स्युः शबलीधवलादयः॥ ६७॥

क्षीर०—शबलीति 'अन्यतो ङीष्' (४. १. ४०)। धवलोऽन्तोदात्त इत्यनुदात्तत्वाभावाद् ङीष् नास्ति। आदिमादादिशब्दात् खण्डा[1]मुण्डाद्याः। द्वितीयात् कृष्णाकपिलाद्याः॥

टीका०—वर्णादीत्यादिना प्रमाणादि। तत्र शबलीधवलादयो वर्णभेदात् संज्ञाः। वामनिकादयः प्रमाणभेदात्। वक्रशृङ्गिकादयोऽवयवभेदात्। चित्रवर्णे शबली व्युत्पादिता॥

द्विहायनी द्विवर्षा गौः

क्षीर०—द्वौ हायनौ वयःप्रमाणमस्या इति आर्हीयस्य ठञः 'अध्यर्धपूर्वा—' (५. १. २८) इत्यादिना लुक्। 'दामहायनान्ताच्च' (४. १. २७) इत्यत्र 'हायनाद् वयसी'ति ङीप्। द्वे वर्षे प्रमाणमस्या द्विवर्षा। 'वर्षाल्लुक् च' (५. १. ८८), 'चित्तवति नित्यम्' (५. १. ८९)।

---

१. 'द्यादा' क. पाठः. २. 'ण्ड' ख. पाठः.

'अपरिमाणविस्ताचित—' (४. १. २२) इति ङीब् नास्ति, कालः सङ्ख्या च न परिमाणमिति ॥

टीका० — द्विसंवत्सरायां गवि द्विहायनीद्वयम्। 'दामहायनान्ताच्च' (४. १. २७) इति ङीपि द्विहायनी। द्वे वर्षे भूता द्वे वर्षे स्वसत्तया व्याप्तवती द्विवर्षा। 'तमधीष्टो भृतो भूतो भावी' (५. १. ८०) इति ठञ्। 'चित्तवति नित्यम्' (५. १. ८९) इति लुक्॥

एकाब्दा त्वेकहायनी।
चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥

क्षीर० — 'त्रिचतुर्भ्यो हायनाद् वयसि' (वा० ४. १. २७) इति णत्वम्॥

टीका० — एकवर्षायां गवि एकाब्दाद्वयम्। पूर्ववन्ङीष्॥

वशा बन्ध्या

क्षीर० — वष्टि कामयते एवं[1] वशा। बध्नाति (प्रैस्तौति?)[2] बन्ध्या, बन्धनीया वा॥

टीका० — वशाद्वयं बन्ध्यायाम्। वशोक्ता। अघ्न्यादित्वाद् यक्, उपधालोपाभावश्च। बन्ध्या॥

अवतोका तु स्रवद्गर्भा

क्षीर० — अवस्रुतं तोकमपत्यमस्याः अवतोका। 'अवस्रवन्ती[3] मृतवत्सा स्रवद्गर्भेति माला॥

टीका० — यस्याः दैववशाद् गर्भः स्रवति सा अवतोका। अवगलितं तोकमपत्यमस्या इति बहुव्रीहिः॥

अथ सन्धिनी।

---

१. 'वं शब्दाद् ब' क. ग. घ. ङ. पाठः. २. 'प्राप्नोति' ख. पाठः. ३. 'अवप्रसुवती मृ' क. ग. ङ. पाठः.

आक्रान्ता वृषभेण

क्षीर०—सन्धानं सन्धा गर्भग्रहणमस्त्यस्याः सन्धिनी। 'अदुग्धा दोहकाले तु सन्धिनी' इति कात्यः।

"सन्धिन्यङ्गुलिदुग्धा गौर्वृषाक्रान्ता च[1] सन्धिनी"

इति शाश्वतः॥

टीका०—ऋषभेण या ऋतुमती आक्रान्ता सा सन्धिनी। गर्भः सन्धीयतेऽस्यामिति सन्धिनी। दधातेर्युट्। पृषोदरादित्वान्मध्यस्याकारस्य इकारः॥

अथ वेहद्गर्भोपघातिनी॥ ६९॥

क्षीर०—विहन्ति गर्भं वेहत्[2], 'वेहृ प्रयत्ने' अस्माद्वा। 'वेहद् वृषभोपगते'ति भागुरिः॥

टीका०—अनृतावपि वृषोपगमनवशाद् यस्या गर्भपातो भवति तत्र वेहद्वयम्। 'संश्चत्पद्वेहत्' (उ० २. ८६) इति वहेरुपधेस्त्वातिप्रत्ययाभ्यां[3] वेहन्निपातिता। वृषोपगमननिमित्तो गर्भघातोऽस्यामस्तीति गर्भोपघातिनी॥

काल्योपसर्या प्रजने

क्षीर०—प्रजने गर्भग्रहणे प्राप्तकाला वृषेणोपसरणीयोपसर्या। 'उपसर्या काल्या प्रजने' (३. १. १०४) इति साधुः।

टीका०—प्रजने प्रथमगर्भग्रहणे काल्या प्राप्तकाला ऋतुमती या सा उपसर्या। कालः प्राप्तोऽस्या इति 'कालाद् यत्' (५. १. १०७) इति यत्। काल्या। उपात् सर्तेः 'उपसर्या काल्या प्रजने' (३. १. १०४) इति यत्॥

षष्ठौही बालगर्भिणी।

---

१. 'तु' क. पाठः. २. 'त् गर्भोपघातिनी। वे' ख. पाठः. ३. 'दि' क. ख. पाठः.

क्षीर० — पष्ठं वहति पष्ठौही । 'वहश्च' (३. २. ६४) इति ण्विः। 'वाहः' (४. १. ६१) इति ङीप् । 'वाह ऊठ्' (६. ४. १३२) । 'एत्येधत्यूठ्सु' (६. १. ८९) इति वृद्धिः । 'पष्ठौही कालगर्भिणी' इति सभ्याः । 'असिक्नी बालगर्भिणी'ति भागुरिः । 'मलिनी बालगर्भिणी'ति माला ॥

टीका० — या बाला प्रथमगर्भिणी च सा पष्ठौही । 'वाहः' (४. १. ६१) इति ङीप् । 'वाह ऊठ्' (६. ४. १३२) इत्यूठ् । 'एत्येधत्यूठ्सु' (६. १. ८९) इति वृद्धिः ॥

स्यादचण्डी तु सुकरा

क्षीर० — अचण्ड्यकोपनेत्यर्थः । वह्वादित्वाद् वा ङीष् । सुखेन क्रियते सुकरा । 'सुकुचे'त्यागमः ॥

टीका० — सुशीलायां गवि अचण्डीद्वयम् ॥

बहुसूतिः परेष्टुका ॥ ७० ॥

क्षीर० — परमिच्छति परेष्टुः । सकृत् प्रसूता तु गृष्टिः ॥

टीका० — बहुसूतिः भूरिप्रसवा परेष्टुकाख्या ॥

चिरसूता बष्कयिणी

क्षीर० — बस्कं(ष्यं)तेऽतिक्रामति । बस्कयश्चिरकालः औणादिकात् षत्वम् । सोऽस्त्यस्या बष्कयिणी ॥

टीका० — चिरकालप्रसूतायां गवि बष्कयिणी । मूर्धन्यषः । 'बष्कयस्त्वेकहायनो वत्स' इति शाकटायनः । तद्योगादिनिङीपौ ॥

धेनुः स्यान्नवसूतिका ।

क्षीर० — धयन्त्येनां धेनुः ॥

---

१. 'पङ्क्ती वा' ख., 'सिक्षी वा' घ. पाठः. २, ३. 'षु' ख. घ. ङ. पाठः. ४. 'ष्कर्यते' क. ग. घ. ङ. पाठः. ५. 'र' क. पाठः. ६. 'अः' ग. पाठः, ७. 'ये' ख. पाठः.

टीका० — प्रत्यग्रप्रसूतायां गवि धेनुः ॥

सुवृत्ता सुखसन्दोह्या

क्षीर० — सुशीलेत्यर्थः ॥

टीका० — सन्दानमन्तरेण या सुखेन दुह्यते सा सुव्रता ॥

पीनोध्नी पीवरस्तनी ॥ ७१ ॥

क्षीर० — पीनमूधोऽस्याः पीनोध्नी । 'ऊधसोऽनङ्' (५. ४. १३१) । 'बहुव्रीहेरूधसो ङीष्' (४. १. २५) । पीवरस्तनीति । 'स्वाङ्गाच्चोपसर्जनात्[1]—' (४. १. ५४) इति ङीष् ॥

टीका० — बृहदूधःप्रदेशायां गवि पीनोध्नीद्वयम् । पीनमूधोऽस्याः पीनोध्नी । 'ऊधसोऽनङ्' (५. ४. १३१) इत्यनङ् । 'बहुव्रीहेरूधसो ङीष्' (४. १. २५) । 'स्वाङ्गाच्चोपसर्जनात्—' (४. १. ५४) इति ङीषि पीवरस्तनी ॥

द्रोणक्षीरा द्रोणदुघा

क्षीर० — द्रोणं दोग्धि द्रोणदुघा । 'दुहः कब् घश्च' (३. २. ७०) ॥

टीका० — द्रोणपरिमितक्षीरदायिन्यां गवि द्रोणक्षीराद्वयम् । द्रोणदुग्धं प्रस्रवतीति द्रोणदुघा । 'दुहः कब् घश्च' (३. २. ७०) इति कब् घेश्चान्तादेशः ॥

धेनुष्या बन्धके स्थिता ।

क्षीर० — 'संज्ञायां धेनुष्या' (४. ४. ८९) इति साधुः । आ ऋणशुद्धेर्या बन्धके स्थापिता सा पीतदुग्धाख्या ॥

---

१. 'यां धेनुका ॥' क. ख. ङ. ठ. पाठः. २. 'व्रता सु' ख. पाठः. ३. 'त्—ङी' क. ग. घ. ङ. पाठः. ४. 'स्यां' ख., 'स्याम् इति पी' ग. पाठः. ५. 'धकारस्था' ग. पाठः. ६. 'न्धस्था' ख., 'न्धे स्था' ग. घ. ङ. पाठः.

टीका० — गौर्महिषी वा दुग्धबन्धके[1] स्थिता धेनुष्या, मूर्धन्यषा। 'संज्ञायां धेनुष्या' (४. ४. ८९) इति यत्षुगागमौ ॥

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥

क्षीर० — 'समां समां विजायते' (५. २. १२) इति खैः[2]। समां समामिति वीप्सा। विजायत इति प्रत्ययार्थः। गर्भधारणेन समावाप्य? इति 'कालाध्वनोः —' (२. ३. ५) इति द्वितीया। समां समां विजायते समांसमीना गौः। 'पूर्वपदे सुपोऽलुग् वक्तव्यः' (वा० ५. २. १२) ॥

टीका० — वर्षे वर्षे प्रसविन्[3]यां समांसमीना। समायां समायां विजायत इत्यर्थे 'समां समां विजायते' (५. २. १२) इति खः। पूर्वपदे यलोपः। परिशिष्टस्य चालुक् ॥

ऊधस्तु क्लीबमापीनं

क्षीर० — उनत्त्यूधः। आप्यायते आपीनम्। 'प्यायः पीं[4]' (६. १. २८) अनुपसर्गस्य। 'सोपसर्गान्न' (वा० ६. १. २८)। आङ्पूर्वस्यान्धूधसोर्वक्तव्यात्[5] सोपसर्गस्य। ओदित्त्वान्निष्ठानत्वम्। हुम्भारावो गवां ध्वनिः ॥

टीका० — गोस्तने ऊधोद्वयम्। ऊधः सान्तं क्लीबं दीर्घादि च। आङ्पूर्वात् प्यायेः क्तः। 'आङ्पूर्वस्यान्धूधसोः[6]' (वा० ६. १. २८) इति वक्तव्येन पीभावः। 'ओदितश्च' (८. २. ४५) इति नत्वम्। आपीनम्। अरुणस्तु पुंसि पठति ॥

समौ शिवककीलकौ।

क्षीर० — शिवात् कन्, शिनोति वा शिवकः। कील्यते बध्यतेऽस्मिन् कीलकः ॥

टीका० — गोष्ठे गवां बन्धनार्थं काष्ठे[7] शिवकद्वयम्। शिव उक्तः।

---

१. 'ने' ज. पाठः. २. 'खः ॥' क. ग. घ. ङ. पाठः. ३. 'न्यां' ग. ठ. पाठः ४. 'पी सो', ५. 'दोदि' ग. घ. पाठः. ६. 'वोदन्धू' क. ख. ग. घ. ज. ठ. पाठः. ७. 'कण्डूयना' ग. पाठः.

'कील बन्धने' । 'हलश्च' (३. ३. १२१) इत्यधिकरणे घञ् । उभयत्र स्वार्थे कः ॥

न पुंसि दाम सन्दानं

क्षीर० — दीयते रक्ष्यतेऽनेन, द्यति वा दाम। दामा स्त्री । सन्दीयते रक्ष्यतेऽनेन सन्दानं बन्धनरज्जुः ॥

टीका० — यत्रैकस्मिन् बहुप्रग्रहयुक्ते बहवो गावो बध्यन्ते, तत्र दामद्वयम् । 'दो अवखण्डने' । मनिन् । दामं । स्त्रियां(टा ? ङा)प् दामा सीमावत् । सम्पूर्वो दाञ् संयमनार्थः । करणे ल्युट् । सन्दानम् ॥

पशुरज्जुस्तु दामनी ॥ ७३ ॥

क्षीर० — 'नित्यं संज्ञाच्छन्दसोः' (४. १. २९) इति ङीप् ॥

टीका० — वत्सरूपाश्वादीनां चरणपाशो दामनी । तथाच —

"वत्सानां रोपितैः कीलैर्दामनी पाशपाशितैः"

इति हरिवंशः । दामैव दामनी । प्रज्ञादेराकृतिगणत्वादण् । क्वचित् 'पशुरज्जुस्तु बन्धनी' इति पाठः ॥

वैशाखमन्थमन्थानमन्थानो मन्थदण्डके ।

क्षीर० — विशाखासु जातो वैशाखः । 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०) । विशाखस्यायं वा । मथ्यतेऽनेन मन्थः । 'पुंसि संज्ञायां घः प्रायेण' (३. ३. ११८) । मथ्नातीति मन्थानः । ताच्छील्ये चानश् । मथिनशब्दस्य 'इतोऽत् सर्वनामस्थाने' (७. १. ८६) । 'थो न्थः' (७. १. ८७) । मन्था इत्येकत्वे । मन्थनार्थो दण्डो मन्थदण्डः । कः संज्ञायाम् । खजाकः कुण्डोऽपि ॥

टीका० — वैशाखपञ्चकं मन्थनदण्डे । 'विशाखाषाढादण् मन्थदण्डयोः' (५. १. ११०) इत्यण् । वैशाखः । करणे घञि मन्थः । मन्थानः, अद-

---

१. 'स्य' ग. पाठः. २. 'न्धर' क. ग. घ. ङ. पाठः. ३. 'वो ब' ग. घ. ङ. पाठः. ४. 'दा सं' ग. घ. पाठः. ५. 'मार्थः' क. ख. ज ठ. पाठः. ६. 'न्थ्य' ग. पाठः. ७. 'घः । म' क. ख. पाठः. ८. 'नः । चा' क. ग. घ. ङ. पाठः. ९. 'थ' ख. पाठः. १०. 'ण्डकः ।' क., 'ण्डः ॥ ख' ख. पाठः.

न्तोऽयम्। 'मन्थ विलोडने'। 'परमे कित्' (उ० ४. १०) इत्यनुवृत्तौ 'मन्थः' (उ० ४. ११) इत्यनेन सूत्रेण इनिः, स च कित्। एवं मथिन्। पथिञ्छब्दवद्रूपम्। 'अङ्गाधिकारे तस्य च तदुत्तरपदस्य चे'ति वचनाद् द्वन्द्वेऽपि 'थो न्थः' (७. १. ८७) इत्यादि कार्यम्॥

कुटरो दण्डविष्कम्भे

क्षीर०—कुटति कुटरः कुटको वा दण्डकुटके वर्तते। दण्डं विष्कभ्नाति वध्नाति दण्डविष्कम्भः, यस्मिन् बद्ध्वा मन्थ आकृष्यते। मञ्जीरोऽपि। दण्डकोटकमित्येके॥

टीका०—यत्र स्तम्भेऽवकर्षणार्थं रज्ज्वा मन्थदण्डो बध्यते तत्र कुठरः। दण्डस्य विष्कम्भो निबन्धको दण्डविष्कम्भः। मूर्धन्यषः॥

मन्थनी गर्गरी समे॥ ७४॥

क्षीर०—मथ्यतेऽस्यां मन्थनी। गिरति दधि गर्गरी। कलशी च॥

टीका०—मन्थनकुम्भिकायां मन्थनीद्वयम्। अधिकरणे ल्युटि मन्थनी। गर्गशब्दं रातीति गर्गरी, गौरादिः॥

उष्ट्रे क्रमेलकमयमहाङ्गाः

क्षीर०—उष्यते दह्यते मरावुष्ट्रः। क्रमादेलयति क्रमेलकः। मीनात्यहीन् मयः, मयते गच्छति वा। यम इत्येके।

"दासेरको दीर्घजङ्घो ग्रीवी रणकधूम्रकौ"॥

टीका०—उष्ट्रचतुष्कमुष्ट्रे। 'उष दाहे'। 'उषिखनिभ्यां कित्' (उ० ४. १६३) इति ष्ट्रन्। उष्ट्रः। 'मय गतौ'। पचाद्यच्। मयः। महान्ति अङ्गान्यस्येति महाङ्गः॥

करभः शिशौ॥

क्षीर०—कं शिरो रभते उन्नमयति करभो बालोष्ट्रः॥

---

१. 'ञि' क., 'ञी', २. 'काष्ठक' ख. पाठः. ३. 'न्थ्य' घ. ङ. पाठः. ४. 'हिं म' ख. पाठः. ५. 'मय इ' ग. घ. ङ. पाठः. ६. 'जिह्वो गीती उरणधू' ग. घ. पाठः.

टीका० — उष्ट्रशिशौ करभः । किरतेः शरभवद् अभच् ॥

करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥ ७५ ॥

क्षीर० —'शृङ्खलमस्य बन्धनं करभे' (५. २. ७९) इति कन् । विकारे 'नित्यं वृद्धशरादिभ्यः' (४. ३. १४४) इति मयटा दारुमयैरिति युक्तम् ॥

टीका० — दारुविकारैः पादबन्धनैर्लक्षिताः करभाः शृङ्खलकाख्याः । 'शृङ्खलमस्य बन्धनं करभे' (५. २. ७९) इति कन् ॥

अजा छागी

क्षीर० — अजति गच्छति व्यायामशीलत्वाद्[1] अजा । 'अजाद्यतष्टाप्' (४. १. ४) । छयति रोगान् छागी । 'जातेरस्त्रीविषयादयोपधात्[2]' (४. १. ६३) इति ङीप् । स्त्रीप्रत्ययविशेषार्थं पृथक् पाठः ॥

टीका० — अजाद्वयं छाग्याम् ॥

शुभच्छागबस्तच्छगलका अजः ।

क्षीर० — शोभते शुभः । स्त(नो?भ्नो)ति स्त(भे?भो) निघण्टुषु । बस्ते वस्तः । छयति रोगान् छागः छगलश्च । छगोऽपि ॥

टीका० — तुभपञ्चकं छागे । 'णभ तुभ हिंसायाम्' । इगुपधलक्षणः कः । तुभः । 'छो छेदने' । खञ्जवद् गन् । छागः । 'गन्ध बस्त अर्दने' । कर्मणि घञ् । बस्तः । 'छो गुक् ह्रस्वश्च' (उ० १. ११८) इति कलँः । धातोर्गुणागमो ह्रस्वश्च । छगलः । 'जनी प्रादुर्भावे' । 'जनस्तो रश्च' इत्यनुवृत्तौ 'डोऽट् च' इति डः अडागमश्च धातोः । अजः ॥

मेढोरुभ्रोरणोर्णायुमेषवृष्णय एलकाँः ॥ ७६ ॥

क्षीर० — मेहति मेढः[3] । उरु भ्रमत्युरुभ्रः[4] । उच्चैरभते वा । उः स्वरप्रतिरूपको[5] निपातः । एवमुच्चै रणोऽस्य उरणः । उरण्यति

---

१. 'त्' । अजाद्य' क. पाठः. २. 'त् । ङी' क. ग. घ. ङ. पाठः. ३. 'र्थं' क ख. पाठः. ४. 'लः । ज' क. ख. ङ. च. छ. ज. ट. पाठः. ५. 'ण्डोरभ्रो' क. 'डोरभ्रो' ग. घ. ङ. पाठः. ६. 'ण्ड' ख. पाठ. ७. 'काः ॥ एडशब्दार्थाः । मे' ख. च., 'काः ॥ एडशब्दार्थात् मे' ग. घ. ङ. पाठः. ८. 'ण्डकः । उ' क, 'डकः । उ' ग, 'ण्डः । उ' घ. पाठः. ९. 'र' क. पाठः. १०. 'को वा नि' ख. पाठः.

देवताः प्रीणातीति श्रीभोजः, कण्ड्वादिपाठात्। ऊर्णास्त्यस्योर्णायुः। 'ऊर्णाया युस्' (५. २. १२३)। मेषते वाशते मेषः। पचाद्यच्। वर्षति वृष्णिः। आ ईड्यन्तेऽनेन देवाः एडकः। हुडुश्च। अविर्नानार्थे॥

टीका०—मेण्डसप्तकं मेण्डे। उरश्रोरणौ ह्रस्वादी। ऊर्णा मेषलोम, तद्योगाद् 'ऊर्णाया युस्' (५. २. १२३)। ऊर्णायुर्दीर्घादिः। 'मिष स्पर्धायाम्'। पचाद्यच्। मेषः। 'वृषु सेचने'। 'सृवृषिभ्यां कित्' (उ० ४. ९०) इति निः। वृष्णिः। स्त्रियामेडका॥

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम्।

क्षीर०—'गोत्रोक्षोष्ट्र—' (४. २. ३९) इति वुञ्॥

टीका०—यथाक्रममुष्ट्रादिसमूहे औष्ट्रकत्रयम्। 'गोत्रोक्षोष्ट्र—'(४. २. ३९) इत्यादिना वुञ्॥

चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः॥ ७७॥

क्षीर०—चक्रमस्त्यस्य तैलिकादिचक्रभ्रमणाच्च[1] 'आसन्दीवद-ष्ठीवच्चक्रीवद्—' (८. २. १२) इति साधुः। 'चक्रवालस्तु बालेय' इति माला। बालेभ्यो हितो बालेयः। बाले बलने भवो वा। रासते रासभः। 'रास शब्दे'। गर्दति गर्दभः। 'गर्द शब्दे'। शङ्कुकर्णोऽपि। खं शब्दं राति खरः, खमस्त्यस्य वा। 'खमुखकुञ्जेभ्यो रः' (वा० ५. २. १०७)। क्रूरो वा।

"षट्त्वे पशुनामभ्यः षड्गवंमथ गोयुगं द्वित्वे"।

यथा मेषषड्गवम्। 'षट्त्वे षड्गवच्' (वा० ५. २. २९) इति वक्तव्यात् षड्गवच्। गोगोयुगम्। 'पशुनामभ्यो द्वित्वे गोयुगच्'। (वा०५. २. २९)।

"अविसोढमविमरीसं तथाविदूसं पयो मेष्याः"।

'अवेर्दुग्धे सोढदूसमरीसचः' (वा० ४. २. ३६)॥

---

१. 'आधिर्नी' क. ग. घ. ङ पाठः. २. 'वा' क. पाठः. ३. 'वम्। यथा मेषषड्गवम्। षट्त्वे षड्गवच् इति वक्तव्यात् षड्गवच्। अथ गोयुगं द्वित्वे। यथा गोगोयुगम्। 'पशुनामभ्यो द्वित्वे गोयुगच्। अविसोढमविमरीसं दुग्धं तथाविदूसमवेः। 'अवेर्दुग्धे प्रत्यया वक्तव्याः सोढदूसमरीसचः॥' क. ख. च. छ. पाठः.

टीका० — चक्रीवत्पञ्चकं गर्दभे। मतुपि चक्रीवान्। 'आसन्दीवदष्ठीवच्चक्रीवद्—' (८. २. १२) इत्यादिना चक्रीभावो निपात्यते। 'रासृ शब्दे'। 'रासिवल्लिभ्यां च' (उ० ३. १२५) इत्यभच्। रासभः। 'गर्द शब्दे'। शलभवदभच्। गर्दभः॥

वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक।
पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः॥ ७८॥

क्षीर० — विदेहे उपचये भवो वैदेहः। सार्थान् सधनान् सरतो वा पान्थान् वहति सार्थवाहः। निगमे आगमे भवो नैगमः। निगमो वणिक्पथमस्य निवासो वा। पणते वणिक्। प्रज्ञादित्वात् स्वार्थेऽण्। (वाणिजः)। आपणः प्रयोजनमस्य आपणिकः। क्रयविक्रयाभ्यां जीवति क्रयविक्रयिकः। 'वस्नक्रयविक्रयाट्ठन्' (४. ४. १३) इति सङ्घातविगृहीताट्ठन्॥

टीका० — वैदेहकाष्टकं वणिजि। वसिष्ठमुनिना राजा निमिर्ऋत्विङ्निमित्तं विदेहो भवेति शप्तः। एतन्निमित्तं विदेह इत्यस्य नामाभूत्। विदेहेन च वणिज्याशास्त्रं प्रणीतम्। अतो वणिजस्तच्छिष्याः। 'धूमादिभ्यश्च' (४. २. १२७) इति शैषिको वुञ्। वैदेहकः। सार्थं वणिक्संघातं वहति देशान्तरं प्रापयतीति कर्मण्यण सार्थवाहः। निगमः पुटभेदनं, तत्र भवो जातो वा नैगमः। पणत इति वणिक्। 'पणेरिञ्यादेश्च वः' (उ० २. ७३) इतीञिप्रत्ययः आदेश्च वः। इकार उच्चारणार्थः। वणिगेव वाणिजः। प्रज्ञादिः। पण्येनाजीवतीति पण्याजीवः। 'आञि पणिपतिखनिभ्यश्च' (उ० २. ४५) इति इकन्। आपणिकः। क्रयविक्रयाभ्यां जीवतीति क्रयविक्रयिकः। 'वस्नक्रयविक्रयाट्ठन्' (४. ४. १३)॥

विक्रेता स्याद् विक्रयिकः

क्षीर० — विक्रीणीते भाण्डेन मूल्यं गृह्णाति॥

---

१. 'चक्रीवदष्ठीवद्' क. ख. च. ज. ठ. पाठः. २. 'चित् इ' क. ख. च. छ. पाठः. ३. 'फ' क. पाठः. ४. 'तार्थाट्ठक्॥' ग. पाठः. ५. 'ह्याष्ट' क. ख. ज. ठ. पाठः.

टीका० — विक्रेतृद्वयं विक्रेतरि। तृचि विक्रेता। पूर्ववट्ठनि विक्रयिकः॥

क्रायकः क्रयिकः समौ।

क्षीर० — क्रीणाति मूल्येन भाण्डं[1] गृह्णाति क्रायकः। क्रयेण जीवति क्रयिकः॥

टीका० — क्रायकद्वयं क्रेतरि। ण्वुलि क्रायकः। 'क्रय इकन्' (उ० २. ४६) इतीकन्। क्रयिकः॥

वाणिज्यं तु वणिज्या स्याद्

क्षीर० — वणिजो भावः। ब्राह्मणादित्वात् ष्यञ्। 'दूतवणिग्भ्यां च' (वा० ५. १. १२६) इति वक्तव्यात्[2] यच्च॥

टीका० — वणिजां कर्मणि वाणिज्यद्वयम्। वाणिज्यमुक्तम्। दूत्यवद् यत्। टापि वणिज्या॥

मूल्यं वस्नोऽप्यवक्रयः॥ ७९॥

क्षीर० — मूलेनानाम्यं मूल्यम्। 'नौवयोधर्म —' (४. ४. ९१) इति यत्। वसत्यस्मिन् पण्यं वस्नः। अवक्रीयतेऽनेन अवक्रयः॥

टीका० — मूल्यत्रयं मूल्ये। पटादीनामुत्पत्तिकारणं हिरण्यं मूलं[3], तदधिकं हिरण्यं मूल्यम्। 'नौवयोधर्मविषमूल —' (४. ४. ९१) इत्यादिना यत्। अधिकत्वाद् मूलेन नाभिभूयते। मूलाद् विक्रयार्थस्याल्पत्वे[4] अभिभवनीयं स्यात्। वसतेः 'धातृवस्यज्यतिभ्यो नः' (उ० ३. ६)। वस्नः। क्लीबं चैतदित्यन्यः॥

नीवी परिपणो मूलधनं

क्षीर० — नीवीव परहस्तेऽप्यमाणत्वात्[5]। परिपण्यते वृद्ध्यर्थं प्रयुज्यते परिपणः। मूलं लाभकारणम्॥

---

१. 'ण्डं क्रा' क. ग. घ. ङ. पाठः. २. 'च्चायच्च' क. पाठः. ३. 'लं नौ' ठ. पाठः. ४. 'त्वम्' क. ख. ग. घ. ङ. च. छ. ज. ठ. पाठः. ५. 'पृ' ठ. पाठः. ६. 'स्तेर्यमा' क. ख. ग. पाठः. ७. 'त्य' ग. घ. ङ. पाठः. ८. 'भे' ख. पाठः.

टीका० — नीवीत्रयं मूलधने[1] भाण्डा इति ख्याते । निपूर्वाद् व्येञः 'नौ व्यो यलोपः पूर्वपदस्य च दीर्घः' (उ० ४. ३७) इति इण्[2]प्रत्ययः डिच्च यलोपः पूर्वपद[3]स्य दीर्घत्वम् । ङीषि नीवी । घप्रत्यये परिपणः ॥

लाभोऽधिकं फलम् ॥ ८० ॥

क्षीर० — मूलधनाद् यदधिकं निष्पन्नं, स लाभः । फलं च कालान्तरादि ॥

टीका० — मूलधनविक्रयादधिकं यद् धनं लभ्यते, स लाभः । घञन्तः ॥

परिदानं परीवर्तो नैमेयनिमयावपि ।

क्षीर० — परित्[4]त्या दानं परिदानम् । निमेये[5] परिवर्तनीये भवो नैमेयः[6] । निमानं निमयः । 'मेङ् प्रणिदाने' ॥

टीका० — प्रतिदानचतुष्कं परीवर्ते । ल्युटि प्रतिदानम् । दीर्घत्व-विकल्पात् परिवर्तोऽपि । 'मेङ् प्रणिदाने' । विपूर्वः । 'अचो यत्' (३. १. ९७) । विमेयः । प्रज्ञाद्यणि वैमेयः[7] । मित्र एरचि निमयः[8] ॥

पुमानुपनिधिर्न्यासः

क्षीर० — उप समीपे निधीयते गुप्तं स्थाप्यते उपनिधिः[9] । उप समीपे निधेर्वा । न्यस्यते निक्षिप्यते न्यासः । निक्षेपोऽपि । स्मार्ते त्वेषां भेदोऽस्ति —

"वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्पितम् ।
द्रव्यं तूपनिधिर्न्यासः[10] प्रकाश्य स्थापितं तु यत् ॥
निक्षेपः शिल्पिहस्ते तु भाण्डं संस्कर्तुमर्पितम् ।"

---

१. 'ने ।' ठ. पाठः. २. 'ङ्' ख. ग. च. ठ., 'ङ्च्प्र' क. ङ. छ. ट. पाठः. ३. 'वद् दी' क. ख. ङ. च. छ. ट. ठ. पाठः. ४. 'ददी' ज. पाठः. ५. 'का' क. ख. घ. ङ. पाठः. ६. 'वै', ७. 'वि', ८. 'वै' ख. पाठः. ९. 'भाजन' क. ख. पाठः. १०. 'तदुपधि' ग. पाठः.

टीका० — उपनिधिद्वयं **निक्षेपे** । निधिरुक्तः । उपपूर्वादुपनिधिः । 'असु क्षेपणे' । घञ् । न्यासः ॥

प्रतिदानं तदर्पणम् ॥ ८१ ॥

क्षीर० — **तस्य न्यासस्य निक्षप्त्रे प्रतीपं दानं प्रतिदानम्। परिदानमित्येके ।**

"प्रत्यक्षदानात् स्वीकारोऽवक्रयः क्लृप्तकं च तत्" ॥

टीका० — **निक्षेपार्पणे** परिदानम् । परिपूर्वो ददातिर्न्यासार्पणे ॥

क्रये प्रसारितं क्रय्यं

क्षीर० — **क्रयनिमित्तमापणे न्यस्तं क्रय्यम्। 'क्रय्यस्तदर्थे' (६. १. ८२) इति साधुः ॥**

टीका० — क्रयोऽस्य भवत्विति यद् घट्टादौ प्रसारितं वस्तु, तत् क्रय्याख्यम् । क्रीणातेः 'अचो यत्' (३. १. ९७) । 'क्रय्यस्तदर्थे' (६. १. ८२) इत्ययादेशः ॥

क्रेयं क्रेतव्यमात्रके।

क्षीर० — **यथा क्रेयो गौर्वर्तते न च क्रय्योऽस्ति ॥**

टीका० — **क्रेतव्यमात्रे** वस्तुनि न तु प्रसारिते क्रेयम् । 'अचो यत्' (३. १. ९७) ॥

विक्रेयं पणितव्यं च पण्यं

क्षीर० — **'अवद्यपण्य —' (३. १. १०१) इति साधुः ॥**

टीका० — विक्रेयत्रयं **विक्रयणीये** । 'क्रय्यस्तदर्थे' (६. १. ८२) इत्यनुपसर्गनिर्देशाद् विक्रय्यमसाधुरिति श्रीकण्ठः । पणेस्तव्यत् । पणितव्यम् । **'अवद्यपण्यवर्या —' (३. १. १०१)** इत्यादिना यति पण्यम् ॥

क्रय्यादयस्त्रिषु ॥ ८२ ॥

क्षीर० — वाच्यलिङ्गा इत्यर्थः ॥

टीका० — क्रय्यादयस्त्रिषु ॥

क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम् ।

क्षीर० — अवश्यं मयैतद् विक्रेयमिति सत्यस्य करणं **सत्यापनम्** । 'सत्यापपाश —' (३. १. २५) इति णिच् । 'अर्थवेदसत्यानामापुक्' (वा० ३. १. २५) । 'कारे सत्यागदस्य' (६. ३. ७०) इति मुम् । 'सत्यादशपथे' (५. ४. ६६) इति डाच् ॥

टीका० — **अवश्यं सत्यमिदं कर्तव्यमित्याख्याने** सत्यापनत्रयम् । 'सत्यापपाश —' (३. १. २५) इत्यादिना ण्यन्ताल्ल्युट् । सत्यापनम् । पवर्गवत् । 'सत्यापना सत्याकृतिरि'ति स्त्रीकाण्डे वोपालितः । सत्यंकार इति 'कारे सत्यागदस्य' (६. ३. ७०) इति मुम् । सत्यस्य कृतिः सत्याकृतिः । 'सत्यादशपथे' (५. ४. ६६) इति डाच् ॥

विपणो विक्रयः

क्षीर० — **विपणनं विपणः । चुरार्ध(द)न्तादच् । अन्यथा विपाणः स्यात् ॥**

टीका० — विपणद्वयं **विपणक्रियायाम्** । 'नित्यं पणः परिमाणे' (३. ३. ६६) इत्यप् ॥

सङ्ख्याः सङ्ख्येये ह्यादश त्रिषु ॥ ८३ ॥

क्षीर० — **एकाद्या दशान्ताः संख्याः सङ्ख्येये वर्तमानास्त्रिलिङ्गाः । एका शाटी एकः पटः एकं कुण्डम् । दश स्त्रियः दश पटाः दश कुण्डानि । आदशेत्यष्टादशान्ताः ॥**

टीका० — आदशं दशश्रुतिपर्यन्तम्, आ अष्टादशभ्य इति यावत् । एकादिसङ्ख्याशब्दाः सङ्ख्येयवस्तुनि वर्तमानास्त्रिषु । एतेषां च संख्यासंख्येययोः सामानाधिकरण्यं भवति । एको ब्राह्मणः एका स्त्री एकं ब्राह्मणकुलम् । दश

---

१. 'दिण्यन्ता' क. ग. घ. ङ. पाठः. २. 'शकश्रु' ग. पाठः.

ब्राह्मणाः दश स्त्रियः दश ब्राह्मणकुलानि[1] इत्यादि। एतस्य चाभिधेयलिङ्गतया त्रिष्वित्युक्तं, न तु ब्राह्मणानामित्यादिवैयधिकरण्यं भवति। 'अनश्च' (५. ४. १०८) इति समासान्ताच्चि आदशमकारान्तम्। 'आङ् मर्यादाभिविध्योः' (२. १. १३) इति समासः॥

विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः।

क्षीर० — **विंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यायां (च) नित्यमेकवचनान्ता वर्तन्ते। यद् भाष्यम्** — **'आ दशभ्यः संख्याः संख्येये वर्तन्ते[2]। अत ऊर्ध्वं संख्याने संख्येये च'। विंशतिः पटाः विंशतिः पटानाम्। शतं गावः शतं गवाम्॥**

टीका० — विंशत्याद्याः सर्व एव संख्याशब्दा बहुवचनविशिष्टसंख्येयवचना अपि एकत्ववृत्तय एव। तद् यथा विंशतिर्गावः। संख्यावचनत्वे तु गवां विंशतिः। भेदनिबन्धना षष्ठी॥

संख्यार्थे द्विबहुत्वे स्तः

क्षीर० — **संख्यामात्रेऽर्थे वर्तमानाया विंशत्यादेः[3] संख्याया द्विवचनबहुवचने अपि स्तो[4] भवतः, एकशेषात्। द्वे विंशती तिस्रो विंशतयः। गवां विंशती[5] गवां विंशतयः॥**

टीका० — यदा तु संख्यान्तरस्यार्थेऽभिधेये विंशत्यादयो वर्तन्ते, तदा द्विवचनबहुवचने अपि भवतः। द्वे विंशती तिस्रो विंशतयः। पञ्च शतानीति॥

तासु चा नवतेः स्त्रियः॥ ८४॥

क्षीर० — **विंशत्याद्या नवत्यन्ताः स्त्रीलिङ्गाः॥**

टीका० — तासु विंशत्यादिषु। आ नवतेः नवतिं व्याप्य। विंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतयो भिन्नलिङ्गै[6]नापि समानाधिकरणाः।

---

१. 'नि। अष्टादश ब्राह्मणा इ' ग. पाठः. २ 'न्ते। ऊ', ३. 'दिसं', ४. 'स्तः, ए' ख. पाठः. ५. 'षो द्वे' क. ग. घ. ङ. पाठः. ६. 'तिः' ख. घ, ङ, पाठः. ७. 'ङ्गा अपि' ग. पाठः.

स्त्रियः स्त्रीलिङ्गाः। यथा—विंशत्यां पुरुषैः विंशतिः कुण्डानि एकविंशतिः कुण्डानीति ॥

पङ्क्तेः शतसहस्रादि क्रमाद् दशगुणोत्तरम् ।

क्षीर०—द्वौ पञ्चतौ[2] पङ्क्तिर्दशाख्या । 'पङ्क्तिविंशतित्रिंशत्—'[3] (५. १. ५९) इति साधुः। दश पङ्क्तयः शतं, दश शतानि सहस्रं, दश सहस्राण्ययुतम्। इत्थं परार्धान्तान्यष्टादश गणितस्थानानि। यथाहुः—

"एकदशशतसहस्राण्ययुतप्रयुताख्यलक्षमथ नियुतम् ।
अर्बुदकोटिन्यर्बुदपद्मे खर्वं निखर्वमिति दशभिः ॥
गुणनान्महाब्जशङ्कू समुद्रमध्यान्तमथ परार्धं च ।
खहतं परार्धममितं तत्खहतं भूर्यतोऽसङ्ख्यम् ॥"

प्रयुतसंज्ञं लक्षम्। अर्बुदसंज्ञा कोटिरित्यर्थः ॥

टीका०—पङ्क्तिशब्देन दशसंख्योच्यते। पङ्क्तेः प्रभृति दशगुणोत्तरक्रमेण शतसहस्रादि। तद् यथा—दश दशगु(णं?णाः) शतं, शतं दशगुणं सहस्रं, सहस्रं दशगुणमयुतमित्यादि। तदुक्तम्—

"एकं दश शतमस्मात् सहस्रमयुतं ततः परं लक्षम् ।
प्रयुतं कोटिमथार्बुदमब्जं खर्वं निखर्वं च ॥
तस्मान्महासरोजं शङ्कुं सरितां पतिं ततस्त्वन्त्यम् ।
मध्यं परार्धमाहुर्यथोत्तरं दशगुणं तज्ज्ञाः" ॥

पौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ॥ ८५ ॥

क्षीर०—पुनातीति पोतुर्मानभाण्डशोधकः पोतवाध्यक्षाख्यः। तस्येदं पौतवम्। द्रोर्विकारो द्रुवयम्। 'द्रोश्च' (४. ३. १६१)। 'माने वयः'(४. ३. १६२)। पाति पाय्यम्। 'पाय्यसाम्नाय्य—'(३. १. १२९) इति साधुः। मीयतेऽनेनेति मानम्। पौतवं तुलादि, द्रुवयं प्रस्थादि, पाय्यं हस्तादीति गौडो भ्रान्तः ॥

---

१. 'त्या कुपु' क. ख. पाठः. २. 'कौ' क. ग. घ. पाठः. ३. 'नि तु स' ग. पाठः.

टीका०— यौतवत्रयं मानसामान्ये । केचित्तु अनन्तरं 'मानं तुलाङ्गुलिप्रस्थैरि'ति वक्ष्यति, तद्दृष्ट्या यथाक्रमं यौतवं तुलादि, द्रुवपं‡ वितस्त्यादि, पाय्यं प्रस्थादीति सम्बध्नन्ति । तन्न युज्यते । तथाच वोपालितः —

"प्रस्थः सानौ द्रुवपे चराचरे जङ्गमे भवने"

इति । यदि यथाक्रमं सम्बन्धः, तदा द्रुवपे प्रस्थ इति न स्यात् । 'यु मिश्रणे' । बहुलवचनाद् भावे 'वसेस्तुन्' (उ० १. ७८) इति तुन् । योतुः शोधनं, तदर्थतया तस्येदं यौतवं तुलादिशोधनोपाय इति यौतवाध्यक्ष इत्यध्याये चाणक्यटीकाकृतोक्तम् । द्रुर्वृक्षः, तद्विकारो द्रुवपम् । 'द्रोश्च' (४. ३. १६१) इत्यनुवृत्तौ 'माने वपः' (४. ३. १६२) इति वपः । यथाकथञ्चिद् व्युत्पत्तिरियम् । रूढशब्दोऽयम् । मीयतेऽनेनेति पाय्यम् । 'पाय्यसान्नाय्य—' (३. १. १२९) इत्यादिना ण्यद् आदिपत्वं युगागमश्च निपात्यते । एवं पवर्गादिर्द्वितालव्यश्चेत्युपदेशपरम्परा ॥

मानं तुलाङ्गुलिप्रस्थैः

क्षीर०—मिमीते मानं मीयतेऽनेन च । तत्र तुलाद्युन्मानम्, अङ्गुल्यादि प्रमाणं, प्रस्थादि परिमाणम् । यदाहुः —

"ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् सङ्ख्या भिन्ना तु सर्वतः ॥"

'संख्या बाह्या तु सर्वतः' इति पाठभेदः ॥

टीका०— तन्मानं वस्तुतस्त्रिधा, तुलाङ्गुलिप्रस्थभेदात् । तुलाग्रहणेनोन्मानाद्युपलक्ष्यते, अङ्गुल्या हस्तादि, प्रस्थेन द्रोणकादि ॥

गुञ्जाः पञ्चाद्यमाषकः ।

क्षीर०—गुञ्जा रक्तिका । आद्यो मुख्यः । 'धान्यकणा दश माषकः । तथा द्वे कृष्णले रूप्यमाषे' इति दर्शनात् । अस्मिन् कालेऽद्य इत्येके । यदाहुः—"माषकं सप्त कृष्णलाः" ॥

---

१. 'बाह्या तु', २. 'भिन्ना तु' क. पाठः. ३. 'न्यु', ४. 'न्ते' ङ. पाठः. ५. 'न' ख. पाठः. ६. 'सामकं' ङ. पाठः.

---

‡ अत्र सर्वत्र वप इत्यस्य स्थाने वय इत्येव पठितव्यं भाति ।

टीका० — पञ्च गुञ्जाः **काकचिञ्चिकाः** । आद्यः **प्रथमः**, शास्त्रीयो माषक इत्यर्थः । माषो मूर्धन्यषः । 'संज्ञायां कन्' (५. ३. ७९)। दशकृष्णलापेक्षया आद्यत्वम् ॥

ते षोडशाक्षः कर्षोऽस्त्री

क्षीर० — अक्ष्णोत्यक्षः । कर्षति कर्षः ॥

टीका० — ते माषकाः षोडश अक्षद्वयवाच्याः । अक्ष उक्तः । कृषोऽच् । कर्षः । अस्त्री ॥

पलं कर्षचतुष्टयम् ॥ ८६ ॥

क्षीर० — 'पल रक्षायाम्' ॥

टीका० — कर्षचतुष्टये पलम् ॥

सुवर्णविस्तौ हेम्नोऽक्षे

क्षीर० — सुवर्णमस्त्यस्य, अर्शआदित्वादच् । विस्यते विस्तः । 'विस उत्सर्गे'† । अक्षे[1] षोडशमाषके माने द्वौ वर्तेते। यत् स्मृतिः—

"पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥

टीका० — हेम्नोऽक्षे कर्षे सुवर्णद्वयम् । हेमजातिवचनस्तु सुवर्णशब्दः क्लीबे । विस्तः सकारतकारवान् ॥

कुरुविस्तस्तु तत्पले ।

क्षीर० — कुरुदेशे प्रसिद्धो विस्तः कुरुविस्तो हेमपलम् । यन्माला — 'पलेन हि सुवर्णस्य कुरुविस्तः' ॥

टीका० — तत्पले कुरुवि(न्दः? स्तः) ॥

तुला स्त्रियां पलशतं

क्षीर० — तोल्यते तुला । 'चिन्तिपूजि —' (३. ३. १०५) इति चकारादङ् । ङित्करणसामर्थ्याद् गुणाभावः ॥

---

१. 'क्षो' घ. पाठः. २. 'स्य' क. ग, घ. ङ. पाठः.

---

† उत्सर्ग इत्यर्थलेखनं बुसधातुभ्रान्त्या, यतो 'बिस प्रेरणे, बिस्यति' इत्येव तरङ्गिण्यां क्षीरस्वाम्याह ।

टीका० — कपित्थतुलेत्यर्थशास्त्रप्रयोगाद् यस्यकस्यचित् पलशतं तुला। 'तुल उन्माने'। चुरादिणिचोऽनित्यत्वाद् इगुपधलक्षणः कः, ततष्टाबिति धातुप्रदीपः॥

भारः स्याद् विंशतिस्तुलाः॥ ८७॥

क्षीर० — **भ्रियते भारः। पुंसां हि द्वे पलसहस्रे वोढुं शक्येते॥**

टीका० — विंशत्या तुलाभिर्भारः। भृञो घञ्। भरश्चात्र। 'भरोऽतिशयभारयोः' इति रुद्रः॥

आचितो दश भाराः स्युः शाकटो भार आचितः।

क्षीर० — **आचीयते आचितः। स च शकटेन वोढुं शक्यः। अन्ये[1] तु विंशतिपलसहस्राण्याचितमाहुः। शकटभारस्ततोऽतिरिक्तोऽप्याचित एवेति। अत एव शाकटारूयोऽप्याचित इति पुनराचितग्रहणेन द्योत्यते॥**

टीका० — दश भारा आचितम्। रूपभेदात् क्लीबम्। 'शकटभरोऽप्याचितः प्रोक्तः' इति रत्नकोषार्या। अतो दीर्घादिः[2]। 'आचितो दशभिर्भारैरि'ति पुंस्काण्डे अमरमाला। प्रसङ्गादनेकार्थतां चाचितस्याह — शकटस्य यो भारः शकटोन्मेयः सोऽप्याचितः, पुमान्॥

कार्षापणः कार्षिकः स्यात्

क्षीर० — **कर्षसंबन्धिना आपण्यते व्यवहियतेऽनेन रूप्यरूपकेण स कार्षापणः। कर्षः प्रमाणमस्य[3] कार्षिकः॥**

टीका० — सुवर्णताम्रादेः शास्त्रीयपञ्चकृष्णलो माषः। रजतस्य द्विकृष्णलः। तथाच मनुः —

"द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः"।

एवम्भूतषोडशमाषकैर्यो रजतकर्षः, तत्कृतो व्यवहारः कार्षिकः ताम्रकार्षापणः। कर्षस्यायं कार्षिकः। अध्यात्मादित्वाट्ठञ्।

"स्यात् कार्षिकः पुराणः कार्षापणमुभयतो नृशण्डत्वम्"

इति वोपालितः। अतः पुराणोऽप्यस्य[4] पर्यायः। आद्यव्यवहारे रजतकृष्णलाया

---

१. 'न्ये वि' घ. पाठः. २. 'दि' क. पाठः. ३. 'स्य स का' घ. पाठः, ४. 'णोऽस्य' क. पाठः,

दश गण्डका मूल्यं, द्वात्रिंशता च रजतकृष्णलाभी रजतकर्षः, मिलित्वा षोडशकपर्दकपणा एव मूल्यम् । अत्रैव च लोके उपचारात् पुराणकार्षापणयोः प्रयोगः ॥

कार्षिके ताम्रिके पणः ॥ ८८ ॥

क्षीर० — **ताम्रमयं कर्षप्रमाणं रूप्यं पणः । तन्मूल्यं चोपचाराद् अशीतिः श्वेतकाः ॥**

टीका० — पञ्चकृष्णलकारब्धताम्रकार्षिके पणः । साधितः प्राक् । आद्यव्यवहारेण हि पञ्चगुञ्जामाषसङ्ख्यया ताम्रपलस्याशीतिगण्डका मूल्यं, कर्षस्य च विंशतिगण्डकाः । अत्रैव च लोकैरुपचारात् पणशब्दः प्रयुज्यते । कार्षिकवत् ताम्रिकः ॥

अस्त्रियावाढकद्रोणौ खारी वाहो निकुञ्चकः ।
कुडुबः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ॥ ८९ ॥

क्षीर० — **पृथगिति एषामपर्यायत्वम् । परिमाणविशेषा एते । यदाहुः —**

"पलं प्रकुञ्चकं मुष्टिः कुडुबस्तच्चतुष्टयम् ।
चत्वारः कुडुबाः प्रस्थश्चतुष्प्रस्थमथाढकम् ॥
अष्टाढको भवेद् द्रोणो द्विद्रोणः शूर्प उच्यते ।
स च शूर्पो भवेत् खारी द्विशूर्पा गोण्युदाहृता ॥
तामेव भारं जानीयाद् वाहो भारचतुष्टयम् ।
शुष्कमेयेष्विदं मानं द्विगुणं तद् द्रवेषु तु ॥"

तत्तद्देशभेदात् सङ्ख्यान्यथात्वम् । तथाच क्वचिच्चतुराढको द्रोणः । षोडशद्रोणा खारी । विंशतिद्रोणः कुम्भः । दशकुम्भो वाहः ॥

टीका० — आढकादयः सप्त प्रत्येकं परिमाणार्थकाः । दशाङ्गुलं वा सर्वतोमानमाढकम् । अपचयविवक्षायामाढकी । चतुराढको द्रोणः । षोडशद्रोणा खारी । वाहो विंशतिखारीकः । खारीपादो मानी । मानीपादो द्रोणः । द्रोणपाद आढकः । आढकपादः प्रस्थः । प्रस्थपादः कुटवः । कुटवपादो निकुञ्चः । अयं

च प्रसृतं इति ख्यातः । इतिशब्देनाद्य(त्वे ? र्थे)न मानी । प्रवर्तिकादय आद्याः । पृथग् भेदेन परिमाणार्थवाचकाः द्रव्याणां लौहानां दारवाणां वाचकाः, न तु पर्याया इत्यर्थः । प्रवर्तिश्च खारीपञ्चकम् । तथाच गणिते —

"वाहो विंशतिखारीभिर्भरिका स्यादनेन तु ।
प्रवर्तिः पञ्चखारीभिः सस्यमानं प्रकीर्तितम् ॥
निकुञ्जं यावदाखार्याः पादं पादावशेषितम् ।
मानीद्रोणाढकप्रस्थकुटुवेषु भवेदिति ॥"

ये तून्मानार्थाः कुटुवादयः, पलचतुष्टयं कुटुवः, कुटुवैश्चतुर्भिः प्रस्थः, प्रस्थाश्चत्वार आढकः, चत्वार आढका द्रोणः, षोडश द्रोणाः खारी, विंशतिर्द्रोणाः कुम्भः, कुम्भैर्दशभिर्वाह इत्यादयः शास्त्रान्तरे परिभाषिताः, ते तुलामात्र एवान्तर्भूताः ॥

अंशस्तुरीयः पादः स्याद्

क्षीर० — रूपकादेश्चतुर्थोंऽशः पादः । 'पदरुज —' (३. ३. १६) इति कर्तरि घञ् ॥

टीका० — तुरीयो भागश्चतुर्थोंऽशः पादाख्यः । 'अंशस्तुरीयो भागः स्यादि'ति प्रमादपाठः । तथा च —

"पादा ब्रह्माङ्घ्रितुर्यांशरश्मिप्रत्यन्तपर्वताः" ।

नहि तुर्यभागोंऽशशब्दे दृश्यते ॥

अंशभागौ तु वण्टकः ।

क्षीर० — अंशतेंऽशः । भज्यते भागः । वट्यते विभज्यते वण्टकः ॥

टीका० — अंशत्रयं भागे । स्कन्धे अंश उक्तः । भजेर्घञ् । भागः । 'वटि विभाजने' । घञ् । वण्टः । स्वार्थे कन् ॥

द्रव्यं वित्तं स्वापतेयमृक्थं रिक्थं धनं वसु ॥ ९० ॥
हिरण्यं द्रविणं द्युम्नमर्थैरैविभवा अपि ।

क्षीर० — 'द्रव्यं च भव्ये' (५. ३. १०४) इति साधुः । विन्दन्त्यनेन वित्तम् । 'वित्तो भोगप्रत्ययोः' (८. २. ५८) इति साधुः ।

---

१. 'तिरि' ग. पाठः. २. 'तु माना' ठ. पाठः. ३. 'न्येतद् वि' ख. पाठः.

स्वापतेयं, 'पथ्यतिथिवसतिस्वपतेर्ढञ्' (४. ४. १०४)। ऋच्यते स्तूयते ऋक्थम्। एवं रिक्थम्। दधन्ति धनम्। वस्ते छादयति वसु, वसतीश्वरगृहे वा। ह्रियते हिरण्यम्। द्रवति द्रविणम्। द्यूयते द्युम्नम्। 'द्यु अभिगमने'। अर्थ्यतेऽर्थः। रान्त्येनां राः। स्त्रीत्येके। विभवति विभवः॥

टीका० — द्रव्यत्रयोदशकं धने। 'द्रोश्च' (४. ३. १६१) इति यत्। द्रव्यम्। 'वित्तो भोगप्रत्यययोः' (८. २. ५८) इति निपातनाद् विदेर्लाभार्थादुत्तरस्य निष्ठातो नत्वाभावः। वित्तम्। स्वपतौ धनपतौ साधु स्वापतेयम्। पाथेयवड्ढञ्। स्वागतादित्वादैज्निषेधः। 'रिचिर् विरेचने'। 'पातृतुदिवचिरिचिसिचिभ्यः क्थन्' (उ० २. ७)। रिक्थम्। 'ऋच स्तुतौ'। बाहुलकात् क्थन्। ऋक्थम्। बाहुलके नकि ऋक्नमिति गोवर्धनः। 'धन धान्ये'। अच्। धनम्। वसतेः स्वरुवद् उः। वसु। 'हर्य्य गतिकान्त्योः'। हर्य्यतेः क्यन् हिरणादेशश्च धातोः। हिरण्यम्। 'द्रुदक्षिभ्यामिनन्' (उ० २. ५३)। द्रविणम्। दिवि आम्नायत इति द्युम्नम्। 'म्ना अभ्यासे'। 'घञर्थे कविधानम्' (वा० ३. ३. ५८) इति कर्मणि क इति धातुप्रदीपः। अर्तेः कुष्ठवत् थन्। अर्थः। 'रातेर्डैः' (उ० २. ६९) इति डैः। (रै?रा:)। विभव उक्तः॥

स्यात् कोशश्च हिरण्यं च हेमरूप्ये कृताकृते॥ ९१॥

क्षीर० — कूयते शब्द्यते कोशः। कुष्यते आकृष्यते आयस्थानेभ्यः कोष इत्येके। हेम कृताकृतं घटितमघटितं च॥

टीका० — कृताकृतं हेमरूप्यं च मिलितं कोष(त्र?द्र)यवाच्यं, न तु यथाक्रमं सम्बन्धः। तथाच भागुरिः —

"कोषमाहुर्हिरण्यं च हेमरूप्यं कृताकृतम्"

इति। तत्र पिण्डीकृतमाहेरीकृतम् आदितं(?)कृतम्। आकरोत्थम्, अजातकर्म चूर्णादिरूपमकृतम्। कोशस्तालव्यशो मूर्धन्यषश्चेत्युक्तं प्राक्। अनेकार्थोऽयम्॥

---

१. 'पि' क. ङ. ठ, पाठः. २. 'हा' ङ., 'भरणीकृ' ङ. पाठः.

ताभ्यां यदन्यत् तत् कुप्यं

क्षीर० — हेमरूप्याभ्यामन्यत् ताम्रादि । गोपनीयं कुप्यम् । 'राजसूयसूर्यमृषोद्यरुच्यकुप्य —' (३. १. ११४) इति साधुः ॥

टीका० — ताभ्यां हेमरूप्याभ्यां यदन्यत् तैजसं द्रव्यं ताम्रकांस्यादि यच्चातैजसं राजपट्टदारुवि(षया ? षा)दिकम् असारद्रव्यं, तत् सर्वं कुप्यम् । तथाहि — कुप्याध्यक्षप्रचारे लोहवर्गश्चर्मवर्गो विषादिवर्गश्च दर्शितः । 'कुप्यमसारं[1] द्रव्य'मिति तट्टीकाकृतश्च[2] । 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथाः' (३. १. ११४) इति गुपेः क्यप् आदिकत्वं च निपात्यते । कुप्यम् ॥

रूप्यं तद्भयमाहतम् ।

क्षीर० — रूपमाहन्यते स्म रूप्यम् । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) । द्वयं कुप्याकुप्यम्[3] ॥

टीका० — तद्भयमिति हेमरूप्यम् आहतं च परापरपुरुषरूपमुत्थापयितुं निघातिकया[4] ताडितं दीनारादिकं रूप्यशब्दवाच्यम् । 'रूपादाहतप्रशंसयोर्यप्' (५. २. १२०) इति यप् ॥

गारुत्मतं मरतकमश्मगर्भो हरिन्मणिः ॥ ९२ ॥

क्षीर० — गरुत्मत इदं जातं विषं हन्तुं गारुत्मतम् । मरं * तकन्त्यनेन मरतकम्[5] । अश्मनो गर्भोऽश्मयोनिः । हरिन्नीलवर्णो[6] मणिः ॥

टीका० — गारुत्मतचतुष्कं मरतके[7] । गरुडप्रभवत्वाद् गारुत्मतम् ॥

शोणरत्नं लोहितकः पद्मरागः

---

१. 'रं, कुद्र' ग. ङ. पाठः. २. 'तु टीका' क. पाठः. ३. 'रू' घ. ङ. पाठः. ४. 'प्यं प' ग. ठ. पाठः. ५. 'नि' ठ. पाठः. ६. 'कतम्' क. ग. घ. पाठः. ७. 'लो म' ख. पाठः. ८. 'भत्वा' क. ख. ङ. पाठः.

---

* 'तक सहने । हसन इति दुर्गः ।' इति क्षीरतरङ्गिणी ।

क्षीर० — शोणं च तद् रत्नं च । लोहितं एव लोहितकः[1] । लोहितान्मणौ' (५. ४. ३०)। कन् ॥

टीका० — शोणरत्नत्रयं पद्मरागे । लोहितो मणिर्लोहितकः । 'लोहितान्मणा' (५. ४. ३०) इति कन् ॥

अथ मौक्तिकम् ।

मुक्ता

क्षीर० — विनयादित्वात् स्वार्थे[3] वा ठक् ॥

टीका० — मौक्तिकद्वयं मुक्तायाम् । विनयादित्वात् स्वार्थे ठकि मौक्तिकम् ॥

अथ विद्रुमः पुंसि प्रवालं[4] पुन्नपुंसकम्[5] ॥ ९३ ॥

क्षीर० — विशिष्टो द्रुमो विद्रुमः, विद्रवत्यर्थान् । प्रवते प्रवलते वा(र्थे ? ब्धेः) ऊर्ध्वे प्रवाल[6]म् ।

"सूर्यकान्तस्त्वग्निमणिर्वैदूर्यं वालवायजम्" ॥

टीका० — विद्रुमद्वयं प्रवाले ॥

रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ।

क्षीर० — रमन्तेऽस्मिन् रत्नम् । मण्यते शब्द्यते मणिः । पुंस्त्रीलिङ्गः । अश्मजातीयं मरतँकेन्द्रनीलादि । आदिशब्दाद् विद्रुमादि[7] वज्रपद्मरागादि वा पानीयभाण्डत्वात् ॥

टीका० — अश्मजातौ मरतकपद्मरागस्फटिकादौ मुक्तावज्रादौ च रत्नद्वयम् । 'रमेस्त च' (उ० ३. १४) इति तः नोऽन्तादेशश्च । रत्नम् ॥

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ॥ ९४ ॥

---

१. 'तमेव', २. 'कम् । ', ३. 'र्थे ठ' ख. पाठः. ४. 'लः', ५. 'कः ॥', ६. 'लः ।' क. पाठः. ७. 'कतेन्द्र' क. ख. पाठः. ८. 'दि प' क. पाठः.

तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्बुरम् ।
चामीकरं जातरूपं महारजतकाञ्चने ॥ ९५ ॥
रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ।

क्षीर० — शोभनो वर्णोऽस्य स्वर्णम् । समासे वर्णस्य(वा)वलोपमाहुः । यथा पञ्चार्णो मन्त्रः । कनति कनकम् । 'कन दीप्तौ' । हिनोति हेम । हटति हाटकम् । 'हट दीप्तौ' । ण्वुल् । तप्यते तपनीयम् । शतकुम्भे[1] गिरौ भवं शातकुम्भम् । शातकौम्भमित्येके । तत्पक्षे अनुशतिकादित्वादुभयपदवृद्धिः । गङ्गाया[2] अपत्यं गाङ्गेयम् । भ्रियते[3] भार्यते वा भर्म । कर्बति लोहमध्ये[4] दृप्यति कर्बुरं नानारूपं वा । चमीकरकृतस्वरावाकरौ । भवेऽण् । जातरूपम् अकृतकरूपं कुङ्कुदेशजम्[5] । महच्च तद्[6] रजतं रञ्जकम्[7] । कञ्चति काञ्चनम् । 'काचि दीप्तौ' । रोचते रुक्मम्[8] । जम्बूर्नदे[9] जम्बूफलरसोत्थे[10] नदे[11] जातं जाम्बूनदम् । अष्टासु लोहेषु पदं प्रतिष्ठास्याष्टापदम्[12] । 'अष्टनः संज्ञायाम्' (६. ३. १२५) दीर्घः । कल्याणम् अर्जुनं कलधौतं गैरिकं भूरिचन्द्रं वसु च ॥

टीका० — स्वर्णादय एकोनविंशतिः[13] **स्वर्णे** । सुष्ठु दीप्यत इति स्वर्णम् । 'ऋणु दीप्तौ' । पचाद्यच् । शोभनं वर्णमस्येति सुवर्णम् । 'कनी[14] दीप्तौ' । क्वुन् । कनकम् । हिरण्यमुक्तम् । 'हि गतौ' । मनिन् । हेम । 'हट दीप्तौ' । ण्वुल् । हाटकम् । तपनं दाहमर्हतीति तपनीयम् । 'अर्हे कृत्यतृचश्च' (३. ३. १६९) इत्यनीयर् । शतकुम्भपर्वते भवं शातकुम्भम् । गङ्गायामग्निना न्यस्तस्य माहेश्वरबीजस्य तत्त्वेन भूतत्वाद् गाङ्गेयम् । 'शुभ्रादिभ्यश्च' (४. १. १२३) इति ढक्[15] ।

"यं गर्भं सुषुवे गङ्गा पावकाद् दीप्ततेजसम् ।
त(दर्थं ? दुल्बं) पर्वते न्यस्तं हिरण्यं समपद्यत ॥"

---

१. 'म्भ', २. 'ते भ' ग. पाठः. ३. 'ते भ' क. ख. घ. ङ. पाठः. ४. 'ध्ये क' क. पाठः. ५. 'क' घ. ङ. पाठः. ६. 'द् रञ्ज' क. ग. घ. ङ. पाठः. ७. 'ग्म' ख. ग. घ. ङ. पाठः. ८. 'द्रीपे ज' ङ. पाठः. ९. 'दीजं ज' क. पाठः. १०. 'त्थ', ११. 'धां' क. ङ. पाठः. १२. 'ऊन' ज. पाठः. १३. 'नि' ङ., 'न' ज. पाठः. १४. 'कृ । भृ' ठ. पाठः.

इति वायुपुराणे । भृञो मनिन् । भर्म । कर्बुरमुक्तम् । जातं रूपमस्येति जातरूपम् । 'कचि दीप्तिबन्धनयोः' । कर्तरि ल्युट् । पृषोदरादिदीर्घत्वम् । काञ्चनम् । रोचतेः युग्मवद् मक् । रुक्मम् ।

"स्थगयन्त्यमूः शमितचातकार्तस्वरा
जलदास्तटित्तुलितकान्तकार्तस्वराः ।" (स० ४. श्लो० २४)

इति माघयमकात् कार्तस्वरं दन्त्यसम् । जम्बूरसनिःष्यन्दप्रसवा नदी जम्बूनदी, तत्र जातं जाम्बूनदम् । अष्टौ पदान्युत्पत्तिस्थानान्यस्येत्यष्टापदम् । 'अष्टनः संज्ञायाम्' (६. ३. १२५) इति दीर्घः ॥

अलङ्कारसुवर्णं यच्छृङ्गीकनकमित्यदः ॥ ९६ ॥

क्षीर० — शृङ्गचलङ्कारकारिका, तदर्थं कनकम् ॥

टीका० — कनककुण्डलादेरलङ्कारस्य सुवर्णे शृङ्गीकनकं, केवलश्च शृङ्गीशब्दः । तथाच 'भूषणकनकं शृङ्गी'ति नाममाला । ह्रस्वान्तोऽपि शृङ्गिशब्दः । तथाच बाणः—

"वर्षसमूहमिवान्तःस्थितापरिमाणशृङ्गिहेमकूटम्"

राजकुलमिति सम्बन्धः । अद इति, एतत् ॥

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ।

क्षीर० — दुर्वर्णं सुवर्णापेक्षया । रज्यते हेम्ना रजतम् । रुप्यति रूप्यम् । 'रुप लुप विमोहने' । खर्जति खर्जूरम् । 'खर्ज व्यथने' । इतिशब्दात् सितादि । अपिशब्दात् तारं कलधौतं च ॥

टीका० — दुर्वर्णपञ्चकं रूप्ये । स्वर्णापेक्षया निन्दितं वर्णमस्येति दुर्वर्णम् । 'पृषिरञ्जिभ्यां कित्' (उ० ३. १११) इत्यतच् । रजतम् । शब्दत्रयं व्युत्पादितम् ॥

रीतिः स्त्रियामारकूटो न स्त्रियाम्

क्षीर० — रीयते स्रवति रीतिः । इयर्त्यारः, तस्य कूटं पित्तलाख्यम् । आरोऽपि । कपिलोहं च ।

---

१. 'ग्म' क. ग. पाठः. २. 'दी, त' ङ. पाठः. ३. 'द्र', ४. 'र्त्यन्यत्तामारः' क. ग. पाठः. ५. 'रू' क. पाठः.

"ब्राह्मी पिङ्गा ब्रह्मरीतिः कांस्यं लोहो द्विलोहकम्" ॥

टीका० — रीतिद्वयं पित्तले । 'री गत्यादौ' । क्तिन् । रीतिः । रेफोपधापीत्यन्यः ॥

अथ ताम्रकम् ॥ ९७ ॥

शुल्बं म्लेच्छमुखं ब्रघ्नवरिष्ठोदुम्बराणि च ।

क्षीर० — ताम्यति ताम्रम् । स्रवति द्रवति शुल्बम् । म्लेच्छदेशो मुखमुत्पत्तिरस्य । द्वे हेमरूप्ये अश्नुते ब्रघ्नम् । अतिशयेन वरं वरिष्ठम् । कालिकानिवृत्तं[1] स्वर्णं हि तत् । अत एवोदुम्बरम् । उद्भूताम्बरमिति नैरुक्ताः । औदुम्बरमित्येके । रक्तधौतकं च ।

"सौराष्ट्रकं पञ्चलोहे वर्तलोहे तु वर्तकम्" ॥

टीका० — ताम्रषट्कं ताम्रे । आम्रवत् ताम्रम् । 'शुच शोके' । 'उल्वादयश्च' (उ० ४.९६) इति बन्, लत्वं, गुणाभावः । शुल्बम् । म्लेच्छमुखं समुदितं नाम । वरिष्ठं टवर्गद्वितीयान्तम् । 'औदुम्बरं च ताम्रमि'ति नाममालायांपाठादौ कारवदौदुम्बरम् ।

"उच्यते गैरिकं धातुस्ताम्रं शुल्बमुदुम्बरम्"

इति हलायुधः ॥

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ॥ ९८ ॥

अश्मसारः

क्षीर० — लुनाति लोहं, 'लुह कत्थनादौ' वा । शस्यतेऽनेन शस्त्रम् । 'शसु हिंसायाम्' । तेज्यते तेजयति वा तीक्ष्णम् । शस्त्रान्तरच्छेदकत्वात् । वैकृत्तिकाख्यं[2] तत् । 'तिज निशाने' । पिण्ड्यते पिण्डम् । कालं च तदयः कालायसम् । 'अनोऽश्मायः—'(५. ४. ९४) इति टः । अयते भेद्यमयः । अश्मनः सारोऽश्मसारः । यत् स्मृतिः — "अश्मभ्यो लोहमुत्थितम्" । पारशवं घनं च ॥

---

१. 'शु' 'ख. पाठः. २. 'वृ' ग. घ. ङ. पाठः. ३. 'न्ताख्यं' ख., 'तका' ग, घ, ङ. पाठः,

टीका० — लोहसप्तकं लोहे। रुहेर्घञि लत्वे च लोहोऽस्त्री। शस्त्रमुक्तम्। स्वार्थिकोऽत्र कन्। तीक्ष्णपिण्डशब्दावुक्तौ। कालं च तदयश्चेति कालायसम्। 'अनोऽश्मायस्सरसां जातिसंज्ञयोः' (५. ४. ९४) इति समासान्तष्टच्। इणः 'असुन्' (उ० ४. १९०) इत्यसुनि अयः। अश्मनः सारोऽश्मसारः। अमरमालायामश्मसारं क्लीबम्॥

अथ मण्डूरं सिंहानमपि तन्मले।

क्षीर० — मण्डते मण्डूरम्। हिनस्ति सिंहानम्। ध्मायमानस्यायसो मलम्॥

टीका० — तन्मले लोहमले मण्डूरद्वयम्। खर्जूरवन्मण्डूरम्। 'शिघि आघ्राणे'। 'आनकच् शीङ्भियः' (उ० ३. ८२) इत्यनुवृत्तौ '(आ?) शिङ्घिधाञ्भ्यश्च' (उ० ३. ८३) इत्यानकच्। शिङ्घाणकः। पृषोदरादित्वात् कलोपः॥

सर्वं स्यात् तैजसं लोहं

क्षीर० — तेजसो विकारस्तैजसम्। हेमाद्यपि लोहम्। यदाहुः—

"सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु।
सीसं च (च?त) मरं चैव अष्टौ लोहानि चक्षते॥"

शस्त्रं तु विशेषाल्लोहम्॥

टीका० — सर्वं च तैजसं सुवर्णरजतताम्रारकूटकांस्यरङ्गसीसकायोरूपमष्टविधं लोहाख्यम्। तेजोऽस्मिन् विद्यत इति तैजसम्। 'अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम्' (वा० ५. २. १०३) इत्यण॥

विकारस्त्वयसः कुशी॥ ९९॥

क्षीर० — कुत्सितं श्यति कुशी फालः। यच्छाश्वतः— 'कुशो दर्भः कुशी फालः'। 'जानपदकुण्डगोण —' (४. १. ४२) इत्ययोविकारे कुशाद् ङीष्॥

---

१. 'रे ङी' ख. पाठः.

टीका० — फालात्मकेऽयोविकारे कुशी । (तया वन्दयो विकारो!) 'जानपदकुण्डगोण —' (४. १. ४२) इत्यादिना ङीष् ।

"कुशा वल्गा कुशी फालः कुशो दर्भः कुशं जलम्"

इति व्याडिः ॥

क्षारः काचः

क्षीर० — क्षरति गलति क्षारः । कचति काचः ॥

टीका० — काचाख्ये मृत्तिकाविशेषे क्षारद्वयम् । 'क्षर सञ्चलने' 'कच बन्धने' । घञ् ॥

अथ चपलो रसः सूतश्च पारते ।

क्षीर० — चपलोऽस्थैर्यात् । रस्यते रसायनार्थिभी रसः । सूते हेमायुषी सूतः, शिवात् प्रसूतो वा । पिपर्ति पारतं, पारं तनोति वा ॥

टीका० — चपलचतुष्कं पारदे । शब्दत्रयं साधितम् ।

"रसेन्द्रः पारदः प्रोक्तः पारतोऽपि निगद्यते"

इति तारपालः ।

"पारतस्तु मनाक् पाण्डुः सूतस्तु स सितो मनाक् ।
शीतः सर्वे तुल्यगुणाः स्मृताः"

इति शब्दार्णवः ॥

गवलं माहिषं शृङ्गम्

क्षीर० — गा अलति वारयत्यनेन गवलं, गवते वा ॥

टीका० — महिषशृङ्गे गवलः ॥

अभ्रकं गिरिजामले ॥ १०० ॥

क्षीर० — अभ्रप्रतिकृतिरभ्रकम् । गिरिजं च तदमलं च गिरिजामलम् । गौर्या मल इति धातुविदः ॥

टीका० — अभ्रकत्रयम् अभ्रके[1] । गिरौ जातं गिरिजम् । अमलमुक्तम् ॥

स्रोतोञ्जनं तु सौवीरं कापोताञ्जनयामुने ।

क्षीर० — अज्यतेऽक्ष्यनेनाञ्जनं[2], यमुनास्रोतसो जातम् । सुवीरदेशे भवं सौवीरम् । कपोतवर्णं कापोताञ्जनम् । यमुनास्रोतसो जातं यामुनम् । धन्वन्तरिस्तु —

"अञ्जनं मेचकं कृष्णं सौवीरं स्यात् सुवीरजम् ।
कापोतकं यामुनं च स्रोतोञ्जनमुदाहृतम्" ॥

टीका० — स्रोतोञ्जनचतुष्कं स्रोतोञ्जने । नदीस्रोतोभवत्वात् स्रोतोञ्जनं, राज्यन्धोपयुक्तम् । काञ्जिके सौवीरमुक्तम् । एतत् पार्वतेयम् । अल्पभेदत्वादभेदः । कपोताख्यमञ्जनं कपोताञ्जनम् । यमुनाभवं यामुनम् ॥

तुत्थाञ्जनं शिखिग्रीवावितुन्नकमयूरकम् ॥ १०१ ॥

कर्परी

क्षीर० — तुदत्याक्षिरोगांस्तुत्थम् । शिखिग्रीवं मयूरग्रीवाभम् । वितुदति रोगान् वितुन्नकम् । मयूरप्रतिकृतिर्मयूरकम् । कल्पते रोगान् जेतुं कर्परी ॥

दार्विकाक्काथोद्भवं तुत्थरसाञ्जनम् ।
रसगर्भं तार्क्ष्यशैलं

दारुहरिद्राक्काथोत्थं, तुत्थं च तद् रसाञ्जनम् । दार्वी[3]रसस्य गर्भो रसगर्भम् । तार्क्ष्यशैले कुलूतीयां भवम् । रसजातं रसाख्यं च ॥

टीका० — तुत्थाञ्जनचतुष्कं पुषातुत्थाञ्जनमिति ख्याते । 'तुद व्यथने' ।

---

१. 'आभ्र इति ख्याते । गि' ज., 'आह इति ख्याते । गि' ङ. पाठः. २. 'त ईक्ष्यतेऽन' ख. ग. घ. ङ. पाठः. ३. 'वींकर' क. ङ. पाठः. ४. 'का' ख. पाठः.

'पातृतुदिवचि—' (उ० २. ७) इत्यादिना क्थः। तुत्थं तदञ्जनं चेति तुत्थाञ्जनम्। मयूरकण्ठाभत्वाच्छिखिग्रीवम्। तुदेः क्तादि। वितुन्नकम्। **तस्मिन् तुत्थे काथोद्भवे आवर्तिते** कर्परीद्वयम्।

"तुत्थाञ्जनं काथोद्भवं कर्परीदार्विके स्त्रियौ"

इति रभसश्च। तुत्थ इति ख्याते तुत्थाञ्जनम्। नामद्वयमित्यन्यः। रसाञ्जनत्रयं **रसाञ्जने** ॥

गन्धाश्मनि तु गन्धिकः ॥ १०२ ॥

सौगन्धिकं[3] **च**

क्षीर०—**गन्धोऽस्यास्तीति गन्धिको गन्धपाषाणः। रसगन्धी गन्धकोऽयम्। सौगन्धिकं च** ॥

टीका०—गन्धाश्मत्रयं गन्धके। मत्वर्थीयठनि गन्धिक इत्य(प?पि) पाठः। तेन जयतीति ठकि सौगन्धिको ना।

"गन्धको गन्धपाषाणः पामघ्नश्च सुगन्धकः"

इति माधवः ॥

चक्षुष्याकुलाल्यौ तु कुलस्थिका।

क्षीर०—**चक्षुषे हिता चक्षुष्या दृक्प्रसादाख्या। कुलमलति कुलाली। कुले तिष्ठति कुलस्था कुलस्थप्रतिकृतिर्वा। लोकोक्तौ तार्क्ष्य-कुल्या। आह च—**

"कुलाली लोचनहिता दृक्प्रसादा कुलत्थिका" ॥

टीका०—**कुलस्थाकारप्रस्तरेऽञ्जनविशेषे** चक्षुष्यात्रयम्। 'शरीरावयवाद् यत्' (५. १. ६) इति यति चक्षुष्या। कुलालीत्यर्थग्रहणम्। तेन कुम्भकारीत्यपि।

---

१. 'त्थाञ्जनाञ्ज' ज. पाठः. २. 'न्ध', क. पाठः. ३. 'कं च ग' ख. पाठः. ४. 'न्ध' क. पाठः. ५. 'न्धी च' क. ग. घ. ङ. पाठः. ६. 'त्थि' ङ. पाठः. ७. 'स्थिका कु' ख. पाठः. ८. 'त्थ' क. ग. घ. ङ. पाठः. ९. 'क' ङ. पाठः.

"चक्षुष्या कुम्भकारी च कुलाली च कुलस्थिका"

इति रत्नमाला च ॥

रीतिपुष्पं पुष्पकं तत् पौष्पकं कुसुमाञ्जनम् ॥ १०३ ॥

क्षीर० — रीतेर्म्रायमानस्य पुष्पाभं मलं रीतिपुष्पम् । पुष्पप्रतिकृतिः पुष्पकम् । पक्षे स्वार्थेऽण् ॥

टीका० — रीतिपुष्पचतुष्कं **कुसुमाञ्जने** । रीतिः पित्तलं, तस्याः पुष्पं रजः, मलमिति यावत् । तथाच योगशतकव्याख्याने सनातनैः — 'रीतिकायां ध्माय्यमानायां यदुत्पद्यते मलं, तत् पुष्पाञ्जनमि'ति । पुष्पकमित्येव नाम ॥

पिञ्जरं पीतनं तालमालं च हरितालके ।

क्षीर० — 'पिजि हिंसादौ' । पीयते पीतनं, पीतं वर्णं नयति वा । आलाति शोभामालम्, अलति भूषयति वा । हरेः पीतवर्णस्य तालं[1] प्रतिष्ठास्मिन् हरितालं, हरितमलयति भूषयति वा । तालं च भीमवत् । यद् धन्वन्तरिः —

"हरितालं तु मोदन्तं पीतकं तटमण्डनम् ।
आलं च तालं जैरं च पिञ्जरं विस्रगन्धिकम् " ॥

टीका० — पिञ्जरपञ्चकं **हरितालके** ॥

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु ॥ १०४ ॥

क्षीर० — गिरेरिदं गैरेयम् । अर्थ्यते रसायनार्थिभिरर्थ्यम् । शिलातः स्रवज्जत्वाकृति शिलाजतु ॥

टीका० — गैरेयपञ्चकं **शिलाजतुनि** । एतच्च वानरैर्भक्षिते तद्विष्ठायामौत्तरापथिकैः प्राप्यते । 'इतश्चानिञः' (४. १. १२२) इति ढकि गैरेयम् । 'धर्मपथ्यर्थन्यायादनपेते' (४. ४. ९२) यकि अर्थ्यम् । पाषाणजातत्वादश्मजम् ॥

बोलो गन्धरसप्राणपिण्डगोपरसाः समाः ।

---

१. 'त' क. ग. पाठः.

क्षीर०—वोल्यते बोलः। 'बुल निमज्जने'। गन्धप्रधानो रसोऽस्य गन्धरसः। प्राणित्यनेन प्राणः। पिण्ड्यते द्रव्यान्तरैः। पिण्डसहत्वात् पिण्ड इत्येके। गां पाति रसोऽस्य गोपरसः। गोपो रसो भीमवत्। गोशशशाः समा इत्येके। गां श्यति गोशः। शशते शशः॥

टीका०—बोलषट्कं गन्धरसे। प्राणपिण्डशशा उक्ताः। गोसो दन्त्यसः॥

डिण्डीरोऽब्धिकफः फेनः

क्षीर०—डिण्डीति शब्दमीरयति डिण्डीरः। दादिर्वा[1]। डिर्डा-डिमवत्। अब्धेः कफ इवाधिक्ये बहिःप्रसरादब्धिकफः सागरमलाख्यः। नद्यास्तूपचारात्। स्फायते फेनः॥

टीका०—हिण्डीरत्रयं समुद्रफेने। 'हिडि गत्यनादरयोः'। 'कृगृ-शृ—' इत्यादिना बहुलवचनादीरनि हिण्डीर इति गोवर्धनीयोणादिवृत्तिः। रूपरत्नाकरे तु 'खादे रः, इड्(भ्य?), हिण्डेरादेश्च डः' इति रप्रत्यये इटि डत्वे च डिण्डीरः। 'टिण्डीरापिण्डपरिमण्डिते'त्यादिप्रयोगो बृहत्कथायाम्। पैशाचिके हि टवर्गस्यैव टकारादेशो भवति॥

सिन्दूरं नागसम्भवम्॥ १०५॥

क्षीर०—सिनोति बध्नाति चेतः सिन्दूरं, (सिन्दय?स्यन्द)ते वा। नागात् सीसात् सम्भवोऽस्य नागसम्भवम्। चीनपिष्टं गन्धपङ्कोऽपि। धन्वन्तरिस्तु—

"सिन्दूरं रक्तरेणुश्च नागरक्तं च नागजम्।
शृङ्गारभूषणं श्रीमद्वसन्तोत्पलमण्डनम्॥
हंसपादो हिङ्गुलके"॥

टीका०—सिन्दूरद्वयं सिन्दूरे। 'स्यन्देः संप्रसारणं च' (उ० १. ६८) इत्यूरन्। सिन्दूरं दन्त्यसम्॥

---

१. 'ण्डं संहतत्वा' ख. पाठः. २. 'व्यांडिः। दाडि' च. पाठः. ३. 'डि' ठ. पाठः. ४. 'गान्धारप' क. पाठः.

नागसीसकयोगेष्टवप्राणि

क्षीर० — न न गच्छति चलत्वान्नागम्। सिनोति बध्नाति पारतं सीसकं, सीसपत्रं च। हेम्नो वर्णोत्कर्षार्थं योगे श्लेषे इष्टं योगेष्टम्। उप्यते वप्रम्। हेम्नो वर्णोत्कर्षे बीजत्वात्॥

त्रपु पिच्चटम्।

रङ्गवङ्गे

त्रपत इवाग्नेराशुद्रुतेस्त्रपु। पिच्च्यते कुट्यते पिच्चटम्। रज्यतेऽनेन रङ्गम्। वङ्गति द्रवति वङ्गम्। आलीनमपि॥

टीका० — नागषट्कं सीसकं।

"श्रेष्ठे च कट्वुजे नागः क्लीबं सीसकरङ्गयोः"

इत्यनेकार्थः। सीसमेव सीसकं द्विदन्त्यसम्। योगेष्टमित्येकं नाम। 'बेद्रो नागं सीसपत्रकम्' इत्यमरमाला।

"स्यादारकूटो रीतिश्च सीसकं त्रपु बन्धकम्।
नागं महाबलश्चैव योगेष्टं वसुनेष्टकम्॥"

इति व्याडिः।

"सीसपत्रं बहुमलं योगेष्टं पिष्टपिच्चटे।
.....रङ्गसीसकयोस्त्रपु॥"

इति रुद्रः। वसुवत् त्रपु। 'पिच कुट्टने'। 'शकादिभ्योऽटन्' (उ० ३. ८२) इत्यटन्। पिच्चटम्। रङ्गद्वयं रङ्गे। 'रगिवगी गत्यर्थौ'। पचादी। त्रपुचतुष्टयमेव रङ्ग इत्यन्यः॥

अथ पिचुस्तूलः

क्षीर० — पिच्यते सूत्रमस्मात् पिचुः, पियति वा। 'पिचु गतौ'। तूल्यते फलात् तूलः। 'तूल निष्कर्षे'। निर्बीजकार्पासोऽयम्। 'रङ्गवङ्गेऽथ पिचु(रिःल इ)ति प्रगृह्यसंज्ञाविस्मृतेः पाठः॥

---

१. 'ते विकु' ग. पाठः. २. 'पत्रोर्णा सी' क. पाठः. ३. 'पिचय' ख. पाठः. ४. 'बीज' ख. पाठः. ५. 'ङ्गे अथ' क. पाठः.

टीका० — पिचुद्वयं कार्पासादितूलके। 'पिचु मर्दने'। बाहुलक उः। तुः सौत्रः। 'शूलादयश्च' इति क्लः दीर्घत्वं च। तूलः। पिचुतूल इति संघातोऽपि ॥

"तूलः पिचुः पिचुतूलस्तर्कटी सूत्रतर्ककः"

इति रभसः ॥

अथ कमलोत्तरम् ॥ १०६ ॥

स्यात् कुसुम्भं वह्निशिखं महारजनमित्यपि।

क्षीर० — कमलेभ्य उत्तरं वर्णाधिक्यात् कमलोत्तरम्। कुस्यति कुसुम्भम्। 'कुसु श्लेषणे', कौ सुम्भ्यते (निकुञ्च्यते ?) वा। कुसिः सौत्रः (?)। वह्नेरिव शिखास्य वह्निशिखम्। महच्च तद् रजनं, रज्यतेऽनेनेति रजनरजकरजस्त्रूपसंख्यानान्नलोपः ॥

टीका० — कमलोत्तरचतुष्कं कुसुम्भे वस्त्ररञ्जनद्रव्ये। 'कुसि श्लेषणे'। 'कुसेरूलोम्भोमेदेताः कित्'। (उ० ४. १०८) इति उम्भः। कुसुम्भो दन्त्यसः। वह्नेरिव शिखास्येति वह्निशिखम्। 'रञ्जेः क्युन्' (उ० २. ८१) इति क्युन्। महारजनम् ॥

मेषकम्बल ऊर्णायुः

क्षीर० — काम्यते शीतार्तैः। 'कम्बलः कमनीयो भवती'ति निरुक्तम्। ऊर्णास्त्यस्योर्णायुः। 'ऊर्णाया युस्' (५. २. १२३) ॥

टीका० — मेषरोमरचिते कम्बले मेषकम्बलद्वयम्। 'ऊर्णाया युस्' (५. २. १२३)। ऊर्णायुर्दीर्घादिः ॥

शशोर्णं शशलोमनि ॥ १०७॥

क्षीर० — शशस्योर्णा शशोर्णम्। गृहस्थूणवत् क्लीबे ॥

टीका० — शशस्योर्णा लोम शशोर्णं क्लीबं शशलोमनि ॥

मधु क्षौद्रं माक्षिकादि

---

१. स्तुभ्यते' क. पाठः. २. 'युः ॥ श' क. पाठः.

क्षीर० — मद्यतेऽभिलष्यते मधु पुष्परसाख्यम्[1]। क्षुद्राभिर्मक्षिकाभिश्च कृतम्। 'क्षुद्राभ्रमर —' (४. ३. ११९) इत्यञ्। आदिशब्दात् पौत्तिकभ्रामरादि। अगणितोऽवान्तरभेदो गजनिमीलिकयैव। यन्निमिः —

"माक्षिकं तैलवर्णं स्याद् घृतवर्णं तु पौत्तिकम्।
विज्ञेयं भ्रामरं श्वेतं क्षौद्रं तु कपिलं मतम्" ॥

टीका० — मधुशब्देन क्षौद्रमुच्यते माक्षिकादि च। आदिना भ्रामरवाटरपौत्तिकादि। क्षुद्राभिः कृतं क्षौद्रम्। 'क्षुद्राभ्रमरवटरपादपादञ्' (४. ३. ११९) इत्यञ्। मक्षिकया कृतं माक्षिकम्। एवं सारघम्। 'संज्ञायाम्' (४. ३. ११७) इत्यण् ॥

मधूच्छिष्टं तु सिक्थकम्।

क्षीर० — मधुना उच्छिष्यते त्यज्यते मधूच्छिष्टम्। सिञ्चति सिक्थकम् ॥

टीका० — मधूच्छिष्टद्वयं सिक्थ इति ख्याते। 'षिच क्षरणे'। पातृतुदिवचिरिचिसिचिभ्यः क्थन् (उ० २. ७)। ततः स्वार्थे कः ॥

मनश्शिला मनोगुप्ता मनोह्वा नागजिह्विका ॥ १०८ ॥

क्षीर० — मनोवाच्यौ[2] शिला। मनश्शब्देन ह्वयते मनोह्वा। नागजिह्वाप्रतिकृतिर्नागजिह्विका। शिला च ॥

टीका० — मनश्शिलाचतुष्टयं मनश्शिलायाम् ॥

नैपाली कुनटी गोला

क्षीर०—नेपालदेशे भवा मनश्शिला नैपाली द्विसंज्ञा। अभेदान्नेपाली[3] वा। कौ नटति कुनटी। गाः लाति गोला, गुडति वा। सप्तैकार्था इत्येके ॥

---

१. 'द्य' ख पाठः. २. 'च्या। म' क. ग. घ. ङ. पाठः. ३. 'ली। कौ' क. ग. घ. ङ. पाठः.

टीका० — नेपालदेशजा कुनटी मनश्शिला गोलाख्या। सप्तकमेव मनश्शिलायामित्यन्यः। तथाच श्लोकार्धपर्याये माधवः —

"मनश्शिला मनोज्ञा च नैपाली कुनटी शिला"

इति ॥

यवक्षारो यवाग्रजः।

पाक्यः

क्षीर० — दग्ध्वा यवाङ्कुराज्जन्यते यवक्षारः। पचनीयः पाक्यः॥

टीका० — यवक्षारत्रयं यवक्षारे। पचेर्ण्यति पाक्यः॥

अथ सर्जिकाक्षारः कापोतः सुखबन्धकः॥१०९॥

सौवर्चलं स्याद् रुचकं

क्षीर० — रुच्यते दीप्यते जाठरोऽग्निरनेन रुचकम्। क्षारप्रसङ्गात् पुनरुक्तम्। एवं ग्रन्थिकप(त?त्रा)ङ्गादि॥

टीका० — सर्जिकाक्षारपञ्चकं सर्जिकाक्षारे। लवणप्रस्तावे तु अत्रैव सौवर्चलनामोक्तम्। सत्रयं दन्त्यम्॥

"कापोतः सर्जिका सर्जिः सुब्निका च सुवर्चिका।
रुचकं कृष्णलवणमक्षं सौवर्चलं च तद्॥"

इति श्लोकपर्याये माधवः॥

त्वक्क्षीरा वंशरोचना।

क्षीर० —त्वचो वंशात् क्षीरमस्यास्त्वक्क्षीरा त्वक्क्षीरी च। वंशोत्था रोचना वंशरोचना। आह च —

"स्याद् वंशरोचना वांशी तुकाक्षीरी तुका शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी"॥

टीका० — त्वक्क्षीराद्वयं[२] वंशरोचनायाम्। एतयोर्भेदे[३]ऽप्येकत्वमुक्तम्॥

---

१. 'ति मा', २. 'यं रो', ३. 'दे एकत्वम्॥' ख. पाठः.

शिग्रु[1] चं श्वेतमरिचं

क्षीर० — शिनोति तैक्ष्ण्याच्छिग्रु । सौभाञ्जनबीजम् ॥

टीका० — शोभाञ्जनबीजे शिग्रु[2]जद्वयम् ॥

मोरटं मूलमैक्षवम् ॥ ११० ॥

क्षीर० — मुरति मोरटम् । 'मुर संवेष्टने' ॥

टीका० — इक्षुमूले मोरटम् । 'मुर खण्डने' । 'शकादिभ्योऽटन्' (उ० ४. ८२) ॥

ग्रन्थिकं पिप्पलीमूलं चटं[3]काशिर इत्यपि ।

क्षीर० — ग्रन्थिप्रतिकृति ग्रन्थिकम् । चटं[4]काशिरोरूपत्वाच्चटं[5]काशिरः ॥

टीका० — ग्रन्थिकचतुष्कं पिप्पलीमूले ।

"शिरो ना पिप्पलीमूले स्याद्धमन्यां च योषिति "

इति रभसः ॥

गोलोमी भूतकेशो ना

क्षीर० — गोरिव लोमान्यस्या गोलोमी । भूताः केशा अस्य भूतकेशः, भूतस्येव केशा अस्य वा । ना पुमान् ॥

टीका० — भूतकेशा इति ख्याते तृणे गोलोमीद्वयम् । गोलोमी ङ्यन्ता ॥

पत्राङ्गं रक्तचन्दनम् ॥ १११ ॥

क्षीर० — पत्राण्यङ्गे पत्राङ्गम् ॥

---

१. 'स्तु' ख. पाठः. २. 'मुद्ग' च. ज. पाठः. ३. ४. ५. 'टि' क. पाठः.

टीका० — **पत्राङ्गेति** ख्याते रक्तसारे रक्तचन्दनसदृशे पत्राङ्गद्वयम् ॥

त्रिकटु त्र्यूषणं व्योषं

क्षीर० — **त्रीणि कटून्यूषणानि च शुण्ठीमरिचपिप्पल्याख्यानि समाहृतानि। विशेषेणौषति दहति व्योषम्। कटुत्रिकं च ॥**

टीका० — त्रिकटुत्रयं **त्रिकटौ**।

"त्र्युषणं त्रिकटु व्योषं रुचकः सौवर्चलः पुंसि"

इति रत्नकोशार्यापाठाद्ध्रस्वादि त्र्युषणम्। 'अयस्तिलत्र्यूषणकोलभोगै'रित्यादौ तु योगशतके दीर्घादिः। 'उष दाहे'। विपूर्वः। व्योषम् ॥

त्रिफला तु फलत्रिकम् ॥ १११½ ॥

क्षीर० — **त्रयाणां फलानां हरीतक्यामलकविभीतकानां समाहारस्त्रिफला। अजादित्वाट्टाप्। वरा च ॥**

इति वैश्यवर्गः।

टीका० — हरीतकीविभीतक्यामलकानि फलत्रयं त्रिफला। अजादित्वाट्टाप्। 'तृफ तृम्फ तृप्तौ'। 'कलप् तृफश्च' (उ० १. १०९) इति कलप्प्रत्ययेन तृफलेत्यपि। 'त्रिफला तृफलापि चे'ति त्रिकाण्डशेषश्च। आहिताग्न्यादेराकृतिगणत्वात् परनिपातविकल्पे फलत्रिकम् ॥

इति वन्द्यघटीयश्रीसर्वानन्दकृतौ टीकासर्वस्वे

वैश्यवर्गः।

अथ शूद्रवर्गः ।

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः ।

क्षीर० — शु पूजितं कृत्वा उन्दन्ति सुरान् क्लेदयन्ति शूद्राः, शीयन्ते वा । वृषं लुनन्ति वृषलाः । नारदस्तु —

"वृषो हि भगवान् धर्मस्तस्य यः कुरुते लयम् ।
वृषलं तं विजानीयात्" ॥

जघन्याज्जाता जघन्यजाः । यच्छ्रुतिः— 'पद्भ्यां शूद्रो अजायत' । पज्जाः पद्याश्च ॥

टीका० — शूद्रचतुष्कं शूद्रे । 'शुच शोके' । 'शुचेर्दश्च' (उ० २. २१) इति रक्, दश्चान्तादेशः, उपधादीर्घत्वं च । शूद्रः । अवरवर्णः अधमवर्णः । 'वृषु सेचने' । 'वृषादिभ्यः कलच्' (उ० १. १११) । वृषलः । वृषं धर्मं लुनातीति वा सः । ब्रह्मणो जघन्याङ्गे पादे जाता जघन्यजाः ॥

आ चण्डालात् तु सङ्कीर्णा अम्बष्ठकरणादयः ॥ १ ॥

क्षीर० — चण्डालो ब्राह्मण्यां शूद्राज्जातोऽत्र । संकीर्णाः प्रतिलोमानुलोमजत्वान्मिश्राः । यत् स्मृतिः —

"विप्रान्मूर्धावसिक्तस्तु क्षत्रियायां विशः स्त्रियाम् ।
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शवोऽपि च ॥
माहिष्योग्रौ प्रजायेते विट्च्छूद्राङ्गनयोर्नृपात् ।
शूद्रायां करणो वैश्याद् विना त्वेष विधिः स्मृतः ॥
ब्राह्मण्यां क्षत्रियात् सूतो वैश्याद् वैदेहकः स्मृतः ।
शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः ॥

---

१. 'परिकीर्तितः । मा', २. 'करणात्' क. पाठः.

क्षत्रिया मागधं वैश्याच्छूद्रात् क्षत्तारमेव च ।
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥
माहिष्येण करण्यां तु रथकारः प्रजायते ।
असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ॥"

टीका० — चण्डालं वक्ष्यति । तं व्याप्य वक्ष्यमाणाः करणादयः संकीर्णाः शूद्रजातयः ॥

क्षीर० — तदाह —

शूद्राविशोस्तु करणः

सिंहावलोकितेन सुत इत्येव । शूद्रायां वैश्याज्जातः । करोति प्रेष्यकर्माणि करणः । ल्युट् । एवं सर्वत्राध्याहार्यानुषङ्गादि ॥

टीका० —'शूद्राविशोरि'त्यादिभिः षष्ठ्यन्तैः प्रत्येकं सुत इति वक्ष्यमाणः सम्बध्यते । शूद्रायां वैश्याज्जातः सुतः करणो लिपिलेखनवृत्तिः ॥

अम्बष्ठो वैश्याद्द्विजन्मनोः ।

क्षीर० — अम्बायां तिष्ठत्यम्बष्ठः । 'अम्बाम्बगोभूमि —' (८. ३. ९७) इति षत्वम् । ह्रस्वो निर्देशात् । द्विजन्मात्र विप्रः । वैश्येति । 'यञश्च' (४. १. १६) इति ङीव् नास्ति, लक्ष्यात् ॥

टीका० — वैश्यायां ब्राह्मणाज्जातोऽम्बष्ठश्चिकित्सावृत्तिः ॥

शूद्राक्षत्रिययोरुग्रः

क्षीर० — 'शूद्रा चामहत्पूर्वा —' (वा० ४. १. ४) इत्यजादित्वाट्टाप् । उचत्युग्रः । 'उच समवाये' ॥

टीका० — शूद्रायां क्षत्रियाज्जात उग्रः ॥

मागधः क्षत्रियाविशोः ॥ २ ॥

क्षीर० — मगध्यति स्तौति मागधः ॥

टीका० — क्षत्रियायां वैश्याज्जातो मागधः स्तुतिक्रियावृत्तिः ॥

माहिष्योऽर्याक्षत्रिययोः

क्षीर० — महिष्यां साधुर्माहिष्यः । स ह्यन्तःपुररक्षितेति स्मार्तः । अर्येति वैश्या ॥

टीका० — वैश्यायां क्षत्रियाज्जातो माहिष्यः ॥

क्षत्तार्याशूद्रयोः सुतः ।

क्षीर०— क्षदति द्वाःस्थत्वात् क्षत्ता । 'तृंस्तृचौ शंसिक्षदादिभ्यः—' (उ० २. ९४) इत्यनिट् । क्ष(त्ता?दति)स्त्वौणादिकपाठात् ॥

टीका० — शूद्रात् क्षत्रियायां जातः क्षत्ता । अर्या स्वामिनी । सा चेह क्षत्रियेति बोद्धव्यम् । क्षत्रियस्यैव क्षितिस्वामित्वं, सामान्यशब्दस्यार्थाद् विशेषोऽवगम्यते । यथा 'अञ्जलिना सूर्यमुपतिष्ठेत' 'अञ्जलिना पयः पिबती'त्यादावर्थानुरोधात् पाणिसन्निवेशविशेषः प्रतीयते, तथा ।

"क्षत्ता शूद्रात् क्षत्रियाजे सारथिप्रतिहारयोः" ॥

ब्राह्मण्यां क्षत्रियात् सूतः

क्षीर० — सुवति प्रेरयत्यश्वान् सूतः ॥

टीका० — ब्राह्मण्यां क्षत्रियाज्जातः सूतः । हेतौ पञ्चमी ।

"सूतः स्यात् क्षत्रियासूनुः शूद्राज्जातोऽथ वर्धकिः"

इति त्वमरमाला ॥

तस्यां वैदेहको विशः ॥ ३ ॥

क्षीर० — ब्राह्मण्यां वैश्याज्जातो वैदेहको वणिक्कर्मा ॥

टीका० — ब्राह्मण्यां वैश्याज्जातो वैदेहकः ।

"वैदेहकं तु शूद्राज्जातं वैश्यासुतं ब्रुवते"

इति नाममाला ॥

---

१. 'था शूद्रः । क्ष' ङ. पाठः.

रथकारस्तु माहिष्यात् करण्यां यस्य सम्भवः।

क्षीर०—माहिष्याद् वैश्याक्षत्रिययोर्जातात् करण्यां शूद्रावैश्यजातायां जातो रथकारस्तक्षा ॥

टीका०—करण्यां माहिष्याज्जातो रथकारः ॥

स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

क्षीर०—चण्डमुग्रं कर्मालति पर्याप्नोति चण्डालः ॥

टीका०—ब्राह्मण्यां शूद्रसुतश्चण्डालः। 'चडि कोपे'। 'पतिचण्डिभ्यामालङ्' (उ० १. १२२)। चण्डालः। चण्डालात् पूर्वं सर्वत्र पाणिग्रहणपूर्वकमिति योज्यम्। पाणिग्रहणव्यतिरेकेणापि प्रमादतो जातः करणादिरेव। गर्हितः स इति परं विशेषः ॥

कारुः शिल्पी

क्षीर०—करोति कारुः ॥

टीका०—कारुद्वयं शिल्पिनि। करोतेः 'कृवापा—' (उ० १. १) इत्यादिना उण्। कारुः ॥

संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः।

क्षीर०—समानजातीयकारुसङ्घः श्रीयत इति श्रेणिः स्त्रीपुल्लिङ्गः ॥

टीका०—सजातीयानां शिल्पिनां सङ्घातः श्रेणिः पङ्क्तौ व्युत्पादिता ॥

कुलकः स्यात् कुलश्रेष्ठी

क्षीर०—कुलं का(र?)यतीति कुलकः। कुलिक इत्येके। श्रेण्यादौ श्रेष्ठार्थः। कुले वणिग्वृन्दे श्रेष्ठत्वमस्त्यस्य कुलश्रेष्ठी ॥

टीका०—शिल्पिनां कुलेषु प्रधाने कुलिकद्वयम्। 'अत इनिठनौ' (५. २. ११५) इति ठनि कुलिकः। कुलश्रेष्ठी नान्तः। 'कुलश्रेष्ठी चे'ति त्रिकाण्डशेषः। कुलयोगादर्शआद्यचि.कुलोऽपीत्यन्यः ॥

१, 'लः' ठ. पाठः.

मालाकारस्तु मालिकः ॥ ५ ॥

क्षीर० — 'तदस्य पण्यम्' (४. ४. ५१) इति ठक् ॥

टीका० — मालाकारद्वयं मालाकारे । कर्मण्यणि मालाकारः । माला-निर्माणं शिल्पमस्येति मालिकः । 'शिल्पम्' (४. ४. ५५) इति ठक् ॥

कुम्भकारः कुलालः स्यात्

क्षीर० — कुलानि गृहाण्यलति कुलालः, कुं मृदं लालयति मृद्राति वा ॥

टीका० — कुम्भकारद्वयं कुम्भकारे । मालाकारवत् कुम्भकारः । कुं लालयतीति कुलालः ॥

पलराण्डस्तु लेपकः ।

क्षीर० — पलेन मांसेनेव मृदादिना गण्ड(ते?ति) सर्चते पलगण्डो लेप्यकृत् ॥

टीका० — पलगण्डद्वय लेप्यकरे । लिपेर्ण्वुलि लेपकः ॥

तन्तुवायः कुविन्दः स्यात्

क्षीर० — तन्तून् वयति तन्तुवायः । 'ह्वावामश्च' (३. २. २) इत्यण् । कुं विन्दति कुविन्दः ॥

टीका० — तन्तुवायद्वयं तन्तुवाये । वेञो 'ह्वावामश्च' (३. २. २) इत्यण् । तन्तुवायः । डुवपेः तन्तुवापशब्दोऽप्यत्र । 'कुपेर्वश्च' (उ० ४. ८६) इति किन्दच् वश्चादेशः । कुविन्दः ॥

तुन्नवायस्तु सौचिकः ॥ ६ ॥

क्षीर० — तुन्नं विद्धं वयति तुन्नवायः । सूच्यादि शिल्पमस्य सौचिकः ॥

---

१. 'ह्व' ग. घ. ङ. पाठः. २. 'यः । कुं' क. पाठः. ३. 'पोऽपि । कु' ठ. पाठः.

टीका० — तुन्नवायद्वयं सूचिकर्मोपजीविनि। तुन्नं त्रुटितं वयतीति तुन्नवायः। मालिकवत् सौचिकः। दन्त्यादिः॥

रङ्गाजीवश्चित्रकरः

क्षीर० — रङ्गाणि रक्तपीतादीन्याजीवति **रङ्गाजीवः**[1]। **चित्रं करोति** 'दिवाविभा—' (३. २. २१) इति टः॥

टीका० — रङ्गाजीवद्वयं **चित्रकरे**। रज्यते शुक्लं रक्ततामापद्यतेऽस्मिन्निति रङ्गो हरितालमनश्शिलादिः, तमाजीवतीति रङ्गाजीवः। दिवाकरवच्चित्रकरः॥

शस्त्रमार्जोऽसिधावकः।

क्षीर० — शस्त्रं मार्ष्टि तेजयति **शस्त्रमार्जः**। असिं धावयति शोधयति **असिधावकः**॥

टीका० — शस्त्रमार्जद्वयम् **असिधावके**[2]। शस्त्रं मार्ष्टि शोधयतीति शस्त्रमार्जः। अणन्तात् स्वार्थे कनि असिधावकः॥

पादूकृच्चर्मकारः स्यात्

क्षीर० — **पादूः**[3] पादत्राणानि करोति **पादूकृत्**। **पादकृदित्येके**[4]॥

टीका० — पादुकृद्द्वयं **चर्मकारे**। पादूमुपानहं करोतीति क्विप्। 'इको ह्रस्वोऽङ्यो गालवस्य' (६. ३. ६१) इति ह्रस्वः। पादुकृत्। चर्म करोति विकारतामापादयतीति अणि चर्मकारः॥

व्योकारो लोहकारकः॥ ७॥

क्षीर० — विशेषेणौकं समवायमियर्ति[5] व्योकारः। 'व्यो इत्यर्थः-पर्याय' इति श्रीभोजः॥

टीका० — व्योकारद्वयं **लोहकारे**[6]।

---

१. 'वः। श' क. ग. पाठः. २. 'सिआर इति ख्याते। श' ज. पाठः. ३. 'दूं कृणाति' क. पाठः. ४. 'ति वा पा' क. ग. पाठः. ५. 'पदूकृ' ख. पाठः. ६. 'खेवमयः' क. पाठः. ७. 'कर्मका' ज. पाठः.

"व्योकारोऽयस्कारः क(र्मका?र्मा)रो लोहकारः स्याद्"

इति रत्नकोशः। अन्ये तु आकरोत्थं लोहं ध्मात्वा यो लोहं संस्करोति स लोहकारो व्योकारश्च। कोशलादावनेनैव नाम्ना प्रसिद्धः। व्यो इति लोहबीजस्य प्रसिद्धिः। तथाच हर्षचरिते आकरोत्थलोहसंस्कारिणि विन्ध्याटवीवर्णनायाम् 'ऊष्माणं क्वचिदन्यत्र ग्राहयन्तमिवाङ्गारीयदारुसङ्घट्टादिह व्योकारैः' इति प्रयोगः। यस्तु संस्कृतं लोहं खड्गनाराचादिविकारमापादयति, स कर्मकारः। एतच्च क्रियाभेदमात्रम्। जातिरेकैव ॥

नाडिन्धमः स्वर्णकारः कलादो रुक्मकारके।

क्षीर०—नाडिं धमति नाडिन्धमः। 'नाडीमुष्ट्योश्च' (३. २. ३०) इति खश्। कला आदत्ते कलादः। कलं सुवर्णकालिकाम् आद्यत्याखण्डयति वा। अत एव कलं धौतं यत्रेति कलधौतं रुक्मम्। हेममुष्टिकोऽपि ॥

टीका०—नाडिन्धमचतुष्कं स्वर्णकारे। नाडी नलीति ख्याता, तां मुखवायुना धमति शब्दयतीति 'नाडीमुष्ट्योश्च'। (३. २. ३०) इति खश्। नाडिन्धमः। कलां स्वर्णशिल्पमात्तवान् स्वीकृतवानिति कलादः। मूलविभुजादेराकृतिगणत्वात् कः ॥

स्याच्छाङ्खिकः काम्बविकः

क्षीर०—कम्बुघटनं शिल्पमस्य काम्बविकः ॥

टीका०—शाङ्खिकद्वयं शाङ्खिके। 'तदस्य पण्यम्' (४. ४. ५१) इति ठक्। शाङ्खिकः। काम्बविके तु ओरञन्तात् पूर्ववद्ठक्। अन्यथा 'इसुसुक्तान्तात् कः' (७. ३. ५१) इति कः स्यात् ॥

शौल्विकस्ताम्रकुट्टकः ॥ ८ ॥

क्षीर०—शुल्बं ताम्रम्। कुट्टयति छोदयति शौल्विकः। मणिकारो वैकटिकः ॥

---

१. 'शश्च। अ' क. ख. ग. घ. ठ. पाठः २. 'णि' ख. पाठः. ३. 'लि। अ' क. ग. ख. ङ. पाठः ४. नालां। तां. ५. 'निति' ङ., 'न हांत' क. पाठः. ६. 'कः॥ शौ' क. ग. पाठः ७. 'लि। म' ख. पाठः ८ 'लिनकः' ग. पाठः.

टीका० — शौल्विकद्वयं कांस्यकारे। शुल्बं ताम्रं, तत्कुट्टनं शिल्पमस्येति शौल्विकः। ताम्रं कुट्टयतिच्छेदयतीत्यणि ताम्रकुट्टकः॥

तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट्।

क्षीर० — तक्ष्णोति तक्षा। वर्धयतीति वर्धकिः। 'वर्ध छेदने'। त्वक्षति तनूकरोति दारूणि त्वष्टा। काष्ठं तक्ष्णोति काष्ठतट्। स्थपतिश्च॥

टीका० — तक्षपञ्चकं वर्धकौ। 'तक्षू त्वक्षू तनूकरणे'। कनिन्। तक्षा। त्वक्षेरेव तृच्। 'स्कोः —' (८. २. २९) इत्यादिना कलोपः। त्वष्टा। काष्ठं तक्षतीति क्विपि काष्ठतट्॥

ग्रामाधीनो ग्रामतक्षः

क्षीर०—ग्रामस्यायत्तस्तक्षा ग्रामतक्षः। 'ग्रामकौटाभ्यां च तक्ष्णः'। (५. ४. ९५) इति टच्॥

टीका० — ग्रामवर्धकौ ग्रामाधीनद्वयम्। 'ग्रामकौटाभ्यां च तक्ष्णः' (५. ४. ९५) इति समासान्ताच्चि ग्रामतक्षः॥

कौटतक्षोऽनधीनकः॥ ९॥

क्षीर० — कुट्यां भवः कौटः स्वतन्त्रः। नास्ति अधि उपरि इनः स्वाम्यस्यानधीनकः॥

टीका० — यस्तु स्वकर्माजीवी ग्राम एव व्यवस्थितः, तत्र कौटतक्षद्वयम्। कुट्यां भवः स्थितः कौटः। ततः कर्मधारयः। पूर्ववत् समासान्तः॥

क्षुरिमुण्डिदिवाकीर्तिनापितान्तावसायिनः।

क्षीर० — क्षुरमस्त्यस्यें क्षुरी। मुण्डयति मुण्डी। दिवा कीर्त्यते दिवाकीर्तिः। रात्रौ क्षुरकर्मनिषेधात्। नाप्यते नापितः। नञ् प्रकृत्या। अन्तम् अवस्यत्यन्तावसायी। चण्डालकोऽपि। 'संवाहकोऽङ्गमर्दः स्यात्'॥

टीका० — क्षुरिपञ्चकं नापिते। मुण्डवान् मुण्डी। दिवा दिवसे कीर्ति-

---

१. 'ट्। ग्रा', २. 'ति का', ३. 'यं तक्षा', ४. 'स्य। मु', ५. 'ति। दि' क. पाठः.

व्यापारोऽस्येति दिवाकीर्तिः । 'नञ्याप्नोतेरिट् च' (उ० ३. ८७) इति तन् इडागमश्च । नापितः । अन्तावसायी णिन्यन्तः ॥

निर्णेजकः स्याद् रजकः

क्षीर० — **निर्णेनेक्ति[1] क्षालयति निर्णेजकः[2] । रञ्जयति रजकः । 'शिल्पिनि ष्वुन्[3]' (३. १. १४५) । रजनरजकरजस्सूपसंख्यानान्नलोपः । क्वचिद् य एव धावकः स एव रजकः । स्मार्ते तु भिन्नावेतौ ॥**

टीका० — निर्णेजकद्वयं **रजके** । 'णिजिर शौचे' । ण्वुल । 'उपसर्गादसमासेऽपि णोपदेशस्य' (८. ४. १४) इति णत्वम् । निर्णेजकः । रजक इत्यत्र 'शिल्पिनि ष्वुन्' (३. १. १४५) ॥

शौण्डिको मण्डहारकः ॥ १० ॥

क्षीर० — **शुण्डा पानमदस्थानं सुरा वा पण्यमस्य शौण्डिकः । मण्डमच्छसुरां हरति मण्डहारकः । सुराजीवी कल्यपालाख्यः ॥**

टीका० — शौण्डिकद्वयं **शौण्डिके** । शुण्डा पानस्थानम् । तात्स्थ्यात् सुरापि शुण्डा । 'तदस्य पण्यम्' (४. ४. ५१) इति ठक्[4] शौण्डिकः । तालव्यादिः । अन्नसंबद्धं मण्डमग्रं हरति उद्धरतीति मण्डहारः ॥

जाबालः स्यादजाजीवः[5]

क्षीर० — **जवमलति जवालश्छागः, तस्यायं जाबालः । अजापालापभ्रंशोऽयम् ॥**

टीका० — जाबालद्वयं **छागीवाले** । अजां पालयतीति पृषोदरादित्वादकारलोपो बत्वं च । जाबालः । 'अजावालमजाजीवमि'ति रत्नमाला ॥

देवाजीवस्तु देवलः ।

क्षीर० — **देवान् लाति देवलः ॥**

टीका० — **भोजनकेति** ख्याते देवाजीवद्वयम् । देवान् जीविकार्थे लातवान् स्वीकृतवानिति कः । देवलः ॥

---

१. क्ति नि', २. 'कः क्षालयिता । र' क. पाठः. ३. 'न् । पूर्वो वस्रधा' ख पाठः. ४. 'वी' क. ग. घ. पाठः. ५. 'वितामि' ज. पाठः.

स्यान्माया शाम्बरी

क्षीर० — मात्यस्यां विश्वं माया । शम्बराख्यस्यासुरस्येयं शाम्बरी । शं वृणोति शंवरो व्याज इति[1] तु युक्तम् । इन्द्रजालं कुहूतिः कुहकश्च ॥

टीका० — मायाद्वयम् इन्द्रजालादिमायायाम् । मातेः छायावद् यः । माया । शम्बरासुरेण प्रणीतत्वान्मायायाः 'तस्येदम्' (४. ३. १२०) इत्यणि शाम्बरी[2] । शकार इति निरूपितं प्राक् ॥

मायाकारस्तु प्रातिहारिकः ॥ ११ ॥

क्षीर० — प्रतिहारो[3] व्याजः प्रयोजनमस्य प्रातिहारिकः ॥

टीका० — मायाकारद्वयमैन्द्रजालिके । प्रातिपूर्वाद् हृञो ण्वुलि प्रातिहारको दीर्घादिः ।

"मायाकारकसंज्ञः स्यात् प्रतिहारक इरम्मदोऽभ्राग्निः"

इति वररुचेरार्यायां[4] ह्रस्वादिरपि ॥

शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः ।
भरता इत्यपि नटाः

क्षीर० — शिलालिना कृशाश्वेन च प्रोक्तं नटसूत्रमधीते शैलाली कृशाश्वी च । 'पाराशर्यशिलालिभ्यां —' (४. ३. ११०) इति णिनिः। 'कर्मन्दकृशाश्वादिनिः' (४. ३. १११) । शिलूपस्यर्षेरपत्यं शैलूपः । भरतस्यापत्यम् । विदाद्यञ् । तस्य बहुत्वे 'यञञोश्च' (२. ४. ६४) इति लुक् । नटति नटः ॥

टीका० — शैलालिषटकं नटे । शिलालिना प्रोक्तं नटसूत्रमधीयत इति शैलालिनः । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४. ३. ११०) इति

---

१. 'ति यु' ख. पाठः. २. 'री माया.। श' ठ. पाठः. ३. 'रणं व्या' क. ग. पाठः. ४. 'यया ह्र' ज. पाठः.

णिनिः । जायया जीवन्तीत्यचि जायाजीवाः । कृशाश्वप्रोक्तं नटसूत्रमधीयत इति कृशाश्विनः । 'कर्मन्दकृशाश्वादिनिः' (४. ३. १११) । भरतशिष्यतया भरताः । 'तस्येदम्' (४. ३. १२०) इत्यण् । संज्ञापूर्वकत्वान्न वृद्धिः । भरतगोत्रतया उत्साद्यञि बहुत्वबहुगन्तो वा । एकद्वित्वयोस्तु भारतः भारतौ । 'नट नृत्तौ' । पचाद्यच् । नटाः ॥

चारणास्तु कुशीलवाः ॥ १२ ॥

क्षीर० — चरणस्य भ्रमणस्यायं चारणः, यतो देशान्तरभ्रमणाज्जीवति । कुत्सितं शीलं वाति कुशीलवः ॥

टीका० — चारणद्वयं छात्रकथकादिषु । दिगन्तेषु कीर्तिं चारयन्ति प्रापयन्तीति ल्युटि चारणाः । कुत्सितं शीलमस्येति कुशीलवः । वप्रकरणे'* 'अन्यत्रापि दृश्यते' (वा० ५. २. १०९) इति वः ॥

मार्दङ्गिका मौरजिकाः

क्षीर० — मृदङ्गमुरजवादनं शिल्पमस्य मार्दङ्गिकः[1], मौरजिकः[2] ॥

टीका० — मुरजवादके मार्दङ्गिकद्वयम् । 'शिल्पम्' (४. ४. ९९) इति ठक् ॥

पाणिवादास्तु पाणिघाः ।

क्षीर० — पाणिं हन्ति पाणिघः । 'पाणिघताडघौ शिल्पिनि' (३. २. ५५) इति साधुः ॥

टीका० — ये पाणिनैव पाण्यभ्यन्तरे मुरजादिवाद्यमुत्पादयन्ति **तत्र** पाणिवादद्वयम् । 'पाणिघताडघौ शिल्पिनि' (३. २. ५५) इति निपातनात् पाणिघाः ॥

वेणुध्माः स्युर्वैणविकाः

---

१. 'ङ्वा', २. 'कः ॥' क. ग. पाठः.

---

* 'अन्येभ्योऽपि दृश्यते' इति मुद्रितवार्त्तिकपाठः ।

क्षीर० — वेणून् धमति वेणुध्माः। वेणुर्वंशिका शिल्पमस्य ॥

टीका० — वेणुध्मद्वयं[2] वेणुवादके[3]। वेणुं धमति शब्दयतीति कः। वेणुध्मः। वेणुविकारो वैणवम्। तद्वादनं शिल्पमस्येति ठकि वैणविकः ॥

वीणावादास्तु वैणिकाः ॥ १३ ॥

क्षीर० — वीणावादनं शिल्पमस्य वैणिकः ॥

टीका० — वीणावादके वीणावादद्वयम् ॥

जीवान्तकः शाकुनिकः

क्षीर० — शकुनिं हन्ति शाकुनिकः। 'पक्षिमत्स्यमृगान् हन्ति' (४. ४. ३५) इति ठक् ॥

टीका० — वर्तनार्थं पक्षिघातके जीवान्तकद्वयम्। जीवानां पक्षिणामन्तको जीवान्तकः। 'पक्षिमत्स्यमृगान् हन्ति' (४. ४. ३५) इति ठकि शाकुनिकः ॥

द्वौ वागुरिकजालिकौ।

क्षीर० — एकार्थाविति शेषः। वागुरया मृगबन्धनरज्ज्वा चरति वागुरिकः। जालेन जालिकः ॥

टीका० — जालेन मृगहन्तरि वागुरिकद्वयम्। वागुरा मृगबन्धनजालम्। तया चरतीति वागुरिकः। 'पर्पादिभ्यः ष्ठन्' (४. ४. १०)। जालिकः ॥

वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥

क्षीर० — वितंस्यते वितंसः प्राणिबन्धोपकरणम्। कूटं कूटयन्त्रम्। ताभ्यां चरति जीवति वेति ठक्। मांसं पण्यमस्य मांसिकः। सौनिकार्था इत्येके ॥

---

१. 'ध्मा वंशिकः ॥' ख. पाठः. २. 'वांशिकारेति ख्याते वेणुध्मद्वयम्।', ३. 'यम्। वेणुं' ज. पाठः.

टीका० — कौटिकादि[1]षु वैतंसिकत्रयम् । मृगपक्ष्यादिबन्धनोपायो वीतंसः । दन्त्यान्तः । मृगपक्ष्यादिबन्धनयन्त्रं कूटम् । ताभ्यां चरतीति ठक् । वैतंसिकः कौटिकः । 'तदस्य पण्यम्' (४. ४. ५१) इति ठकि मांसिकः ॥

भृतको भृतिभुक् कर्मकरो वैतनिकश्च सः ।

क्षीर० — भ्रियते स्म भृतकः । स्वार्थे कन् । भृतिं वेतनं भुङ्क्ते भृतिभुक् । वेतनेन जीवति वैतनिकः । 'वेतनादिभ्यो जीवति' (४. ४. १२) इति ठक् ॥

टीका० — वेतनोपजीविनि कर्मकरे भृतकचतुष्कम् । वेतनेन क्रीतो भृतः, भृत एव भृतकः । 'अनुकम्पायाम्' (५. ३. ७६) । कन् । क्विपि भृतिभुक् । 'कर्मणि भृतौ' (३. २. २२) ति टः । कर्मकरः । ठकि वैतनिक[2]ः ॥

वार्तावहो वैवधिकः

क्षीर० — 'विभाषा विवधवीवधात्' (४. ४. १७) इति ठक् ॥

टीका० — वान्धा[3]रीति ख्याते वार्तावहद्वयम् । धान्यमत्स्यादिवार्तां वहतीति पचाद्यच् । वार्तावहः । विवधः पर्याहारः । 'विभाषा विवधवीवधात्' (४. ४. १७) इति ठक् । विवधेन हरतीति वैवधिकः ॥

भारवाहस्तु भारिकः ॥ १५ ॥

क्षीर० — भारोऽस्त्यस्य भारिकः ॥

टीका० — भारवाहद्वयं भारिके । 'कर्मण्यण्' (३. २. १) भारवाहः । 'हरत्युत्सङ्गादिभ्यः' (४. ४. १५) इति ठकि भारिकः ॥

विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः ।
निहीनोऽपशदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥

क्षीर० — विरुद्धो वर्णोऽस्य विवर्णः, वर्णान्तरालत्वात् । पामाः

---

१. 'टादि' क, 'ट' ग. पाठः. २. 'कः ॥ वार्तावहद्वयं वैवधिके । धा' ट. पाठः. ३. 'त्सा' क. पाठः.

सन्त्यस्याधनत्वात्, पामरः। निम्नमञ्चति नीचः। प्रकृतौ भवः प्राकृतः गुणाद्यैसंस्कृतः। पृथग् जनेभ्यः पृथग्जनः। नियतं हीयते निहीनः। अपशीयतेऽपशदः। जलति जाल्मः। *'जल धान्ये'। क्षुधं लाति क्षुल्लकः। इतरस्तुच्छत्वाद्, इतं राँति वा। वर्वरो यथाजातोऽपि। भरतादौ रेफसकारौ ॥

टीका० — विवर्णदशकं नीचे। विगतो वर्णो यशोऽस्येति विवर्णः। पामानं रातीति पामरः। न्यञ्चति न्यग्भवतीति नीचः। अञ्चेः क्विन्। ऊर्णनाभवदच् समासान्तः। 'अचः' (६. ४. १३८) इत्यकारलोपः। 'चौ' (६. ३. १३८) इति दीर्घः। प्रकृतौ यथाजातभावे भवोऽव्युत्पन्नः प्राकृतः। सज्जनेभ्यः पृथग्भूतो जनः पृथग्जनः। जहातेः क्तः। निहीनः। सदेः पचाद्यच्। अपसदः। क्षुधं लाति गृह्णातीति क्षुल्लः। ततोऽज्ञाताद्यर्थे कः।

"क्षुल्लकः पामरे स्तोके क्षारः काचे च भस्मनि"

इत्यजयः। रभसस्तु 'खुल्लकस्त्रिषु नीचेऽल्पे' इत्यादिना कवर्गद्वितीयादौ पठति। सज्जनेभ्योऽन्यतया इतरः॥

भृत्ये दासेरदासेयदासगोप्यकचेटकाः।
नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः॥ १७॥
पराचितपरिस्कन्दपरजातपरैधिताः॥ १७½॥

क्षीर० — भरणीयो भृत्यः। 'भृञोऽसंज्ञायाम्' (३. १. ११२) इति क्यप्। दास्या अपत्यं दासेरो दासेयश्च। 'क्षुद्राभ्यो वा' (४. १. १३१) इति ढक्ढकौ। दीयते दस्यते वा दासः। 'दसु उपक्षये'। गोपनीयो गोप्यः। चेटति चेटः। 'चिट परप्रेष्ये'। 'प्रयोज्यनियोज्यौ शक्यार्थे' (७. ३. ६८) इति साधुः। किं करोमीत्याज्ञाप्रतीक्षः किङ्करः। 'दिवाविभा—' (३. २. २१) इत्यादिना टः। प्रेषणीयः प्रैष्यः। 'प्रादू-

१. 'स्य पामवत्त्वात्' क. ग. पाठः. २. 'द' क. पाठः. ३. 'न्यङ् ह्रीं' ग. पाठः. ४. 'जघन्ये' ग. घ. ङ. पाठः. ५. 'ल्लः। तुच्छ' ग. पाठः. ६. 'कः। तुच्छ', ७. 'रात्येति', ८. 'वा इतरः। व' ख. पाठः.

* 'धान्यं जडत्वम्' इति क्षीरतरङ्गिणी।

होढोढ्येषैष्येषु' (वा० ६. १. ८९) इति वृद्धिः। 'इषु इच्छायाम्'। अस्मात्तु प्रेष्यः। भुङ्क्ते स्वाम्युच्छिष्टं भुजिष्यः। परैराचीयते वर्ध्यते पराचितः। परिस्कन्दयते आक्रम्यते परिस्कन्दः। 'परिस्कन्दः प्राच्यभरतेषु' (८. ३. ७५) इति साधुः। परैरेध्यते[2] वर्ध्यते परैधितः॥

टीका०—भृत्यैकादशकं भृत्ये। 'भृञोऽसंज्ञायाम्'(३. १. ११२) इति क्यप्। भृत्यः। दास्या अपत्यं दासेरः, दासेयश्च। 'क्षुद्राभ्यो वा' (४. १. १३१) इति ढक्। 'दसि दंशदर्शनयोः'। 'दंसेष्टनौ न आ च' (उ० ५. ९) इति टटनौ प्रत्ययौ नकारस्य चाकारः। एवं दासो दन्त्यसः। गुपेर्ण्यति 'अनुकम्पायाम्' (५. ३. ७६) कन्। गोप्यकः। 'चिट परप्रेष्यभावे'। घञ्। पूर्ववत् कन्। चेटकः। युजेः 'शकि लिङ् च' (३. ३. १७२) इति चकारात् कृत्यत्ययो ण्यत्। नियोज्यः। 'प्रयोज्यनियोज्यौ शक्यार्थे' (७. ३. ६८) इति कुत्वाभावः। किञ्चित् करोतीति 'किंयत्तद्बहुषु कृञोऽज्विधानम्' (वा० ३. २. २१) इत्यच्। तेन स्त्रियां टाप्। किञ्चिदर्थवृत्तिरत्र किंशब्दः। 'इष गतौ' दैवादिकः। ण्यति लघूपधगुणः। 'प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या' (वा० ६. १. ८९) इति वृद्धौ प्रैष्यः। कर्मणि घञि प्रैषोऽपीति न्यासः। 'ईष उञ्छे', 'ईष गतिहिंसादानेषु'। घञि ण्यति च गुरूपधत्वाद् गुणाभावे प्रेषप्रेष्यौ। 'रुचिभुजिभ्यां किष्यन्' (उ० ४. ८०)। भुजिष्यो मूर्धन्यषः। चरतेर्ण्वुल्। परिचारकः। **परसंवर्धिते** पराचितचतुष्कम्। चिञः क्तः। पराचितः। स्कन्देः पचाद्यच्। 'परेश्च' (८. ३. ७४) इति षत्वविकल्पः। परिस्कन्दः। परेण पोषितत्वात् परस्माज्जात इव परजातः। परैधितः संवर्धितः परैधितः॥

मन्दस्तु तुन्दपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः।

क्षीर०—मन्दते स्वपितीव मन्दः। अत एव 'मदि जाड्ये' इति चान्द्रो धातुः। तुन्दं परिमार्ष्टि तुन्दपरिमृजः। 'तुन्दशोकयोः परि-

---

१. 'ते नियुज्यते प' क. ग. पाठः. २. 'ते प' ग. पाठः.

मृजापनुदोः' (३. २. ५) इति सूत्रे 'आलस्यसुखाहर(ण)योरि'ति वक्तव्यात् कः। आलस्यमस्त्यस्यालस्यः। अर्शआदित्वादच्। शीतादलसे 'शीतोष्णाभ्यां कारिणि' (५. २. ७२) इति कन्। न लसत्यलसः॥

टीका० — मन्दषट्कमलसे। 'मदि स्तुत्यादौ'। पचाद्यच्। मन्दः। 'तुन्दशोकयोः परिमृजापनुदोः' (३. २. ५) इति कः। तुन्दपरिमृजः। 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यत' इति वचनात् तुन्दपरिमार्ज इत्यपि। न लसतीत्यलसः। चातुर्वर्ण्यादित्वात् स्वार्थे प्यञि आलस्यः। शीतं मन्दं करोतीति शीतकः। 'शीतोष्णाभ्यां कारिणि' (५. २. ७२) इति कन्॥

दक्षे तु चतुरपेशलपटवः सूत्थान उष्णश्च॥ १८½॥

क्षीर०— दक्षते दक्षः। चतते[2] कर्म चतुरः। पेशति पिशति वा पेशलः। 'पिश अवयवे', 'पिश गतौ'[3]* । पटति पाटयति वा पटुः। सुष्ठूत्थानम् उद्योगोऽस्य सूत्थानः। ओषति दहतीव उष्णः। उष्णकोऽपि॥

टीका० — दक्षषट्कं दक्षे। 'दक्ष वृद्धौ शीघ्रार्थे च'। पचाद्यच्। दक्षः। 'चते चदे याचने'। अङ्कुरवदुरच्। चतुरः। 'पिश अवयवे'। बाहुलकादलच्। पेशलः। 'पट गतौ'। हेतुमण्णिच्। 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधताश्च' (उ० १. १८) इति उः, धातोश्च पटिरादेशः। पटुः। सुष्ठूत्थानमुद्योगोऽस्येति सूत्थानः॥

चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमाः॥ १९॥
निषादश्वपचावन्तेवासिचाण्डालबुत्कसाः।

क्षीर०— चण्डते चण्डालः। प्लवते प्लवः। मा निषिद्धं तङ्गति मातङ्गः। 'अ मा नो न प्रतिषेधे'। मतङ्गापत्यमिति पौराणिकाः। दिवा कीर्त्यते दिवाकीर्तिः। रात्रौ भयदत्वात्। जनं गच्छति जनङ्गमः। 'गमश्च' (३. २. ४७) इति खच्। निषण्णमस्मिन् पापमिति निषादः, निषीदति वा। ज्वलादित्वाण्णः। श्वानं पचति श्वपचः। पचादित्वाद-

---

१. 'स्यास्तील्याल' ग. घ. पाठः २. 'ते च' ग. पाठः. ३. 'तौ वा। प', ४. 'शोभनमुत्था' ख. पाठः. ५. 'ले' क ग. घ. पाठः. ६ 'करत्वा' ग. पाठः.

---

* 'पिसृ पेसृ गतौ' इति भ्वादौ क्षीरतरङ्गिणी।

णोऽपवादोऽच । ग्रामस्यान्ते वसत्यन्तेवासी, अन्तावसायी च । कुलालवरुडचण्डालनिषादमित्रामित्रेभ्यश्छन्दस्युपसंख्यानात् स्वार्थेऽण् । चाण्डालः । बुत् कुत्सितं कसति बुत्कसः । बुक्कस इत्येके । अवान्तरभेदोऽत्र नादृतः । यतः श्वपचो डोम्बः, बुत्कसो मृतपः ॥

टीका० — चण्डालदशकं चण्डाले । 'पतिचण्डिभ्यामालञ्' (उ० १. १२२) चण्डालः । प्रज्ञाद्यणि चाण्डाल इत्युणादिवृत्तिः । प्लव उक्तः । दिवसस्य पुण्यकालत्वात् तत्राकीर्तनम्* अस्येति दिवाकीर्तिः । जनाद् गच्छतीति जनङ्गमः । '(जने? गम)श्च' (३. २. ४७) इति खच् । निषाद उक्तः । श्वानं पचतीति श्वपचः । पचादिषु श्वपचपाठादच् । नगरादेरन्ते वसतीति णिनिः । सप्तम्या अलुक् । अन्तेवासी ॥

"अन्तेवासी च चण्डालो दिवाकीर्तिर्जनङ्गमः"

इत्यमरमाला । पुमांसं कसति गच्छतीति पुल्कसः, दन्त्यसः पृषोदरादिश्च ॥

भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः ॥ २० ॥

क्षीर०—किराताद्याः तथा म्लेच्छजातीयाः धुर्ल्लभेदादयः चण्डालभेदाः । किरति शरान् किरातः । शवत्यरण्यं शवरः । पोलति भ्रमति पुलिन्दः । एतेऽरण्यचरा देशभेदाद् भिन्नाः । म्लेच्छत्यव्यक्तं वक्ति म्लेच्छः ।

निष्या माला भटा भिल्ला नाहलाश्चान्त्यजाः पृथक् ॥

टीका० — एते किरातादयस्त्रयश्चण्डालानां भेदाः । म्लेच्छन्ति अव्यक्तं भाषन्त इति म्लेच्छाः । 'म्लेच्छ अव्यक्तायां वाचि' । पचाद्यच् । तदुक्तं—

"गोमांसभक्षको यस्तु लोकबाह्यं च भाषते ।
सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते ॥"

---

१. 'कुटच' ग. घ. ङ. पाठः. २. 'तः ॥ भे' ख. पाठः. ३. 'चतिपा' ज. पाठः. ४. 'र्गे' ग. घ. ङ. पाठः.

---

* अत्र मानं मृग्यम् ।

तत्र मयूरपिञ्छपरिधानो म्लेच्छः। पत्रपरिधानः शबरः। पत्रशबरशब्दोऽप्यत्र वर्तते। ('श्रु ? शु) स्रु गतौ'। 'कृदराद्यश्च' (उ० ५. ४१) इत्यरन्। शबरः। स्वभाषाव्यवहारी परभाषानभिज्ञः पुलिन्दः। 'पुल महत्त्वे'। *'कलिपुलिभ्यां किन्दच्' (उ० ४. ८६)। पुलिन्दः॥

"पुलिन्दः कथ्यते म्लेच्छः पुलिन्द्रोऽपि निगद्यते"
इति तारपालः॥

व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च सः।

क्षीर०—विध्यति व्याधः। 'श्याद्व्यधा—' (३. १. १४१) इति णः। मृगान् याति मृगयते वा मृगयुः। लुभ्यति गृध्यति मांसं लुब्धकः॥

टीका०—व्याधचतुष्कं व्याधे। स च म्लेच्छप्रकारो गीतादिना हरिणादीन् हन्ति। 'श्याद्व्यधा—' (३. १. १४१) इत्यादिना णः। व्याधः। मृगवधमाजीवतीति मृगवधाजीवः। मृगान् वधार्थं याति धावतीति मृगयुः। 'मृगय्वादयश्च' (उ० १. ३९) इति कुः। मृगेषु लुब्धः प्रसक्तो लुब्धकः॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः॥ २१॥
शुनको भषकः श्वा स्याद्

क्षीर०—कुले गृहे भवः कौलेयकः। 'कुलकुक्षिग्रीवाभ्यः श्वास्य-लङ्कारेषु' (४. २. ९६) इति ढकञ्। सरमाया अपत्यं सारमेयः। कोकते कुक् चोरग्राही, कुक्शब्दं वा कुरति कुक्कुरः। 'कुर शब्दे'। मृगान् दशति मृगदंशकः। शुनति शुनकः। 'शुन गतौ'। भषति कुत्सितं भाषते भषकः। शवति श्वयति वा श्वा। मण्डली च। रथ्या-मृगो देश्याम्॥

टीका०—कौलेयकसप्तकं कुक्कुरे। कौक्षेयकवद् ढकञ्। कौलेयकः। सरमा शुनी, तदपत्यं सारमेयः दन्त्यादिः। 'कुक वृक आदाने'। 'मदुरादयश्च'

---

१. यौ', २. 'क्षीति', ३. 'शः। शु' ख. पाठः.

---

* 'कुणिपुल्योः किन्दच्' इति मुद्रितोणादिपाठः.

(उ० १. ४३) इति उरच् कुगागमश्च । एवमुणादौ कुक्कुरो मध्यरेफरहितो व्युत्पादितः । क्वुनि भषकः । 'श्वन्नुक्षन् —' (उ० १. १६५) इत्यादिना श्वयतेः श्वन् इति साधितः ॥

अलर्कस्तु स यो गरी ।

क्षीर० —सः श्वा सञ्जातगरप्रयोगः अल्यते वार्यते दंशनभयादलर्क उन्मत्तः श्वा ॥

टीका० — योगितो दत्तयोग उन्मत्तादिभावं प्रपन्नः श्वा अलर्कः ह्रस्वादिः ॥

श्वा विश्वकदुर्मृगयाकुशलः

क्षीर० —विश्वं कन्दत्याह्वयते विश्वकदुः । विगतं श्वकदनमस्येत्येके । विश्वकं द्रवति वा ॥

टीका० —आखेटकुशलः श्वा विश्वकदुः ॥

सरमा शुनी ॥ २२ ॥

क्षीर० —सरति सरमा देवशुनी । विशेषवृत्तिरपि सामान्येऽभिधानात् ॥

टीका० —कुक्कुर्यौ सरमाद्वयम् । सर्तेर्बाहुलकात् 'प्रथेरमच्' (उ० ५. ६९) । सरमा ॥

विट्चरः सूकरो ग्राम्यः

क्षीर० —विषं गूथं चरति विट्चरः । सूयते बहून् सूकरः ॥

टीका० —ग्रामभवे सूकरे विट्चरः । विषं विष्ठां चरतीत्यच् ॥

बर्करस्तरुणः पशुः ।

क्षीर० —बर्कते बर्करः । 'बृक आदाने' ॥

टीका० —तरुणपशुसामान्ये वर्करः[३] । मतभेदाद् वर्करो मेषशावक इति रक्षितः । 'बृक आदाने' । 'ऋच्छरन्' (उ० ३. १३१) इति बाहुलकोऽरन् ॥

---

१. 'व' ख. ग. घ. पाठः. २. 'क' ज. पाठः.

आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम्॥ २३॥

क्षीर०—आचोद्यन्ते भ्राम्यन्ते प्राणिनोऽत्राच्छोदनम्। चुदेश्छत्वम्। मृगान् व्ययति मृगव्यम्। मृगव्येति मुनिः। 'व्येञ् संवरणे'। आखेट्यन्ते प्राणिनोऽत्र आखेटः। 'खिट उत्त्रासने'। मृग्यन्तेऽस्यां प्राणिनो मृगया। मृगयाटाट्येति (यञ्? यक्शौ)। पापर्द्धिश्च॥

टीका०—आच्छोदनचतुष्कमाखेटके। मृगबाधो मृगव्यम्। 'व्यध ताडने'। 'अन्येष्वपि' इत्यपिशब्दाद् भावे डः। 'किट खिट उत्त्रासने'। घञ्। आखेटः। 'मृग अन्वेषणे'। चुरादिणिच्। 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्' (वा० ३.३.१०१) इति भावे शः। मृगया॥

दक्षिणारुर्लुब्धयोगाद् दक्षिणेर्मा कुरङ्गकः।

क्षीर०—लुब्धसंबन्धाद् दक्षिणे पार्श्वे अरुर्व्रणमस्य दक्षिणारुः। दक्षिणे ईर्मे व्रणमस्य दक्षिणेर्मा। 'दक्षिणेर्मा लुब्धयोगे' (५.४.१२६) इति साधुः। 'व्रणोऽस्त्रियामीर्ममरुरि'त्युक्तम्॥

टीका०—लुब्धयोगाद् दक्षिणारुः लुब्धकेन दक्षिणाङ्गे कृतव्रणो मृगः। दक्षिणेर्मा। दक्षिणाङ्गे ईर्मे व्रणमस्येति दक्षिणेर्मा नान्तः। 'दक्षिणेर्मा लुब्धयोगे' (५.४.१२६) इति समासान्तानिच्प्रत्ययान्तो निपातितः॥

चौरैकागारिकस्तेनदस्युतस्करमोषकाः॥ २४॥

प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः।

क्षीर०—चोरयति चोरः। स्वार्थेऽण्। चुराशीलो वा। छत्रादित्वाण्णः। एकस्मिन्नसहायेऽगारे भव ऐकागारिकः। 'ऐकागारिकट् चौरे' (५.१.११३) इति साधुः। स्तेनयति स्तेनः। 'स्तेन चौर्ये'। 'शास्त्या(न्नञ् विभ्यतः'? हृञविभ्यः) (उ० २.४८) इतीनचि स्त्येनः स्यात्। दस्यत्युपक्षिणोति दस्युः। तत् करोति तस्करः। 'तद्बृहतोः करपत्योः

---

१. 'ट' क. पाठः. २. 'व्यादीना' ग. पाठः. ३. 'म्। दक्षिणेर्मा मृगः। दक्षिण-

श्वोरदेवतयोः सुट् तलोपश्च' (ग० ६. १. १५७)। मुष्णाति मोषकः। प्रतिरुणद्धि प्रतिरोधी। परानास्कन्दयति परास्कन्दी। पाटयंश्चरति पाटच्चरः। पटच्चरे जीर्णवस्त्रे भवो वा। मलिनं म्लोच(य?)ति मलिम्लुचः। 'म्लुच स्तेयकरणे'। पारिपन्थिकः पश्यतोहरश्च। 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' (वा० ६. ३. २१) इति षष्ठ्या अलुक्।

व्यलीकं चातिसन्धानं वञ्चनं च प्रतारणम् ॥

टीका० — चौरदशकं **चोरे**। चुरा चौर्यं शीलमस्येति चौरः। 'छत्रादिभ्यो णः' (४. ४. ६२)। चुराशब्दे छत्रादिपाठादेव अङ्, णिज्लुक् च। पचाद्यचि चोरेशब्दोऽप्यत्र। णेऽपि क्वचिदण्कृतं कार्यं भवतीति स्त्रियां च ङीपि चौरी, तापसी च। एकमसहायं गृहं प्रयोजनमस्येति ऐकागारिकः 'ऐकागारिकट् चौरे' (५. १. ११३) इति निपातितः। टकारो ङीर्थः। अपरे तु इकट्प्रत्ययं वृद्धिं च निपातयन्ति। मोषार्थिनो ह्येकागारं प्रयोजनम्। 'स्तेन चौर्ये'। चुरादिणिच्। पचाद्यच्। स्तेनः। 'दसु चे'त्यत्र 'यजिमनिशुन्धिदसिजनिभ्यो युः' (उ० ३. २०)। दस्युः। तत् करोतीति तस्करः। 'तद्वृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपो वक्तव्यः' (ग० ६. १. १५७) इति पारस्करादित्वात् सुट्तलोपौ। 'मुष स्तेये'। ण्वुल्। मोषकः। प्रतिरोधिपरास्कन्दिनौ आवश्यकणिन्यन्तौ। पाटयंश्चरतीति पाटच्चरः। दीर्घवदादिः। मलिनं यथा स्यात् तथा म्लोचति गच्छतीति मलिम्लुचः। म्लुचेर्गत्यर्थाद् इगुपधलक्षणः कः। पृषोदरादित्वान्मलिननकारलोपः ॥

चौरिका स्तैन्यचौर्यं च स्तेयं

क्षीर० — चौरस्य भावश्चौरिका। मनोज्ञादित्वाद् वुञ्। ब्राह्मणादित्वात् ष्यञि चौर्यम्। स्तेनस्य भावः कर्म वा स्तैन्यम्। 'स्तेनादि'ति योगविभागात् ष्यञ्। 'स्तेनाद्यन्नलोपश्च' (५. १. १२५) इति स्तेयम् ॥

टीका० — चौरिकाचतुष्कं **चौरिकायाम्**। चौरस्य कर्म चौरिका। मनोज्ञादित्वाद् वुञ्। स्तेनस्य कर्म स्तेयम्। 'स्तेनाद् यन्नलोपश्च' (५. १.

---

१. चेति। प', २. 'र इत्यपि। णे' ठ. पाठः. ३. 'का। द्वन्द्वम' ख. पाठः.

१२९) इति यत् । स्तेनादिति योगविभागात् ष्यञ् । स्तैन्यम् । चोरस्य कर्म चौर्यं ष्यञन्तम् ॥

लोप्त्रं तु तद्धनम् ॥ २५ ॥

क्षीर० — लोप्यते लोप्त्रं चौर्यधनम् ॥

टीका० — तद्धनं चौरिकाधनं लोप्त्रम् । 'लुप्ल छेदने' । ष्ट्रन् । *'लोप्त्रमश्रुणि चौरिकम्' इति कान्ते विश्वप्रकाशः ॥

वितंसस्तृपकरणं बन्धनं मृगपक्षिणाम् ।

क्षीर० — मृगादिबन्धननिमित्तं जालवागुरादिसाधनं वितन्यते वितंसः, वितंस्यतेऽनेन वा । तंसिः सौत्रः ॥

टीका० — मृगाणां बन्धनोपायः स्नाय्वादिपाशसङ्गतः, पक्षिणां च बालपाशादियुक्तो वितंसः । 'तसि भूष अलङ्कारे' । विपूर्वाद् घञ् । पक्षे दीर्घः । वीतंसः ॥

उन्माथः कूटयन्त्रं स्याद्

क्षीर० — ऊर्ध्वयात्रा मथ्यतेऽनेन उन्माथः । छलेन यम्यतेऽनेन कूटयन्त्रम् । पाशयन्त्रमित्येके ॥

टीका० —आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्रोन्माथद्वयम् । 'मथे विलोडने' । 'ज्वलितिकसन्तेभ्यो णः' (३. १. १४०)। उन्माथः । कूटाख्यं यन्त्रं कूटयन्त्रम् ॥

वागुरा मृगबन्धनी ॥ २६ ॥

क्षीर० — रज्जुरिति शेषः । अवागूरयति मृगान् वागुरा । जालाकृतिः ॥

टीका० —वागुराद्वयं मृगबन्धनजाले ॥

शुल्वं वटाकरः स्त्री तु रज्जुस्त्रिषु वटी गुणः ।

क्षीर० — शुः पूजार्थोऽव्ययम् । पूजितं मीयते शुल्वं शुल्वं वा । वट्यते वेष्ट्यते वटाकरः, वटी च । सृज्यते रज्जुः । गुण्यतेऽभ्यस्यते

१. 'ते बध्यतेऽने' ख. पाठः. २. 'र' क. ख. पाठः.

* 'लोप्त्रं वस्तुनि चोरिते इति रान्ते विश्वप्रकाशः' इति पाठः स्यात् ।

गुणः । वटी गुण इति पृथगाहुः । 'वट वेष्टने' । (यो?यैः) वेष्टने द्विगुणा त्रिगुणा वा रज्जुर्वेष्ट्यते, ते वटा गुणाश्चेत्येके ॥

टीका० — शुल्बपञ्चकं वलितगुणे । शुल्बं तालव्यादि, क्लीबम् । 'रज्जुः शुल्बा वटारो ना' इति स्त्रीकाण्डे रत्नकोषः । 'वट वेष्टने' । 'अङ्गिमन्दि —' (उ० ३. १३४) इत्यादिना बाहुलकादारन् । ततः स्वार्थे कः । वटारकः । 'सृजेरसुमुश्च' (उ० १. १९) इति उप्रत्ययः असुमागमः, चकारात् सलोपः । ऋकारस्य यणादेशः, सकारस्य जश्त्वेन दकारः, दकारस्य च चुत्वेन जकारः । रज्जुः । 'वट वेष्टने' । इन् । 'कृदिकारादक्तिनः' (ग० ४. १. ४५) इति ङीषि वटी ॥

उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥ २७ ॥

क्षीर० — उद्घाट्यते प्रकाश्यते जलमनेनोद्घाटनम् । 'ऊर्ध्वं हन्यतेऽनेन उद्घा(टि?त)नम्' इति कौटिल्यः । प्रहेः कूपादेर्जलमूर्ध्वं वाह्यतेऽनेनोद्वाहनम् । पादावर्तोऽपि ॥

टीका० — प्रहेररघट्टकूपाद् येन यन्त्रेण जलमुत्तोल्यते, तत्रोद्घाटनद्वयम् । 'घट सङ्घाते' । चुरादिः । ल्युट् । उद्घाटनम् ॥

पुंसि वेमा वायदण्डः

क्षीर० — वयन्त्यनेन वेमा । ऊयते पीड्यते तन्तुसूत्रं येनेति वायः, तदर्थो दण्डः । वापदण्ड इति तु युक्तम् ॥

टीका० — वेमद्वयं वेमनि । 'वेञः सर्वत्र' (उ० ४. १५१) इति इमन् । वेमा नान्तः ॥

सूत्राणि नरि तन्तवः ।

क्षीर० — सूयते सूत्र्यते वा पटोऽनेन सूत्रम् । तन्यतेऽनेन तन्तुः ॥

---

१. 'सकारलो' ठ. पाठः. २. 'जने' ग. घ. पाठः. ३. 'भ्' । उत्पाटनम् इं', ४. 'उदपानादेः' ग. घ. ङ. पाठः.

टीका० — सूत्रद्वयं सूत्रे। 'षिवु तन्तुसन्ताने'। 'सिविमुच्योष्टेरू च' (उ० ४. १६४) इति ष्ट्रन्, ऊकारश्च टेः। सूत्रम्। 'तनु विस्तारे'। सेतुवत् तुः। नरि पुल्लिङ्गे तन्तुशब्द इत्यर्थः। छन्दःपूरणार्थं बहुत्वनिर्देशः। द्वित्वैकत्वयोरप्येतयोर्वृत्तिः॥

वाणिर्व्यूतिः स्त्रियौ तुल्ये

क्षीर० — वयनं* वाणिः। (व्यूतिः। 'ऊतियूति—' (३.३.९७) इति साधुः?) व्यूत एव निष्पववाणिर्नवः पटः। वयनं वानिः। निवृत्ते वयने निष्पववाणिः। पुंस्येव मन्यते नवः पटः। वयनं व्यूतिः। 'ऊतियूति—'(३. ३. ९७) इति साधुः। तुल्या च तुल्या च तुल्ये द्वे॥

टीका० — वाणिद्वयं वयनक्रियायाम्। वेञो विपूर्वाद् 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (३. ३. ९७) इति क्तिन्। संप्रसारणोकारस्य दीर्घत्वनिपातनाद् व्यूतिः। वृत्तौ तु अवतेरूतिरिति निपातितम्। तन्मते अवतेः क्तिन्। 'ज्वरत्वर—'(६. ४. २०) इत्यादिना ऊठ्। विपूर्वः॥

पुस्तं लेप्यादिकर्मणि॥ २८॥

क्षीर० — पुस्यते मृद्यते मृदत्र पुस्तम्। पुस्तं आदरे वा॥

टीका० — लेप्यादिकर्म पुस्तमुच्यते। आदिना काष्ठखननकर्म गृह्यते। 'पुस्त बुस्त आदरानादरयोः'। चुरादिणिच्। एरच्।

"मृदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्मणा।
लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते"॥

पाञ्चालिका पुत्रिका स्याद् वस्त्रदन्तादिभिः कृता।

क्षीर० — पञ्चालदेशे भवा पाञ्चालिका, यया बालाः खेलन्ति। 'यावादिभ्यः कन्' (५. ४. २९) इत्यत्र 'कृत्रिम' इति कन्। पुत्रिका। पुत्रकृत्योरिकन्(वा)॥

---

१. 'त्वबहुत्व', २. 'णी' क. पाठः. ३. 'व्येनादि' ग. घ., 'व्यूनादि' ङ. पाठः. ४. 'मृद्यते', ५. 'ते पु', ६. 'स' ख. पाठः.

---

* वयनशब्दो वेञ औणादिकेन शिता साध्यः।

टीका० — पाञ्चालिकाद्वयं पुत्तलीकेति ख्यातायाम्। 'पुत्र कृत्रिमे' इति यावादिगणसूत्रेण कन्। पुत्रिका। आदिना शृङ्गकाष्ठादिग्रहणम् ॥

स्यात् सालभञ्जिका स्तम्भे लेप्येनाञ्जालिकारिका ॥२९॥

जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु।

क्षीर० — 'त्रपुजतुनोः षुक्' (४. ३. १३८) ॥

पिटकः पेटकः पेटा मञ्जूषा

'पीड गहने'। 'पीङ् पाने'। अस्माद् वा पीडेति[1] श्रीभोजः (?)।* मञ्जु मनोज्ञं कृत्वा वस्त्राद्यैरुप्यतेऽत्र मञ्जूषा। आद्यौ घेटारिकायां, परौ महत्याम् ॥

टीका० — पिटकद्वयं पेडा इति ख्याते। 'पिट शब्दसङ्घातयोः'। यथाक्रमं कुन्ण्वुलौ। पेटाद्वयं काष्ठादिमञ्जूषायाम्। 'टु मस्जो शुद्धौ'। 'मस्जेर्नुं च' (उ० ४. ७८) इति ऊषन्नुमागमौ। मञ्ज्जूषा द्विजकारा। 'झरो झरि सवर्णे' (८. ४. ६५) इति सलोपपक्षे एकजकारा मञ्जूषा ॥

अथ विहङ्गिका ॥ ३० ॥

भारयष्टिः

क्षीर० — विहङ्गप्रतिकृतिश्चर्मादिमयी (वहित्यादौ?) लम्बमाना स्थाप्यते प्रयाणके च सञ्चार्यते। भारोद्वहनार्था यष्टिः। 'चतुर्दण्डिके'ति सभ्याः। शिक्याधारस्कन्धग्राह्यो लगुड[2] इति द्रमिडाः। विहङ्गमेत्येके ॥

टीका० — विहङ्गमाद्वयं बाहुकेति[3] ख्याते। पक्षिपर्याये विहङ्गमा साधिता। क्वचिद् विहङ्गिकेति पाठः ॥

तदालम्बः शिक्यं काचः

क्षीर० — तदालम्बो भारालम्बः, तस्या अवलम्बते वा। शक्नोति वोढुं शिक्यम्। अघ्न्यादि। कच्यतेऽनेन काचः। 'कच बन्धने'। यत्र रज्जुपञ्जरे वोढव्यमास्ते ॥

---

१. 'डयतीति' ग. घ. ङ. पाठः. २. 'कुट इ' ख. पाठः. ३. 'गे' क. पाठः.

---

* "पिट शब्दसंघातयोः'। पेटति। पिटकः पेटकः पेटा मञ्जूषा। पिटः पिटक कण्डोलः। पिठकं विस्फोटः।" इति क्षीरतरङ्गिणी।

टीका० — शिक्यद्वयं शिक्ये । शिक्यं तालव्यशम् ॥

अथ पादुका ।

पादूरुपानत् स्त्री

क्षीर० — पद्यतेऽनया पादूः । 'णित्कसिपद्यर्तेः' (उ० १. ८८) । स्वार्थे कः । 'केऽणः' (७. ४. १३) इति ह्रस्वः । पादुका । उपनह्यत इत्युपानत् । 'नहिवृति —' (६. ३. ११६) इति दीर्घः । पादत्राणं च ॥

टीका० — पादुकात्रयं पादुकायाम् । 'णित्कसिपद्यर्तेः' (उ० १. ८८) इति ऊः । णित्वाद् वृद्धिः । पादूरेव पादुका । स्वार्थे कन् । 'केऽणः' (७. ४. १३) इति ह्रस्वः । 'णह बन्धने' । सम्पदादिक्विप् । 'नहिवृति —' (६. ३. ११६) इत्यादिना पूर्वपददीर्घः । पदान्ते 'नहो धः' (८. २. ३४) इति हस्य धः । चर्त्वम् । तकारः । उपानत्, हन्ता ॥

सैवानुपदीना पदायता ॥ ३१ ॥

क्षीर० — अनुपदं पदायामेन बद्धा अनुपदीना । 'अनुपदसर्वा —' (५. २. ९) इति खः ॥

टीका० — पदायता पादप्रमाणा पादूः अनुपदीना । अनुपदसर्वान्नायानयं बद्धामक्षयतिनेयेषु' (५. २. ९) इति खः ॥

नभ्री वर्भ्री वरत्रा स्यात्

क्षीर० — नह्यति बध्नाति नभ्री । वर्धते दीर्घीभवति चर्मरज्जुत्वाद् वर्भ्री । व्रियतेऽनया वरत्रा । 'वरत्रा (वेत्र) वेणवी'ति तु चाणक्यस्तन्त्राध्यक्षे* उपचारादाख्यत् ॥

टीका० — नभ्रीत्रयं चर्मरज्ज्वाम् । 'णह बन्धने' । 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' (३. २. १८२) इति ष्ट्रन् । 'नहो धः' (८. २. ३४) इति धत्वम् । षित्त्वात् ङीप् । नभ्री । 'वृधिवपिभ्यां रन्' (उ० २. ३०) इति वृधे रन् । गौरादिङीप् । वर्भ्री । 'वार्भ्री दीर्घवदादिरि'ति हड्डचन्द्रः । 'वृञश्चित्' (उ० ३. १०७) इत्यत्रन् । वरत्रा ॥

* कौटिलीयार्थशास्त्रे सूत्राध्यक्षे अधि० २. अध्या० २३. प्रक० ४०.

अश्वादेस्ताडनी कशा ।

क्षीर० — कशति कशा चर्मयष्टिः ॥

टीका० — वामाठीति[1] ख्यातायां कशा । आदिना उष्ट्रादेः[2] । कश-स्तालव्यान्तः सौत्रः । पचाद्यच् ॥

चाण्डालिका तु कण्डोलवीणा चाण्डालवल्लकी ॥ ३२ ॥

क्षीर० — चण्डालस्येयं चाण्डालिका । कथ्यते[3] तन्त्रीभिरात्रि-यते कण्डोलवीणा किन्नराख्या[4] ॥

टीका० — चाण्डालिकात्रयं चण्डालवीणायाम्[5] । चण्डालेन कृता चा-ण्डालिका । 'कुलालादिभ्यो वुञ्' (४. ३. ११८) । 'कटे वर्षावरणयोः' । कपोलवद् ओलच् । कटोलश्चण्डालः । तस्य वीणा कटोलवीणा ॥

नाराची स्यादेषणिका

क्षीर० — नरम् अञ्चति नराङ्, तस्येयं नाराची । अन्विष्यते (व्रणोऽवर्णो)ऽनयेत्येषणिका । स्वर्णतुलेतीह युक्तम् ॥

टीका० — नाराचीद्वयं नाराचीकृतलोहतुलायाम्[6] । इच्छतेः करणे ल्युट् । 'एषणात् करणे' (ग० ४. १. ४१) इति ङीष् । एषणी ॥

शाणस्तु निकषः कषः ।

क्षीर० — श्यति तनूकरोति शाणः । निकष्यत तत्र निकषः । 'गोचरसञ्चर —' (३. ३. ११९) इति चकारात् साधुः । पुंसि संज्ञायां घो वा । एवं कषः । निकषोपल इत्येके । पचाद्यच्[7] । मणिकारादिभा-ण्डमाहुः । यन्मुनिः — 'शाणश्च निकषोपलः' ॥

टीका० — शाणत्रयं कर्षपट्टिकायाम्[8] । 'शण श्रण दाने' । घञ् । शाणस्तालव्यादिः । निकषकषौ घप्रत्ययान्तौ ॥

---

१. 'डी', २. 'अश्वादेरित्यादिना उष्ट्रादेर्ग्रहणम् । कशः सौ' ठ. पाठः. ३. 'ण्ड्य' क. च. पाठः. ४. 'किन्दरा इति ख्यातायाम् । चण्डाले' क. च. ज. पाठः. ५. 'चा' ग. घ. ङ. पाठः. ६. 'च' ग. पाठः. ७. 'णः । नि' ठ. पाठः.

व्रश्चनः पत्रपरशुः

क्षीर० — व्रश्चति छिनत्ति व्रश्चनः। पत्राकारः पत्राणां वा परशुः॥

टीका० — व्रश्चनद्वयं स्वर्णादिच्छेदनिकायाम्। 'ओ व्रश्चू छेदने'। करणे ल्युट्। व्रश्चनः। पत्रमिव परशुः॥

ईषिका तूलिका समे॥ ३३॥

क्षीर० — ईषति ईषिका। 'ईष उञ्छे'। काष्ठलोहादिमयी शलाका। तूल्यते तूलिका। 'तूल निष्कर्षे'। इषीकेत्येके। 'शलाकेषिकयोस्तूलिरि'ति भ्रुग्नो भेदेनाह॥

टीका० — सामान्येन वीरणादिशलाकायामिषीकाद्वयम्। केचित् चित्रकरकूर्चिकायाम्। आवर्तितमनावर्तितं वा सुवर्णं ज्ञातुं यन्निक्षिप्यते तत्रेत्यपरे। इषीका गजाक्षिकूटपर्याये व्युत्पादिता। 'तूल निष्कर्षे'। क्वुन्। तूलिका॥

तैजसावर्तनी मूषा

क्षीर० — तैजसं हेमादि आवर्त्यते द्रवीक्रियतेऽस्यां तैजसावर्तनी। मूयतेऽस्यां मूषा। 'मूङ् बन्धने'॥

टीका० — तैजसावर्तनीद्वयं मूषायाम्। मुषः 'गुरोश्च हलः' (३. ३. १०३) इत्यप्रत्यये टापि 'अन्येषामपि —' (६. ३. १३७) इति दीर्घत्वे मूषा। 'मूषा त्वावर्तनी मूषी'ति शब्दार्णवः॥

भस्त्रा चर्मप्रसेविका।

क्षीर० — बभस्ति भक्षयतीव स्थाप्यं भस्त्रा। चर्ममयी, प्रसीव्यते, प्रसेविका। प्रसेवकोऽपि॥

टीका० — भस्त्राद्वयं भस्त्रायाम्। 'भस भर्त्सनदीप्त्योः'। 'हुयामाश्रुस्रुभसिभ्यस्त्रन्' (उ० ४. १६९)। 'तितुत्र —' (७. २. ९) इत्यादिना इडभावः॥

---

१. 'षि' क. ङ. पाठः. २. 'भास्त्रीति ख्यातायां' क. ग. पाठः,

आस्फोटनी वेधनिका

क्षीर० — **आस्फोट्यते विध्यतेऽनया मौक्तिकादि** ॥

टीका० — मणिशङ्खादेर्वेधनी भ्रमः[1]। तत्र लास्फोटनीद्वयम्। लडति स्फोटयतीति लास्फोटनी। पृषोदरादिः ॥

कृपाणी कर्त्तरी समे ॥ ३४ ॥

क्षीर० — **कल्प्यते भिद्यतेऽनया कृपाणी। कर्त्यतेऽनया कर्त्तरी** ॥

टीका० — कृपाणीद्वयं पत्रीकृतसुवर्णादेः कर्तनोपाये[2] कासीति ख्याते, नापितकेशकर्तरिकायां वा। 'कृती छेदने'। बाहुलकादरन्। गौरादिङीष्। कर्तरी ॥

वृक्षादनो वृक्षभेदी

क्षीर० — **वृक्षोऽद्यते छिद्यतेऽनेन शस्त्रकेण वृक्षादनः** ॥

टीका० — वृक्षादनद्वयं वृक्षभेदि[3]नि। वृक्षादनो नन्द्यादिः। वृक्षभेदी नान्तः ॥

टङ्कः पाषाणदारणः।

क्षीर० — **टङ्क्यतेऽनेन टङ्कः। 'टकि बन्धने'। हन्यमानः टंशब्दं कायतीति वा** ॥

टीका० — टङ्कद्वयं पाषाणदारणे। 'टकि बन्धने'। चुरादिणिच्। 'एरच्' (१. ३. ५६)। अतः परमार्याद्वयम् * ॥

ककचोऽस्त्री करपत्रं

क्षीर० — **'क' शब्दोच्चारणेन कचति ककचः। करसञ्चार्य शस्त्रं करपत्रम्। करशब्दोच्चारणेन पतति वा** ॥

---

१ 'मरः। त' ग. ठ. पाठः। २. 'ये। ना' ठ. पाठः. ३. 'नीआणेति ख्याते। वृ' ४. 'टङ्कीति ख्याते। ट' क. ग. पाठः.

---

* अत्र प्रथमार्या "ककचोऽस्त्री करपत्रं स्यादारा चर्मभेदिका चैव। सूर्मी स्थूणा लोहप्रतिमा शिल्पं कलादिकं कर्म ॥" इति पाठेन सम्पाद्या।

टीका० — ककचद्वयं करवर्त इति ख्याते। ककचोऽस्त्रीति सम्बन्धः। चवर्गान्तोऽयम्। नाममालायां तु क्लीबं ककचम्॥

स्यादारा चर्मभेदिका॥ ३५॥

क्षीर० — इयर्त्त्यनयेत्यारा। भिदादौ आरा शस्त्र्यां साधुः। चर्मसीवनी॥

टीका० — चर्मकाराणां चर्मवेधनं लोहद्रव्यम् आरा। 'ऋ गतौ'। आङ्पूर्वाद् भिदादिगणसूत्रेण 'आरा शस्त्र्याम्' (ग० ३. ३. १०४) इति निपातिता। अङ्प्रत्ययः। 'ऋदृशोऽङि गुणः' (७. ४. १६)। सवर्णदीर्घत्वम्। ततष्टाप्॥

सूर्मिः स्थूणायःप्रतिमा

क्षीर० — सुवति सूर्मिः। शोभनोर्मिरित्येके। तिष्ठति स्थूणा। यच्छाश्वतः — 'स्थूणा स्तम्भे च सूर्म्यां च'। अयोमयी प्रतिकृतिः। यत् स्मृतिः—

"सूर्मिं ज्वलन्तीमालिङ्गेन्मृत्यवे गुरुतल्पगः"॥

टीका० — सूर्मीत्रयं लोहप्रतिमायाम्।

"स्वच्छभिर्बलिभिरक्षदुन्दुभिर्नाभिगोमुरभिजानि(?)शूर्मयः"

इत्यरुणः। 'सृ गतौ'। 'ग्रीष्मजालमादय' इति मप्रत्यये सूरादेशे च गौरादिङीषि सूर्मी। 'चुल्लीति महान्यास' इति उपाध्यायसर्वस्वम्। तिष्ठतेः 'रास्नासास्थूणा—' (उ० ३. १५) इत्यादिना नक्, अन्त्यस्योकारः, णत्वं च। स्थूणा॥

सिल्पं कर्म कलादिकम्॥३५½॥

क्षीर० — सिनोति सिल्पम्। 'षिञ् बन्धने'। 'सिल उञ्छे'। अस्माद् वा। कला गीताद्याश्चतुष्षष्टिः। आदिशब्दः प्रकारे॥

टीका० — वात्स्यायनोक्तनृत्तवाद्यादिचतुष्षष्टिर्बाह्यक्रियाः, तथालि-

---

१. 'शू' ग. ङ. पाठः. २. 'मू। सृ' ठ. पाठः. ३., ४., ५. 'शि' ग, घ, ङ. पाठः,

ञ्जनचुम्बनाद्याश्चाभ्यन्तराश्चतुष्षष्टिः क्रियाः कलाः । आदिना स्वर्णकारादिकर्म तत् सर्वं शिल्पम् । तालव्यादिः ॥

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया ।
प्रतिकृतिरर्चा पुंसि प्रतिनिधिः

क्षीर० — प्रतिमीयतेऽनेन प्रतिमानं, प्रतिमा च । प्रतिबिम्ब्यते प्रतिबिम्बं, बिम्बसदृशं वा । प्रतियातयत्यनया[1] प्रतियातना । 'यत निकारोपसंस्कारयोः' । अर्च्यते अर्चा । प्रतिनिधीयते प्रतिनिधिर्मुख्यसदृशः । प्रतिरूपं प्रतिच्छन्दः प्रतिकायश्च ॥

टीका०— प्रतिमानाष्टकं मूर्त्तिसदृशशिलादिनिर्मितप्रतिरूपके । सर्वमेव साधितम् ॥

उपमोपमानं स्यात् ॥३६½॥

क्षीर० — उपमितिरुपमा । केचिदेतत् पूर्वैः सम्बध्नन्ति ॥

टीका० — उपमाद्वयं येनोपमीयते या, सोपमितिस्तत्र । मातेः 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । उपमा ॥

वाच्यलिङ्गाः समस्तुल्यः सदृक्षः सदृशः सदृक् ॥ ३७ ॥
साधारणः समानश्च

क्षीर० — सह माति समः । तुलया सम्मितस्तुल्यः । 'नौवयोधर्म—' (४. ४. ९१) इति यत् । समान इव दृश्यते । 'त्यदादिषु दृशोऽनालोचने कञ्च' (३. २. ६०) इति 'समानान्ययोश्चे'ति वक्तव्यात् कञ् किंश्च । 'दृग्दृशवतुषु' (६. ३. ८९) इति समानस्य सः । समानम् आधारणं मानं चास्य साधारणः समानश्च ॥

टीका० — समसप्तकं तुल्ये । एते वाच्यलिङ्गाः । 'षम ष्टम शब्दे' । पचादिः । समः । तुलया सम्मितस्तुल्यः । 'नौवयोधर्म—' (४. ४. ९१) इत्यादिना यत् । समान इव दृश्यत इति सदृक्षः । सदृक् शान्तः । 'दृशेः क्सनप्रत्ययो वक्तव्यः' (वा० ३. २. ६०) इति क्सन् । व्रश्चादिना षत्वम् । 'षढोः कः सि' (८. २. ४१) इति कुत्वम् । 'दृक्षे चेति

---

१. 'यात्य' ग. घ. ङ. पाठः. २. 'या । य' ख. पाठः.

वक्तव्यम्' (वा० ६. ३. ८९) इति समानस्य सभावः। सदृक्षः। 'समानान्ययोश्चेति वक्तव्यम्' (वा० ३. २. ६०) इति कञ्क्विनौ। 'दृक्दृशवतुषु' (६. ३. ८९) इति समानस्य सभावः। सदृशः सदृक्। 'आग्नीध्रसाधारणादञ् वक्तव्यः' (वा० ९. ४. ३६) इति स्वार्थेऽञ्विकल्पः। तेन स्त्रियामञ्पक्षे टिड्ढाणञ्—' (४. १. १९) इत्यादिना ङीप्। साधारणी। कनि टापि साधारणा॥

स्युरुत्तरपदे त्वमी।
निभसङ्काशनीकाशप्रतीकाशोपमादयः॥ ३८॥

क्षीर०—वाच्यलिङ्गास्तुल्यार्थाश्चैते। यथा चन्द्रनिभं मुखम्, पद्मसङ्काशम्। नियतं भाति निभम्। समं काशते सङ्काशम्। आदिशब्दाच्चन्द्रप्रतिमः, पतिरूपः, आयामभूतः इत्यादि। चन्द्रेण निभ इत्यादौ न भवति। समास एवोत्तरपदत्वस्य रूढेः॥

टीका०—निभादयस्तूत्तरपदभूताः सन्तः सदृशवचनाः, वाच्यलिङ्गा इति परं पूर्वस्माद् विशेषः। उदाहरणं तु पितृनिभः, मातृसंकाशः। 'काशृ दीप्तौ'। तालव्यान्तः। घञि संकाशः। पचाद्यचि 'इकः काशे' (६. ३. १२३) इति पूर्वपददीर्घत्वे नीकाशः। घञि प्रतीकाशः। आदिना भूतरूपकल्पानां ग्रहणम्। यथा पितृकल्पः पितृरूपः पितृभूतः॥

कर्मण्या तु विधाभृत्याभृतयो भर्म वेतनम्।
भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि॥ ३९॥

क्षीर०—कर्मणि साधुः कर्मण्यः। विधीयतेऽनया विधा, लक्ष्ये भोजनपिण्डे रूढा। भ्रियतेऽनयेति 'संज्ञायां समज—' (३. ३. ९९) इति क्यपि साधुः। 'स्त्रियां क्तिन्' (३. ३. ९४)। मनिन्। ल्युट् तुट् च, वीयतेऽनेन वेतनम्। 'वी गत्यादौ'। भरणे साधु भरण्यम्। मूलेनानाम्यं मूल्यम्। नौवयोधर्म—' (४. ४. ९१) इति यत्। निर्विश्यते भुज्यते निर्वेशः। पण्यते आभाष्यते पणः। 'नित्यं पणः परिमाणे' (३. ३. ६६) इति साधुः॥

---

१. 'ण्या, भरण्यं वा। वि' ग. घ. ङ, 'ण्या। अनुवि' ख. पाठः.

टीका० — कर्मण्यैकादशकं **वेतने** । कर्मणा संपद्यत इति कर्मण्या । 'कर्मवेशाद् यत्' (५. १. १००) । 'ये चाभावकर्मणोः' (६. ४. १६८) इति प्रकृतिभावः । धाञोऽङ् । विधा । भृञः 'संज्ञायां समज —' (३. ३. ९९) इत्यादिना क्यप् । भृत्या । 'कर्मणि भृतौ' (३. २. २२) इति निपातनात् क्तिनि भृतिः । मनिना भर्म । 'वी गत्यादौ' । 'वीपथिभ्यां तनन्' (उ० ३. ५१) । वेतनम् । 'राजेरन्यः' (उ० ३. १००) इति बाहुलकोऽन्यः । भरण्यम् । ल्युटि भरणम् । मूल्यैपणौ साधितौ । वेश उक्तः । निर्पूर्वाद् निर्वेशः ॥

सुरा हलिप्रिया हाला परिस्रुद् वरुणात्मजा ।
गन्धोत्तमा प्रसन्नेरा कादम्बर्या परिस्रुता ॥ ४० ॥
मदिरा कश्यमद्ये चापि

क्षीर० — **सूयते परिवास्यते सुरा । हलिनो बलस्य प्रिया । जहाति लज्जामनया हाला । हलति विलिखति वाङ्मुम् । ज्वलादित्वाण्णः । परिस्रवति परिस्रुत् । परिस्रुता च । वरुणात्मजा वारुणी, समुद्रोत्थत्वात् । गन्धेनोत्तमा गन्धोत्तमा । प्रसीदति प्रसन्ना, अच्छसुरा । एति भ्राम्यत्यनया इरा । कुत्सिताम्बरस्य नीलवासस इयं कादम्बरी । सहार्थे तृतीया । माद्यन्त्यनया मदिरा । कश्यिदेशे भवं कश्यम् । मदे साधु मद्यं, माद्यत्यनेन वा । 'कृत्यल्युटो बहुलम्' (३. ३. ११३) इति करणे 'गदमद—' (३. १. १००) इति यत् । स्वादुरसा मदिष्ठा, कल्या, हारहूरा, कापिशायनं च ॥**

टीका० — सुरात्रयोदशकं **मद्ये** । सुपूर्वाद् रातेरङि सुरा । बलभद्ररुच्यत्वाद् हलिप्रिया । 'स्रु गतौ' । क्विपि परिस्रुत् तान्ता । मथनकाले सागरादियं वरुणसुता जातेत्यतो वरुणात्मजा । तदुक्तं —

"वरुणस्य ततः कन्या प्रार्थ्यमाना परिग्रहम्"

इति । सीदतेः क्तः । प्रसन्ना । इः कामः, तं रातीति इरा ह्रस्वादिः । 'आतोऽनुपसर्गे कः' (३. २. ३) । गोमन्तपर्वते कदम्बकोटरजत्वात् कादम्बरी । तदुक्तं —

---

१. 'ङ् । अनुवि' ग. पाठः. २. 'ल' क. पाठः. ३. 'चार्यतेऽनया सु' ग. घ. ङ. पाठः. ४. 'मा । प्र' ख. पाठः.

"कदम्बकोटराज्जाता नाम्ना कादम्बरी तु सा।"

नैरुक्तो वर्णसङ्घातलोपः। मुदिरवत् किरचि मदिरा। काशिः सौत्रस्तालव्यान्तः। 'जनेर्यक्' (उ० ४. ११२) इति बाहुलको यक्। कश्यम्। 'गदमदचरयमश्चानुपसर्गे' (३. १. १००) इति मद्यम्॥

अवदंशस्तु भक्षणम्।

क्षीर० — अवदश्यते पानरुचिजननार्थमवदंशः खरविदंशमभ्यवहार्यम्। चर्वणमुपदंशश्च॥

टीका० — ओडशिकायामुपदंशः॥

शुण्डा पानमदस्थानं

क्षीर० — शु(ण्ड्य?ण्य)ते शुण्डा। 'शुण गतौ'। पानमदयोरास्पदं कल्यापालगृहैकदेशः। शाश्वतस्तु —

"कुञ्जराणां करः शुण्डा शुण्डा कादम्बरी मता"॥

टीका० — शुण्डात्रयं पानागारे। पिबन्त्यस्मिन्निति पानम्। शुण्डा तालव्यादिः। पिबतां मदस्तत्रोपजायत इति मदस्थानम्॥

मधुवारा मधुक्रमाः॥ ३९॥

क्षीर० — क्रमेण मधुपानावसराः॥

टीका० — असकृन्मधुपानक्रमे मधुवारद्वयम्। वारः क्रमः परिपाटिरिति पर्यायाः। षष्ठीसमासः। बहुत्वाद् बहुवचनम्॥

क्षीर० — "गौडी पैष्टी च माध्वी च (प?फ)लोत्था च सुरा स्मृता" इति सुराया भेदानाह —

मध्वासवो माधवकः

मांक्षिकमिश्रम् आसूयते मध्वासवः। मधुनो विकारो मधुकृतो वा माधवकः। कुलालादित्वाद् वुञ्॥

---

१. 'क्षीरमि' ग. घ. पाठः.

मधु माद्वीकमद्ययोः ।

मद्यते मधु माद्यत्यनेन वा । मृद्वीकाया विकारो माद्वीकम् । माध्वीकमित्युपाध्यायः । मद्यस्योक्तत्वाद्द्वयोरित्येके पेठुः । तन्न । सामान्यविशेषरूपत्वात् ॥

टीका० —**मधूकपुष्पकृते मद्ये** मध्वासवचतुष्कम् । मधूकपुष्पं मधु, तस्यासवः सन्धानं मध्वासवः । मधुना कृतो माधवकः । 'कुलालादिभ्यो वुञ्' (४. ३. ११८) । मधुप्रकृतित्वान्मधु । मृद्वीका द्राक्षा, तस्या विकारो माद्वीकम् । एतत् तु 'पचाम मधु माध्वीकमि'त्यत्र टीकाकृतोक्तम् । न द्वयोः नपुंसकमेवेत्यर्थः ॥

मैरेयमासवः शीधुः

क्षीर० —**मिरायां देशे भवो गौड्याः सुराया विशेषो मैरेयः । शेरतेऽनेन शीधुः । शीथोरित्येके पठित्वा शीधुप्रकृतिक इति व्याख्यन् । यदाहुः —'मध्वासवस्तु मैरेयम्' । तन्न । यन्माला —'मैरेयो गदितः शीधुः' । पक्वरसोऽपि ॥**

टीका० —मैरेयत्रयं **मद्यविशेषे** । यद्यपि—

"शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधानाम्बुसंहितम् ॥"

इति माधवः, तथापि सूक्ष्मभेदमनादृत्यैतदुक्तम् । 'शीङ्स्थुक्लक्वलञ्वालञः' (उ० ४. ३८) इति थुक्प्रत्ययः । अर्धर्चादिपाठात् पक्षे क्लीबम् । शीथोः परेण सम्बन्ध इत्यन्यः ॥

मेदको जगलः समौ ॥ ४० ॥

क्षीर० —**मेद्यति स्निह्यत्यनेन मेदकः । भृशं गलतीति जगलः सुरायाः सन्धानद्रव्यपङ्कः ॥**

---

१. 'न्य' ग. घ. ङ. पाठः. २. 'मि' क. पाठः. ३. 'म् । य' क. ख. पाठः. ४. 'च' क ङ. ठ. पाठः. ५. 'ङो धुक्', ६. 'धु' ङ. ज. पाठः.

टीका० — मेदकद्वयं **सुराकल्के**। जगलः चवर्गादिः।

"मद(नादौ? नद्रौ) पिष्टमद्ये जगले धूर्तमेदके"

इति रभसः॥

सन्धानं स्यादभिषवः

क्षीर० — सन्धीयते सन्धानं, वंशाङ्कुरफलादीन् बहुकालं सन्धाय यत् क्रियते। अभिषूयते चिरं क्लेद्यते अभिषवः। भावसाधनो वा। सुरासन्धौ वर्तते॥

टीका० — सुरासन्धानेऽभिषवद्वयम्। धाञो ल्युट्। सन्धानम्। स्नानेऽभिषव उक्तः॥

किण्वं पुंसि तु नग्नहूः।

क्षीर० — कॅणति कीयते वा सुरानेन किण्वं, माषदलव्योषादि सुराबीजाख्यम्। नग्नेन(हू? ह्व)यते स्पर्धते सुरास्वादनाभावाद् नग्नहूः। नग्नहुर्मालायाम्॥

टीका० — नानाद्रव्यकृते सुराबीजे किण्वद्वयम्। नग्नमाह्वयत इति नग्नहूः नग्नहौ नग्नहूः। 'ह्वयतेश्च' इति किप्। अव्युत्पन्नोऽयमुकारान्त इत्यन्यः।

"विद्याद् देयमृणं परिवृत्ते नग्नहुं किण्वम्"

इति नाममाला। 'क्लीबे किण्वं च नग्नहुरि'त्यमरमाला च॥

कारोत्तमः सुरामण्डः

क्षीर० — कारेण क्रियया वश्यान्मुख्यः कारोत्तमः। सुरा(त्थाः? त्यः) स्वच्छभागः॥

टीका० — सुराया मण्डेऽग्रभागे कारोत्तरः॥

---

१. 'तं' क. पाठः. २. 'किं' ख. पाठः. ३. 'ण्वः' ग. घ. ङ. पाठः. ४. 'किं', ५. 'की', ६. 'च्छा' क. ग. घ. पाठः. ७. 'ला॥' ग. पाठः. ८. 'रापाथो मूर्छाभा' ग. घ. ङ. पाठः.

आपानं पानगोष्ठिका ॥ ४१ ॥

क्षीर० — आपीयतेऽस्मिन्नापानम् । पानाय गोष्ठी आसनं पानगोष्ठी । गावो नानाविधा वाचस्तिष्ठन्त्यत्रेति ॥

टीका० — आपानद्वयं संभूय यत्र पीयते, तत्र ॥

चषकोऽस्त्री पानपात्रं

क्षीर० — चषन्त्यनेन चषकः । गल्वर्कोऽपि ॥

सरकोऽप्यनुतर्षणम् ।

विवक्षातो विध्यनुवादौ । सरति सरकः । अनुतृष्यत्यनेनानुतर्षणं सुरापरिवेषणम् । चषकपर्यायावेतावित्येके । यन्मुनिः — 'चषकश्चानुतर्षश्च सरकः' ॥

टीका० — चषकचतुष्कं मद्यपानपात्रे । अपिशब्दात् सरकोऽप्यस्त्री । 'सरकं वा ना । अनुतर्षो ने'ति तु रत्नकोषः । 'चष भक्षणे' । मूर्धन्यषः । 'सृ गतौ' । 'कृजादिभ्यो वुञ्' (उ० ५. ३५) । चषकसरकौ । 'तृषा पिपासायाम्' । ल्युट् । अनुतर्षणम् ॥

धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत् समाः ॥ ४२ ॥

क्षीर० — धूर्वति हिनस्ति धूर्तः । अक्षैर्दीव्यति विजिगीषते तच्छीलोऽक्षदेवी । किं तवास्तीति पणते कितवः ॥

टीका० — धूर्तपञ्चकं द्यूतकारे । द्यूतविषये धृतिरवस्थानमस्यास्तीति धार्तः । मत्वर्थे ज्योत्स्नादित्वादण् । अक्षदेवी णिन्यन्तः । किं तवास्तीति वदतीति कितवः । पृषोदरादिः ॥

स्युर्लग्नकाः प्रतिभुवः सभिका द्यूतकारकाः ।

क्षीर० — लगति लग्नकः । प्रतिनिधिर्भवति प्रतिभूः । सभा

---

१. 'नावा' ख. पाठः. २. 'क' ग. ङ. पाठः. ३. 'दः' ग. पाठः. ४. 'कृ', ५. 'क' ङ. पाठः. ६. 'णम् । चु' ख. पाठः. ७. 'ति जि' ग. घ. ङ. पाठः. ८. 'धू' ङ. ज. पाठः.

द्यूतशालाऽस्त्यस्य सभिकः। द्यूतकारकः। द्वौ द्वौ भिन्नार्थौ। आद्ययोः सर्वसामान्यत्वात्॥

टीका०—लग्नकद्वयं लग्नके। 'ओ लजी ओ लस्जी व्रीडे'। क्तः। कन्। लग्नकः। किंपि प्रतिभूः। सहिकद्वयं सहिअरे इति ख्याते। द्यूतसहयोगात सहिकः। व्रीह्यादित्वात् ठन्॥

द्यूतोऽस्त्रियामवक्षती कैतवं पण इत्यपि॥ ४३॥

क्षीर०—दीव्यते स्म द्यूतम्। कितवस्य कर्म कैतवम्। पणनं पणः। दरोदरं नानार्थे॥

टीका०—द्यूतचतुष्कं द्यूते। दिवेः क्तः। द्यूतः। 'दिवोऽविजिगीषायाम्' (८. २. ४९) इति निष्ठानत्वं न भवति। अक्षाः पाशका अत्रोपायत्वेन सन्तीति मतुपि अक्षवती। स्वभावात् स्त्रीत्वम्। कितवकर्म कैतवम्। युवादित्वादण्। पणयोगादर्शआद्यचि पणः॥

पणोऽक्षेषु ग्लहः

क्षीर०—पण्यते पणो बन्धकः। गृह्यते ग्लहः। 'अक्षेषु ग्लहः' (३. ३. ७०) इत्यप्॥

टीका०—अक्षेषु द्यूतेषु आढ इति ख्याते ग्लहः। 'अक्षेषु ग्लहः' (३. ३. ७०) इति निपातनाद् ग्रहेरपि लत्वम्॥

अक्षास्तु देवनाः पाशकाश्च ते।

क्षीर०—अक्ष्णोत्यक्षः। दीव्यत्यनेन देवनः। पाश्यते बध्यतेऽनेन पाशकः। प्रासक इत्येके॥

टीका०—अक्षत्रयं पाशके। विभीतकादावप्यक्षः। पाशकस्तालव्यशः॥

परिणायस्तु शारीणां समन्तान्नयने

क्षीर०—वामदक्षिणयोः शारीणां परिणयनं परिणायः। 'परि-

१. 'न्यात्॥' ग. घ. ङ. पाठः. २. 'ति साधुः॥' ख. पाठः. ३, ४. 'रा' ग. घ. ङ. पाठः.

न्योर्नीणोर्द्यूताभ्रेषयोः' (३. ३. ३७) इति घञ्। शृणाति शारिः[1] विखेलनी ॥

टीका० — वामदक्षिणयोरग्रतश्च शारीणां नयनं परीणायः। 'परिन्योर्नीणोर्द्यूताभ्रेषयोः' (३. ३. ३७) इति घञ्। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (६. ३. १२२) इति पक्षे दीर्घत्वम् ॥

अस्त्रियाम् ॥ ४४ ॥

अष्टापदं शारिफलं

क्षीर० — अष्टौ पदान्यत्राष्टापदम्। शारयः[2] फलन्त्यत्र शारि[3]फलं[4] खेलनाधारश्चतुरङ्गफलकादि। आकर्षो नानार्थे ॥

टीका० — अष्टापदद्वयं शारिपट्टे। एतावस्त्रियौ। प्रतिपङ्क्ति अष्टौ पदान्यस्येत्यष्टापदम्। 'अष्टनः संज्ञायाम्' (६. ३. १२५) इति पूर्वपददीर्घत्वम्। देशान्तरे चतुरङ्गस्यैव पीठिकायां शकद्यूतकमपि प्रवर्तते। 'शॄ हिंसायाम्'। 'शृणातेः शकुनौ' इतीञ्। शारिः। तालव्यादिरुक्तः। ईश्वरा हि प्रायः पट्ट एव दीव्यन्ति ॥

प्राणिद्यूतं समाह्वयः।

क्षीर० — प्राणिभिर्मेषकुक्कुटादिभिर्द्यूतं प्राणिद्यूतम्। संघर्षेणाह्वयन्तेऽत्र समाह्वयः[5] ॥

टीका० — प्राणिद्यूतद्वयं मेषकुक्कुटादियुद्धे। तदुक्तम् —

"अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते ॥
प्राणिभिः क्रियते यत् तु स विज्ञेयः समाह्वयः ॥"

इति ॥

---

१. 'रः', २. 'राः फ', ३. 'र' ग. घ. ङ. पाठः. ४. 'लं लेखना' ख., 'लं खल' ग. पाठः. ५. 'णात्राह्वयन्ते स' ख. पाठः.

उक्ता भूरिप्रयोगत्वादेकस्मिन् येऽत्र यौगिकाः ॥ ४५ ॥
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ॥ ४५½ ॥

क्षीर० — अत्र शूद्रवर्गे ये सम्बन्धिशब्दा लक्ष्यबाहुल्यादेकस्मिन् लिङ्गे उक्ताः, ते तद्गुणयोगादन्यत्र वर्तमाना लिङ्गान्तरेऽप्युत्प्रेक्ष्याः । यथा — कर्मण्या भृतिः कर्मण्यं वेतनं, हलिप्रिया सुरा हलिप्रियं मद्यम्, अक्षवती सभा अक्षवद् द्यूतम् । एवं मालाकारी स्त्री । अक्षदेवनी स्त्री । तथा अनुपदीनं पा(द)त्रम् ॥

इति श्रीक्षीरस्वाम्युत्प्रेक्षितेऽमरकोशोद्घाटने भूम्यादिकाण्डो द्वितीयः ।

टीका० — समस्तलिङ्गग्रहादेव संपूर्णतां परिहरति — अत्र च वर्गे ये यौगिकाः शब्दाः मायाकारमार्दङ्गिकवैणविककर्मकरनियोज्यचौराक्षदेविप्रभृतयः पुंसि प्रचुरप्रयोगदर्शनाद् एकस्मिन् लिङ्गे पुंस्यभिहिताः, ते ताद्धर्म्यात् तद्योगवशादेककियाकारित्वात् ततोऽन्यत्र स्त्र्यादौ वृत्तौ सत्यां लिङ्गान्तरेऽप्यूह्याः । तद् यथा — कर्मकरी स्त्री, कर्मकरं ब्रह्मवृन्दमित्यादि । ये त्वयौगिकाः करणमालिककुम्भकारादयः, ते जातिवचनत्वाच्छूद्रादिवदेव स्त्रीपुंसयोरिति ॥

इति बन्धघटीयश्रीमल्लिनाथसूरिसूनुविरचितायां
टीकासर्वस्वे शूद्रवर्गः ॥

काण्डश्च द्वितीयः समाप्तः ।

Ready for sale.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa.	0	4	0
No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita.	2	0	0
No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary.	2	12	0
No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva.	2	0	0
No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî.	2	4	0
No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha.	0	8	0
No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

No. 14 — नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya. 3 8 0

No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second edition) 1 8 0

No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa. 1 8 0

No. 17—पञ्चरात्रम् (Do.) Do. 1 0 0

No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya. 4 0 0

No. 19—मानमेयोदयः (Mimâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita. 1 4 0

No. 20—अविमारकम् (Nâtaka) by Bhâsa. 1 8 0

No. 21—बालचरितम् (Do.) Do. 1 0 0

No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa 1 8 0

No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1 & 2 Kâṇḍas) 1 12 0

No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. 1 0 0

No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri 0 12 0

No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa 0 12 0

No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1 & 2 Sargas) 1 12 0

No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas 0 8 0

No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda) 2 4 0

No. 30—वास्तुविद्या (Silpa) 0 12 0

No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kâṇḍas) 1 0 0

No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Aruṇagirinâtha and Vivaraṇa of Nârâyaṇa Paṇdita (Part II. 3rd, 4th & 5th Sargas) 2 8 0

No. 33—वाररुचसंग्रहः (Vyâkaraṇa) with the commentary Dîpaprabhâ of Nârâyana 0 8 0

No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin 1 4 0

No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha 1 8 0

No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivaraṇa of Nârâyaṇa Paṇdita (Part III. 6th, 7th & 8th sargas) 3 0 0

No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary 0 4 0

No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatiya Sarvânanda (Part I. 1st Kânda) 2 0 0

No. 39—चारुदत्तम् (Nâtaka) by Bhâsa 0 12 0

No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Srî Mankhuka and its commentary by Samudrabandha 2 8 0

No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivaraṇa of Srî Sankara Bhagavat Pada 0 4 0

No. 42—प्रतिमानाटकम् (Nataka) by Bhâsa 1 8 0

No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshiraswamin and Tikasarvaswa of Vandyaghatiya-Sarvananda (Part II. 2nd Kanda 1—6 Vargas) 2 8 0

No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama 0 4 0

No. 45—प्रपञ्चहृदयम् (Prapanchahridaya) 1 0 0

No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakaṇtha Dîkshita 0 8 0

No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishṇânanda Sarasvatî. (Part I) 1 12 0

No. 48— Do. Do. (Part II) 2 0 0

No. 49—गोलदीपिका (Jyotisha) by Parameswara 0 4 0

No. 50—रसार्णवसुधाकरः (Alankara) by Sri Singa Bhupala 3 0 0

No. 51— नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part III 2nd Kanda 7—10 Vargas) 2 0 0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications

Trivandrum.